लघुवार्जिकटीका

नं. ४३१६ पत्र ५८ से ६५ तक
६५ पत्र

सोमेनयजेतेत्यादिकमष्टार्थकवाक्यजातगतक्रियाकारकपदजातंक्रियाकारकसंबंधपरित्यागेनसमप्रधानतयाभाव
नाकरणंसमर्पयन्नस्त्येकमपूर्वकल्पकंप्रधानाख्यातार्थभावनान्वयसंभवेउपपदार्थस्यधात्वर्थानन्वयात।ननुसोमे
नयजेतेत्युत्पन्नस्ययागस्यज्योतिष्टोमवाक्येफलसाधनत्वप्रतीतेः कथंसोमपदार्थस्यफलभावनान्वयइतिचेत्।
एतदधिकरणद्वयसिद्धप्रकारेणगुणविधिनामधेयविचारस्यकृततया ऽत्रपूर्वपक्षेज्योतिष्टोमगुणधात्वर्थयोःस्व
र्गभावनाकरणत्वंसोमवाक्येप्युभयोरप्याप्ततफलभावनाकरणत्वमितिचेत्।धर्मःप्रतिपदंनास्ति।सोमधात्वर्थ
योर्भावनाकरणत्वेभावनाभाव्यनिर्वर्त्तकत्वस्यैवतत्करणत्वरूपतयाद्वयोःफलजनकत्वापत्तौफलापूर्वद्वयं
स्यात्।नचाग्नेयादीनामेकफलापूर्वजनकत्ववत्इहापिस्यादितिशंक्यं।तेषांसमुच्चितानांकारकान्वयेनत
थात्वेपिअत्रसोमेइत्थंकरणविभक्तिश्रवणेनयजेतेत्यत्रापियजेःस्वार्थविशेषितकारकलक्षकतयासमुच्चि
तद्वयोःकारकानन्वयेनापूर्वद्वयकल्पनावश्यंभावात्।एकवाक्योपादानादारुण्यादिवत्कारकाणांसमुच्चये
पिकारकेसमुच्चित्यासंबंधात्।तस्माल्लाघवादेकंभावनाकरणंइतरत्तदर्थं॥१॥फलस्यसाध्यस्यसिद्धसाधनाकां
क्षत्वादुपपदार्थस्यकरणत्वं।धात्वर्थस्यानुकरणानुग्राहकतयातदन्वयीतिचेत्।भावार्थेभ्यश्चतज्जनिः।पदश्रुत्या

११ धात्वर्थएवस्वसाधननिष्पन्नः क्रियाकरणंअन्यस्यवाक्येनतत्संबंधः तच्चदुर्बलंश्रुतेः सिद्धरूपद्रव्ययागादेरदृष्टोपका
रकत्वापत्त्यागौरवतादवस्थ्याच्च। तस्माद्धात्वर्थएवभावनाकरणंततनएवापूर्वं। धात्वर्थातिरिक्ताभावनायजतीत्यस्यया
गंकरोतीतिविवरणात्। लधात्वर्थरूपातिप्रत्ययान्वयव्यतिरेकानुविधायिज्ञानविषयत्वान्नद्वाच्याप्रकृतधात्वर्थातिरिक्ता
स्वास्थ्यकामः शयीतेत्यादौधातोरकर्मकत्वेपिस्वास्थ्यादिकर्मिकाओदनंपचेतेत्यादौधात्वर्थकर्मकर्मिकाचसिद्धकर्तृ
कक्रियाच्याख्यातेष्ववगम्यतइति ॥२॥ आख्यातस्यापूर्वकल्पकत्वमसिद्धं। यजेतस्वर्गकामइत्यादौधात्वर्थस्यैवस्वर्ग
साधनत्वबोधनात्। नचविनष्टस्यकालांतरफलाजनकत्वान्नकल्पनंतथात्वेतेनैवान्यथासिध्यापातात्। तस्यव्यापा
रादिरूपत्वेरद्विपाभावेतत्सन्निकर्षस्यैवयागाभावेऽभावापातात्। अतः शास्त्राद्विनष्टस्यापिजनकत्वकल्प्यतावदवस्था
नंवात्तृतीयादिक्षणेफलबलादयोग्यत्वंवेतिचेत्। अग्निधर्मस्थिरस्थापी। ननावद्वेदोविनष्टस्यसाधनत्वंब्रूते। यागोस्तु
तंसाधनत्वमजनितव्यापारेनसंभवतीतितन्निर्वाहायलोकानुसारात्तत्कल्पनं। फलोपपत्त्यैकल्प्यमानंस्मृतिज
नकभावनासंस्कारवत्तदाश्रयेकल्प्यते। स्वध्वंसव्यापारकत्वफलानंत्यंप्रतियोगितदभावयोरेकत्वजनकत्वंकीर्त्ति
नादिनातत्राशगासंभवआराडुपकारकांगवैफल्यंवस्यात्। द्वैतेमस्यनेननविनापिभावात्। तृतीयादिक्षणेऽयोग्य ११

त्वकल्पनंचप्रमाणविरुद्धंतस्मादग्निहोत्रमेश्वरस्यायी।।तत्रक्रियात्वित्थं।दृष्टार्थधात्वर्थातिरिक्तेधात्वर्थेयत्रनिरपेक्ष
कारकशक्तिप्रमितिस्तत्रतत्त्वैकमपूर्वमिति।।३।।व्रीहीनवहंतिपिष्टंसंयौतीत्यादावपिविध्यनुपपत्त्याकल्प्यमानमपू
र्वंधात्वर्थादेव।अन्यथाऽपूर्वद्वयकल्पनागौरवं।तथाचव्रीहिभिरवहंतिपिष्टेनसंयौतीतिक्रियाप्रधानतेतिचेत्।गुणः
संपक्वादिकः।श्रुतविनियोगभंगप्रसंगात्प्रधानकर्मत्वं।धात्वर्थस्यकर्मकारकेतुषविमोकादिदृष्टातिशयजनक
त्वाद्द्रव्यस्यचपुरोडाशद्वारायागसाधनत्वात्क्रतुतोथदृकल्प्यविधेम्नऽप्राप्तांशपरिहरणात्मकनियमफलकत्वात्त
स्यचदृष्टाभावेनादृष्टार्थत्वं।तस्माद्गुणकर्मसंपवनादि।।४।।व्रीहीन्प्रोक्षति।स्रुचःसंमार्ष्टि।इत्यादौदृष्टोपकाराभा
वात्प्रोक्षणादीनांनगुणकर्मत्वं।द्वितीययाद्रव्यप्राधान्यावगमात्प्रधानत्वमितिचेत्।बल्वजान्शिखण्डकान्कुर्वितिलोकेस
क्तूञ्जुहोतीतिवेदेचतस्याप्राधान्यव्यभिचारात्तथाचव्रीहिभिःप्रोक्षतीत्यादिनाविपरिणामात्प्रधानकर्मत्वमितिचे
त्।प्रोक्षतीत्यादावपितथा।गुणकर्मानदृष्टोपकारजनकत्वंगुणकर्मत्वं।किंतुद्वितीयांतशब्देनद्रव्यमुद्दिश्यविधी
यमानत्वं।नचद्वितीयायाःकर्मत्वेव्यभिचारःउक्तस्थलेतस्याःकरणत्वलक्षकत्वात्।नस्यतद्वाच्यत्वेपरशोःकरण
त्वविवक्षायांपरस्तुमितिस्यात्।पाणिनिनापिकर्तुरीप्सिततमंकर्मेत्यादिसूत्रद्वयेनेप्सिततदितरसाधारणंसाध्य

१२ त्वंकर्मत्वमित्यनुगमप्यकर्मणिद्विताये त्युक्तंतन्मूलप्रयोगाश्चलोकवेदयोः स्पष्टाः अतोगुणकर्मप्रोक्षणादि ॥५॥
आज्यैस्तुवतेप्रउगंशंसतीत्यादिना विहितेप्रगीताप्रगीतमंत्रसाध्यगुणिनिष्ठगुणाभिधानात्मकेस्तोत्रशस्त्रेगुणकर्मणी॥
गुणेकीर्त्यमानेगुणिन्यादेवतायांस्मृतिः संस्कारोजायते। संस्कृतायाश्चयाज्यादिसंस्कृतायाइवयागांगतेतिदृष्टार्थे
इतिचेत्। प्रधानंस्तोतिशंसती। आख्यातयोः स्मृतितात्पर्यस्तुतिरूपस्वार्थपरित्यागेनतल्लक्षकतास्यात्वक्रालकांतो
देवदत्तरत्यत्रेवयोवक्रालकांतस्तमानयेत्यत्रान्यतात्पर्यस्तुत्यप्रतीतेः। नचश्रुतिबाधेनदृष्टार्थतासुक्ता अतिप्रसंगात्।
अतोऽदृष्टार्थेप्रधानकर्मणीस्तोत्रशस्त्रे। एवंचमाहेंद्रग्रहयजिसन्निधौइंद्रस्तुत्युपपत्तिरन्यथालक्षणाद्यापत्तिरिति॥६॥
याभिर्यजतेददातीत्यादिमंत्रस्याख्यातशब्दा विधायकाः पंचमलकारतयाऽप्रवृत्तप्रवर्तनस्वारस्यात्। अभ्यासेनकर्मांत
रमितिचेत्। ददातियजतीत्यायासंत्रस्यानविधायकाः। यच्छब्दाद्युपहतविधिशक्तिकत्वात्स्मार्थत्वादन्यपरत्वाच्चात्र
भातार्थतयाविधिपरत्वेभवंत्येवविधायकाइति॥७॥ प्रसंगादहंबुध्नियमंत्रंमेगोपायेतिवास्यमंत्रपदस्यप्रवृत्ति
निमित्तमुच्यते। मंत्रात्वेयेप्रयोगार्थमनुष्ठेयाभिधायकाः। प्रयोगसमवाय्यर्थाभिधायकत्वंमंत्रत्वंब्राह्मणंतूक्ता
र्थस्यविधायकमितिनतत्रातिप्रसंगः। याज्ञिकप्रसिद्धिविषयत्वस्योपलक्षणमिदं॥८॥ एतद्ब्राह्मणऐंद्राग्नइत्या १२

दिवाकस्यब्राह्मणयदप्रवृत्तिनिमित्तमुच्यते॥विदेषुमंत्रभागान्योभागोब्राह्मणमुच्यते।मंत्रभिन्नभेदत्वंब्राह्मणत्वं॥९॥
ऊहप्रवरनामानिमंत्रैकवाक्यत्वान्मंत्रकार्यकरत्वाच्चमंत्राइतितन्नैवंऊहप्रवरनामानिप्रयुज्यंतेनमंत्रतां।रथघोषेतिप्र
सक्तेर्नतत्कार्यकरत्वंततेप्रयोजकंमदेकवाक्यत्वमथमध्ययनबहिर्भूतत्वादप्रयोजकंअतोनमंत्राजहादयः॥१०॥ऋचः
सामानियजूंषीत्यत्रऋगादिपदप्रवृत्तिनिमित्तानिक्रमेणोच्यंते।पादबंधवतीऋक्स्यात्।पादबद्धत्वेसत्येकप्रयोजनकमं
त्रत्वमेकऋक्त्वं॥११॥गीतिःसामेतिगीयते।मंत्रत्वेसतिगानत्वं॥१२॥यजुर्मंत्रस्तदितरः।ऋक्सामाभ्यामन्यत्वेसतिमंत्रत्वंय
जुष्ट्वं॥१३॥परसंबोधनार्थामंत्रानिगदायजुर्भ्योन्येइमेनिगदाइमानियजूंषीतिव्यपदेशभेदात्नउच्चैस्त्वोपांशुत्वरूपवि
रुद्धधर्मयोगाच्चेतिचेत्।निगदोपिभवेद्यजुः।व्यपदेशभेदोगोबलीवर्दन्यायेनोपपन्नःप्रयोजनवशात्वामोच्चैस्त्वानुवाद
उच्चैर्निगदेनेति।यजुष्ट्वावच्छिन्नेउपांशुयजुषेतिवाचनिकमप्युपांशुत्वमंगत्वा[redacted]न्मंत्रप्रयोजनेनसामर्थ्यात्प्राप्ते
नाप्युच्चैस्त्वेनवाध्यतेशिष्टाकोपन्यायात्।उपांशुत्वविधेर्निषमविधित्वेलघुत्वात्।निगदेषुसर्वथोपांशुत्वाप्राप्तेर्नतस्य
तद्विधिविषयत्वंअतोनवाधशंकापि।मंत्रत्वेविध्यप्रतिपादनाच्चयजूंष्येवनिगदाः॥१४॥यजुषामवांतरपरिमाणमध्ये
त्यघप्रसिद्धमुच्यते।यावत्साकांक्षमेकार्थंतावदेकंयजुर्मतं।साकांक्षत्वेसतिएकप्रयोजनकत्वेसतिविभज्यमानमे

१३ कंयजुः ततोन्यद्यजुरंतरं। एकप्रयोजनकत्वं भगो वां विभजत्वित्यादावतिप्रसक्तमतः साकांक्षत्वमिति। तन्मात्रंस्योनंतइ
त्यादावतः एकप्रयोजनकत्वमिति। उभयं प्रकृतिप्रत्यययोरतिप्रसक्तमतो विभज्यमानत्वमिति॥१५॥ इषेत्वोर्जेत्वेत्येन
13 दनंतएकोमंत्रः दृष्टः ऽमती सा ऽदृष्टैकत्व्येला घवान्नदेकत्वे च तस्मिंस्तु दृश्यये विभज्यमानसांकांक्षत्वात्। विनियोज
कवचनद्वयं तु आदिमध्यमूर्तिकाभ्यां ह्रुत्वस्योभयत्र विनियोजकमिति चेत्। इषेत्वादौ न मंत्रैकपर्वविनियुक्तार्थभेदतः इ
षेत्वेति शाखां छिनत्त्रि ऊर्जेत्वेत्यनुमार्ष्टीति भेदेन विनियोगान्न एकमंत्रत्वं अंशद्वयस्याप्यन्योन्यानाकांक्षत्वस्य स्फुटत
याऽदृष्टार्थत्वेपि तद्द्वयकल्पनात्। विनियोगवशाच्छिनद्मीत्यादिक्रियाध्याहारेण दृष्टार्थत्वेन प्रयोजनभेदाच्चेति॥१६
तन्र्वंबिष्टेत्यस्य यातिअग्ने अयाश्यपेत्यस्योपरि अपेक्षितस्यानपठितस्य तदन्वितत यानिराकांक्षत्वाद्यातेअग्नेरजाश
येत्यस्य साकांक्षत्वे विप्रष्ठतग्न तयाव्यवहितस्यापि शेषस्यापेक्षितस्यान त्वाभावात्। हराशयेत्यनेनाव्यवधानाभावात्सन
संबंधः। किं त्वध्याहार इति चेत्। आकांक्षयानुषंगस्याघात इत्यादिके मनो। मंत्र इत्यर्थः। किंतयार्थस्यापि सर्वोपरि मकृत्सा
धानुपपत्त्या क्वचित्यच्छिन्नस्य विजातीयव्यवधानाभावमात्रेण द्वितीयशिरस्यानीनस्यात् एव त्वनीयाव्यवहितस्य नदेकवाक्य
तयानुषंगोपपत्तौ न लौकिकाध्याहार इति। एवमपि चित्पतिर्मा पुनातु वाक्पतिर्मा पुनात्वित्यनयोर्निराकांक्षत्वादच्छिद्र १३

दिशेषस्यदेवमन्त्राम्नविनापुनात्विति तत्तीयेनान्वितत्वेनतथात्वात् । नपूर्वयोरनुषंगइतिचेत् । चित्पतिस्त्वेत्यादिकेवाक्ये
यैकत्ववशाद्भवेत् ॥ क्रियापाः पावनस्यैकत्ववशाच्चित्पातिस्त्वेत्यादिकेमन्त्रद्वयेपावनार्थस्याच्छिद्रादेरनुषंगोभवे
त् । दर्भपुंजीलैः पवयतीति विहितस्यपावनस्यभेदेप्रमाणाभावात् । नचतुल्यार्थत्वान्मंत्राणांविकल्पः । लिंगसमाम्नातानां
पुनः प्रत्यक्षवचनेनविधानाच्चतुर्भिरभ्रिमित्यादिवत्संख्यापाश्रविधानेपिसमुच्चयावगमात् । नह्यादरोब्राह्मणवि
हितेषुचसंख्यावत्सर्वेषामुपदिष्टत्वादित्यधिकरणेलिंगविनियोज्यमंत्रेषुब्राह्मणस्य गुणाद्यर्थत्वोक्तेः समुच्चया
र्थत्वनिराकरणाच्चनतेनसमुच्चयः स्यादितिशंक्यं । अत्रविधेयगुणाभावेनतस्यसमुच्चयैकप्रयोजनत्वात् । चित्पतिस्त्वा
पुनात्वित्येतैः प्रतिमंत्रमितियज्ञस्त्रत्वाच्च ॥ १७ ॥ संतेवायुर्वातेनागच्छतामित्यत्रसंगच्छतामिति क्रियापदस्यांगानीतिव
ऊवचनातेनायोग्यतयानन्वितस्याशिषेत्यनेननानुषंगः असंबंधिपदेनगच्छतामित्यध्याहृतेनव्यवधानादितितत्रा
प्यध्याहारएवतदाहासंयज्ञपतिरित्यत्रव्यवायान्नानुपज्यते ॥ १८ ॥ इतिलघुवार्त्तिकटीकायांद्वितीयस्याध्यायस्य
प्रथमः पादः ॥ ॥ एकप्रकरणगतेषुयजतिददातिजुहोतीत्यादिषुधात्वर्थभेदेपिनभावनाभेदः एकस्याएवसंप्रसु
पादीयमानैर्धात्वर्थैरवच्छेदसंभवात् । प्रत्ययार्थभावनायास्तदेकत्वेभेदयोगाच्च । नह्येदेफलापवर्गित्वाच्चासामपूर्वभेदाप

१४ तेः नचभावनैक्येपिकारकभेदादपूर्वभेदःशंक्यः त्रिभिरेककारकशक्तेर्लक्षणासंभवात्।तस्मादेकाभावनेतिचेत्।श
ब्दांतरेकर्मभेदः।भावनाभेदइत्यर्थः पदश्रुत्यायागोपरक्तयावाक्याद्धात्वंतरार्थेनानवच्छेदात्।तत्तद्धात्वर्थावच्छिन्नान्य
14 न्यैवसातत्तत्पदश्रुत्याप्रतिपाद्यते।नचैवंगुणादेवभेदः तस्यधात्वर्थांगगुणविषयत्वात्प्रत्ययांशेकोपितन्मुद्धात्वुपरक्तरू
पभेदाद्भावनाभेदः ततश्चापूर्वभेदइति।।१।।समिधोयजतीत्यादावुपपदात्सुकृत्यपजतीतिपंचकृत्वःश्रुतेःपूर्ववद्धातु
भेदाभावादेकयागोपरक्तैकाभावनाप्रतिपाद्यते।समित्रामकयागेप्रथमंविहितेद्वितीयादिश्रवणंतच्चैवविकल्पेनत
न्नतयादादिदेवताविदधातीतिचेत्।स्यादभ्यासेचतद्भिदा।तयोर्द्धात्वर्थभावनयोर्भिदाभेदइत्यर्थः।विधेरप्रवृत्तस्यप्र
वर्त्तनत्वात्स्याभंगाय।नचगुणविधानात्तदुपपत्तिः तन्नयादादिशब्दानांद्वितीयांतेतयादेवतात्वबोधेऽसामर्थ्येन
समिधोऽग्नइत्यादिमंत्रप्राप्तदेवतासंबंधेननामतयादेवतानुवादकतयावाचरितार्थत्वेनधात्वर्थभावनयोरेववि
धेयत्वात्तस्माद्धात्वर्थभावनयोर्भेदः।।२।।यएवंविद्वान्पौर्णमासींयजतेयएवंविद्वानमावास्यांयजतइत्यत्रापिपू
र्ववत्कर्मभेदःवाग्निर्भ्रीपौर्णमास्यामनूच्यतेवृधन्वतीअमावास्यायामित्याज्यभागक्रमाद्धिच्छिद्यवाश्येनेनैकेकर्मानुवा
देनमंत्रद्वयविधानेनतयोरेकस्याग्नेयतयाएकस्यसौम्यतयावैकल्पिकदेवतासमर्पकत्वात्।अग्नेवाज्यलाभाज्ञ्ना १४

रूपत्वं आग्नेयादिवाक्यैर्द्रव्यदेवतयोः समर्पणात्। अन्यथानुवादवैयर्थ्यात्। पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममा
वास्यया यजेतेत्यनयोरपि। ममतु विहद्वाक्यविहितकर्मणोः कालविधिपरत्वं तस्याउभयन कर्मांतरविधिरिति चेत्।
संघानुवादके विहद्वाक्ये। वार्त्रघ्नी पौर्णमास्यामित्यनयोर्लिंगक्रमाभ्यामाज्यभागांगतयाम्नातसुगलद्वयस्य पर्वणो
रव्यवस्थयाम्नातौ तद्बाधेन व्यवस्थामात्रविधिपरतया नानयोः कर्मणोरपूर्वमंत्रविधायित्वं येन देवताप्राप्येत। द्रव्यदे
वतयोः प्राप्तः कर्मानुवादेन विधानानुपपत्या नाग्नेयादिवाक्यैरपि रूपलाभः अतस्त्रिकस्य त्रिकस्यानुवादेन समुदा
यद्वयसंपादके विहद्वाक्ये। तत्प्रयोजनं फलवाक्यस्थनामपदगतद्विवचनोपपत्तिः। पौर्णमास्यां पौर्णमास्येति वाक्यद्व
यं तु त्रिकस्य त्रिकस्यैकप्रयोगविधायकं अतः समुदायानुवादके विहद्वाक्ये॥ ३॥ उपांशुयाजमंतरायजतीति विष्ण्वा
दिवाक्यविहितयागानुवादो न यागविधिः। देवताभावेनारूपत्वात्। हौत्रे शाखाभेदेनाम्नातानां वैष्णवप्राजापत्याग्नीषो
मीययाज्यानुवाक्यायुगलानां विष्ण्वादिदेवताविशिष्टयागेषु विष्ण्वादिवाक्यस्थतव्यप्रत्ययविहितेषु लिंगक्रमाभ्यां
संबंधात्। अनुवादस्य च वैष्णवप्राजापत्ययोरंतरालकालविधायित्वेनार्थवत्त्वात्। न च यथा न गिरा गिरेति निषे
धानुवादसामर्थ्यादिरंकृत्वोज्ञेयमिति विधेतस्यानत्वनियमः तथांऽतरालानुवादसामर्थ्याद्यागानां तत्कालत्वसिद्धि

रितिशंक्यं। प्रत्यक्षकालविध्यभावेप्रयोगविधिसामर्थ्यसिद्धप्रधानकालवत्तांप्रयाजादीनामिवतयोः फलवाक्यानन्वयप्रसं
१५ गात्। तस्मात्समुदायानुवादइतिचे॥ मत्वंतरावचः। जामिवाएतद्यज्ञस्यक्रियतेयदन्वंचौपुरोडाशावित्युपक्रमत्वांत
रालेकिंचिद्विधित्सितमित्यवगमादंतरावाक्यएवयागविधिर्न विष्ण्वादिवाक्ये। अंतरालसंयोगाभावात्। एकोपक्र
15 मावसानतयाप्रतीतैकवाक्यत्वस्यभंगापत्तेश्च। कर्मणिह्रसमत्ययानांदेवतासंस्कारविधित्वप्रतीत्या विष्णवेयष्टव्य
मित्यादिविपरिणामक्लेशाच्च। तस्माद्यागांतराभावाद्याज्यानुवाक्यायुगलत्रयमंतरावाक्यविहितकर्मण्येवक्रमप्रमा
णेनसंबद्धंविकल्पेनदेवताःसमर्पयतीतिनारूपत्वं। अतोनसमुदायानुवादः॥ ४॥ अग्निहोत्रंजुहोतीतिनकर्मवि
धिःजुहोतिसामान्यस्यविध्यनन्वयात्। विशेषोपस्थापकद्रव्यादिसंबंधाप्रतीतेः। नाम्नश्चसामान्यानन्वयेनविशेषाकां
क्षत्वात्। द्रव्यालाभाच्चदध्यादीनांसिद्धरूपाणांपुरुषव्यापारव्याप्यविषयकविध्यनन्वयेनाग्निहोत्रानुवादेनवि
ध्यनुपपत्त्यादध्यादिवाक्यानांतत्तद्द्रव्यविशिष्टहोमविधिपरत्वात्। अतस्तत्समुदायानुवादोऽग्निहोत्रंजुहोतीति। तत्फ
लंचदशानामपिहोमानामाग्निहोत्रनामकत्वेनैकसमुदायापत्त्याचाग्निहोत्रंजुहुयात्स्वर्गकामइतिश्रुतफलसंबं
धः। एवमन्नुमाघारयतीत्यादिविहिताघाराणांसमुदायानुवादश्चाघारमाघारयतीतितत्प्रयोजनंचेद्रऊर्ध्वोऽ १५

ध्वरइति विहितमंत्रस्य त्रिषु संबंधइति चेत्। नाप्याघाराग्निहोत्रोक्तौ। न तावदग्निहोत्रवाक्ये विध्यनुपपत्तिः अन्या
विहितहोमविशेषस्य जुहोतिना लक्षणयोपस्थितस्य तन्नामकस्य विध्यन्वयात्। नापि द्रव्यालाभः दध्यादिवाक्यस्य विधी
नां प्रतीतिनो विशिष्टहोमविषयत्वे पि प्राप्ताप्राप्तविवेकेन होमानुवादेन दध्यादौ पर्यवसानात्। एवमाघारवाक्येष्वपि
अतो नाघाराग्निहोत्रशब्दौ समुदायानुवादिनौ।।५।। ऐंद्रवायवं गृह्णातीत्यादिवाक्येषु द्रव्यदेवतासंबंधकल्पितायां
गा विधीयंतेन देवताविशिष्टग्रहणमात्रं तत्र तस्यानुपयोगात्। न च ग्रहणमात्रान्नैंद्रवायवता भवतीति तथा च तावतां यागानां
सोमेन यजेतेति यजतिः समुदायानुवादः सोमशब्दो ग्रहणानुपपत्तिप्राप्तद्रव्यनियमार्थः। यद्वा आराद्धारयागं गृह्णातीति प्रकृ
तैंद्रवायवादिवाक्यप्रवृत्तेर्द्वारासमर्थप्रदेयस्य प्रकृतिनियमार्थः सः। व्रीहिभिर्यजेतेति यागांगतया विहितव्रीहिणामाग्ने
यादिवाक्यविहितपुरोडाशप्रकृतिनियमे पर्यवसानवत्। यद्वा सोममभिषुणोतीति सोममाप्लावयति आराध्याधारयागं गृह्णा
तीति प्रकृतैंद्रवायवादिवाक्यप्रवृत्तेः पूर्वपूर्वस्योत्तरोत्तरेण संबंधात्। सोमप्राप्तेः तत्प्रख्यन्यायेनानूदितानां नामधे
यं सोमशब्दः एवं हृदयस्याग्रेवद्यतीत्यादिना विहितावदानकर्मणो हृदयादेरग्नीषोमीयं पशुमालभतेति श्रुतपशु
पदेन लक्षणानूदितस्याग्नीषोमीयपदेन प्रत्येकं देवतासंबंधे तावंतो यागाः कल्प्यंते। आलभतिरवदानविद्यार्थप्राप्तसर्श

१६ नानुवादः प्रत्ययस्तु द्रव्यदेवतयोः संबंधविधायकः पद्वाष्टमिकन्यायेन तद्दध्याघवदानानां श्रृतावदानप्रकृतिकतया यागसा
धनत्वप्रतीतेस्तावत्सु यागेषु कल्पितेष्वालभतिनातानन्तु ग्नीषोमीयपदेन पशुशब्दान्तु दितद्दध्यादिद्वारा यागेषु देव
16 ता विधानं तस्मादालभति यजतीसमुदायानुवादाविति चेत्॥ नाप्युक्तीप शुसोमयोः॥ पशुसोमशब्दाद्वालभति यजति लक्ष
कोनतावत्सोमशब्देन प्रदेयनियमः अराव्याधारयेति वाक्यसन्निहितधारासमर्थद्रव्यस्यैव ग्रहणात् कर्मत्वेन लता नियमायोगा
त्॥ नापि सन्नामधेयं सोमस्य प्राप्तभावेन तत्प्रख्यन्यायानवतारात्॥ अभिषवादिवाक्यानां विनियोगभंगेनारादुपकारकांग
विधायित्वापत्तेः सोमस्य द्रव्यमेव यागांगलावगतो व्रीहीनवहंतीत्यादिवद् द्रव्यसाधनलक्षणया श्रुतविनियोगः स्यात् न तत्
नन्नामधेयत्वेप्ति॥ न च तन्नेपयसीत्यादिवत्संस्कृतस्य विनियोगः॥ सा वैश्वदेवी निवदें द्रवायवाहिवाक्ये तत्पदस्य संस्कृत
ग्राहिणोऽभावात्॥ सन्निधानस्य तु इतरेतरानालोचनेन विहितानां सुगयत्प्रकरणग्रहणेन बाधात्॥ प्रकरणस्य चाभिषु
तद्रव्याग्राहकत्वात्॥ धारासमर्थद्रव्यमात्रेण सन्निहितेन यागानां निराकांक्षतया आरादुपकारकत्वेनाभिषवादेर्द्रव्योप
सर्जनस्यैकेग्रहणात्॥ तस्मान्न नामधेयं सोमशब्दः नापि प्रदेयप्रकृतिनियमार्थः ऐन्द्रवायवादिवाक्ये ग्रहणसंस्कारमात्रस्य वि
धानात्॥ न च ग्रहणेनैंद्रवायवत्वं तस्यादितिवाच्यं॥ सोमेन यजेतेति वाक्ये न सोमविशिष्टयागविहितेस ग्रहणवाक्यगतद्रव्य १६

देवतासंबंधानुपपादयन्नग्रहणेन तद्देवत्येककर्तव्ये सहाय्यो भवति। दशमुष्टिपरिमितसोमस्य रसानामेकग्रहेण ग्रहीतुमशक्य
त्वान्नानाग्रहेषु गृहीतेषु तेषां ह्रस्वार्थत्वाय समुच्चये वक्तव्ये दशेतान धर्षुरित्यादिक्रमसमुच्चयदर्शनमुपपद्यते। अग्नी
षोमीयं पशुमालभतेत्यत्रापि द्व्यदेवताविशिष्टे यागे विहिते पशोर्विशासनश्रवणात् दाशमिकन्यायेन हृदयादिद्वारा
तस्यां गतत्वात्तदवदानानि संस्कारकर्माणि भवन्तीति न पशुशब्दे लाक्षणिकत्वम्। अतो नालभतियजतीसमुदायानुवादो॥
६॥ सप्तदश प्राजापत्यान्पशूनालभत इत्यत्र पशुशब्दे एकशेषे कृते सप्तदशपदेन संख्यावैशिष्ट्यं पशुषु बोधितं इतरेत
रयुक्तेषु संख्याविशिष्टेषु तेषु प्राजापत्यपदेन देवतासंबंधकरणेन संबंधे कान्तः कल्पितो यागोऽपि सप्तदशपशु
द्रव्यकः प्रजापतिदेवताक एक एव भवतीति चेत्। प्राजापत्येषु पशुषु संख्यया कर्मणां भिदा। यदि सप्तदशपशुद्र
व्यकत्वं यागस्य स्यात्। तदा एकपशुनिष्पन्नैकादशावदानगणा एक एकस्मिन्यागेऽङ्गमित्यग्नीषोमीयात्प्रकृतिपरं
परयाप्राप्तं बाध्येत। न च तस्य प्रकृतावार्थिकत्वेन नातिदेशः अग्नीषोमीयेन पशुना यजेतेति विपरिणते उत्पत्तिवा
क्ये उपदेशगतपश्वेकत्वस्य चार्थिकत्वायेन विवक्षिततया तत्प्रभवेषु हृदयाद्यङ्गेषु दाशमिकन्यायेन यागसाधने
षु तन्नन्देकत्वस्य विवक्षिततया विधिसंस्पर्शेनार्थिकत्वाऽभावात्। न चातिदेशगवाधेनोपदेशवर्यातसंभवे संयुक्तः

७ उपदेशस्यतद्धितानंतरमेकशेषेणप्रतिद्रव्यंसंबंधभेदेनयागभेदस्योपपत्तेःअतोद्रव्यगतसंख्ययाद्रव्यदेवतासंबंधस्य
तावत्त्वापादनेनकर्मणांयागानांभिदाभेदः॥७॥अथैषज्योतिरित्यत्रैतच्छब्देनप्रकृतज्योतिष्टोमपरामर्शात्प्रकृतहा
नाप्रकृतप्रक्रियाविशिष्टविध्यर्थवांतरादिकल्पनापरिहाराच्चतत्रैवसहस्रदक्षिणागुणविधिरितिचेत्॥अथैषज्यो
17 तिरित्यादौतच्छब्दोनामभेदतः।अथैतिप्रकृतविच्छेदाज्ज्योतिरादिनामभेदात्तदर्थांतरावगमान्नस्यवैतेनयजेतेत्याख्यात
सामानाधिकरण्येनयागत्वावगतेःएतच्छब्दस्यप्रस्तूयमानपरत्वाद्दक्षिणाविधेःसहस्रदक्षिणेनयजेतेत्येतावतैवोप
।त पत्तेरिवैकपर्थ्यात्तत्तन्नामककर्मत्रयंसहस्रदक्षिणाकंविधीयतइति॥८॥सावैश्वदेव्यामिक्षावाजिभ्योवाजि
नमित्यत्रवैश्वदेवीपदेनद्रव्यदेवतासंबंधावगमात्वैश्वदेव्यायजतेतियागकल्पनाशुद्धयज्यवगतंयागंगुणानतु
रक्तंसाकांक्षंयोग्यंचप्रतिवाजिनस्तुतत्त्वशिष्टत्वाज्जोन्नमामिक्षायेषांतेवाजिनइतिरूढकर्मसंबंधिनोविश्वान्देवानुद्दिश्य
वाविधीयतइतिद्रव्ययोर्विकल्पःअतएकंकर्मेतिचेत्।गुणाद्वाजिनयागस्यत्वामिक्षायागतोभिदा।शुद्धयाजिसले
पिद्रव्यविशिष्टस्यैवतेनुप्रतीतेःनिराकांक्षत्वात्तद्वैश्वदेवमित्येतावतैवतच्छब्दस्यसंस्कृतपयःपरामर्शिनःतत्त्वेनैवत
उपस्थापकतयाद्रव्यविशेषदेवतयोःसंबंधप्रतीतास्त्रीलिंगामिक्षापदयोर्नित्यानुवादत्वात्।वाजिभ्योवाजिनमि ७

तिपदद्वयसमभिव्याहारात्वाजिवाजिनयोः संबंधप्रतीत्याविलंबितत्वात्। अश्वत्वेरूढस्यवाजिपदस्ययोगाद्विश्वदेवानुप
स्थापकत्वात्। अग्निर्वायुसूर्यस्तेवैवाजिनः छंदांसिवैवाजिनइतिचवाजिशब्दस्यवाक्यशेषेर्थद्वयप्रतीतेश्चकथंवि
दधिपूर्वकर्मणिनिवेशयल्लभमानंवाजिनंस्वनिवेशायकर्मांतरंकल्पयतीतिगुणाद्यागभेदः। नात्रकर्मणिगुणद्वयविधानात्तु
पपस्याद्गुणस्यभेदकत्वंपौर्णमास्यधिकरणेप्रसंगादुक्तं॥१०॥दध्नाजुहोतीत्यादिवाक्यावगतदशद्रव्याणामेकाग्निहोत्रहो
मसंबंधेष्टदोषदुष्टविकल्पापत्तेः प्रथमप्रवृत्तवाक्यविहितद्रव्यावरुद्धेन्यस्यानिवेशाद्वा कर्मांतराण्येवतेर्विधीयंतइतिचेत्। नचा
ग्निहोत्रतोभिन्नादधिहोमादयोमताः। अन्योन्यानालोचनेनकर्मोत्पत्तिमालोच्ययुगपत्सर्वप्रवृत्तेः प्रमाणवशाद्व्रीहियववद्विक
ल्पोपपत्तेश्चनाग्निहोत्राद्दधिहोमादयोभिन्नाः॥११॥ अग्निहोत्रंप्रकृत्यदध्नेंद्रियकामस्यजुहुयादितिश्रुतेप्रकृतहोमात्क
र्मांतरंदधिविशिष्टंफलायविधीयतेधातुपारार्थ्यवाक्यार्थविध्योःपरिहाराय। समानपदोपात्तत्वप्रत्यासत्त्यातस्यैवभावना
करणतयाफलसाधनत्वात्। नचप्रकृतस्यैवफलेविधानंदध्नेंद्रियस्यपाक्षिकानुवादत्वापत्तेः नचतदवस्थस्यैवप्रकृतस्यवि
धानंवाक्यभेदापत्तेरितिचेत्। दध्नेंद्रियेतिकामायगुणमात्रंविधीयतेप्रकृतहोमाप्रकृतप्रक्रियाविशिष्टविधिमत्वर्थलक्ष
णाविशेषणोत्पत्तिविधिकल्पनादिदोषपरिहाराय प्रकृतहोमनिरूपितंदधिविशिष्टंकरणकारकंफलेविधीयतेदृष्टहे

१८ मव्यापारसंबंधमंतरेणासिद्धरूपस्यतस्यफलजनकत्वस्यकरणोपदेशवैयर्थ्यपरिहारस्यचालाभात् फलभावनाकरणत्वंतु
कारकशक्तेः यागादेरिवसमभिव्याहारगम्यंधातुपारार्थ्यविग्रहस्टविध्योश्चागत्यास्वीकारइतिभावनामात्रस्यभेदोनधात्वर्थ
18
स्येति।१२। एतस्येवरेवतीषुवारवंतीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेतेत्यत्रप्रकृतहानादिपरिहारायसर्ववाक्य
विहिताग्निष्टुद्यागमाश्रित्यरेवत्यगाधारवारवंतीयंसामपशुफलेविधीयते।साम्नःसाक्षाद्यागाऽसाधनत्वेपिअग्निष्टो धी
मस्तोत्रद्वारातत्साधनत्वंतदभावेपिकृत्वेत्यस्यक्रियांतरसापेक्षतयातत्स्मरणाययागसंबंधतेनतदकारकस्यापितदाश्र
यत्वंप्रस्थायीयदाक्षायणयज्ञसंस्थादीनामिवोपपत्तेरेवतीवारवंतीयसंबंधस्यकृत्वाशब्दकल्पितेनविध्यंतरेणकल्प
नान्नवाक्यभेदःसाम्नोयागसंबंधद्वारस्तोत्रांतरसत्वेपिकृत्वर्थवारवंतीयस्याग्निष्टोमस्तोत्रद्वारकत्वात्फलार्थस्यापि
तदेवद्वारमनुमीयते।एतच्छब्दःप्रकृताश्रयेणसाम्नःफलार्थस्यसंबंधानुवादःअतोगुणात्फलमितिचेत्।।कामायेरेव
तीवाक्येकर्मांतरविधिर्भवेत्।।नतावत्स्तोत्रद्वारासाम्नःप्रकृतयागाश्रयत्वंप्रकृतक्रियानिरूपितकारकशक्तेरे
वसर्वाधिकरणेफलवत्वोक्तेः।साम्नःस्वस्तोत्रद्वारापियागकारकत्वाभावात्।द्वितीयांतत्वाच्चवारवंतीयमित्य
स्यगीतिरूपस्यसाम्नोद्रव्यादिवदाश्रयाकांक्षाभावाच्च।।क्रत्वर्थवारवंतीयदृष्टांतेनाग्निष्टोमस्तोत्रद्वारत्वानुमान १८

स्य धर्मेऽप्रमाणत्वाच्च। रेवतीषु वारवंतीयं कृत्वा पश्वन भावयेदिति फलभावनापेक्षयात्कामप्रत्ययोपपत्तौ तदर्थमपि
यागापेक्षाभावाच्च अतो गुणफलसंबंधविधौ यजेतेति अग्निष्टोमसामेजिवप्राप्तानुवादत्वायोगाद्विधाने च वाक्यभेदादन
र्थकं स्यादिति रेवतीवारवंतीयविशिष्टो यागः फले विधीयते। अग्निष्टोमसामेति तु पूर्वयागाल्पकृते प्राप्तस्यानुवादः अ
तः कर्मांतरं फले विधीयत इति। १२। ब्रह्मसामसंज्ञकं स्तोत्रं प्रकृत्य यो वृष्टिकामो योन्नाद्यकामो यः स्वर्गकामः स सौभरे
ण स्तुवीतेति ब्रह्मसामनिरूपितं सौभरसंज्ञकसामविशिष्टं करणकारकं वृष्ट्यादिफलत्रये विधाय पुनः श्रूयते हीषि
ति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामायेति तत्र हीषादिनिधनविशेषाः सौभरफला
त्फलांतरे वृष्टिकामादीनुद्दिश्य विधीयंते। तत्तत्फले विशेषसाधनसौभरेऽनियमप्राप्ते हीषादिनियमविधौ वृष्टिका
मादिशब्दानां फलसाधनसौभरलक्षकत्वं स्यात् तथा च साधनद्वयमेलने प्रभूतं वृष्ट्यादि भवतीति चेत्। हीषाद्या
नियतान्यतत्फलार्थे साम्नि सौभरे सिद्धरूपाणां हीषादीनां वृष्ट्यादिवदाश्रयाकांक्षाणामप्रकृतत्वात्तदाश्रयत्वस्यायो
ग्यत्वान्निधनस्य वा प्रकृतत्वात्तदाश्रयत्वे विधीयमाने तस्य फलसंबंधस्य च विधौ वाक्यभेदाद्वृष्टिकामादिशब्दलक्षि
ते सौभरे हीषादयोऽनियतप्राप्ता नियम्यंते। यद्वा वासिष्ठानां नाराशंसो द्वितीयः प्रयाज इतिवत्परंपराप्रापितत्साध

१९ नत्वोपपत्तेर्न फलपदे साधनलक्षणापि तस्माड्डीषादयो नियम्यंते ॥१३॥ ॥इति लघुवार्त्तिकटीकायां द्वितीयाध्यायस्य
द्वितीयः पादः॥ ॥

यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्गृह्णीयादित्यत्र रथंतरविशिष्टे क्रतौ निमित्ते ऐंद्रवायवाग्रत्वमुच्य
मानं प्रकृतज्योतिष्टोमस्य तद्विशिष्टत्वासंभवात्कर्मांतरमापादयति रथंतरस्य क्रतुव्यापितयाऽतरत्वव्यवच्छे
दकतया रक्तोत्फलमित्यत्रेव विशेषणत्वस्यवाच्यत्वात् प्रकृतकर्मणि गायत्र्यादितानास्त्यन्नासमावेशा
दिति चेत् । न रथंतरसामेति गुणात्कर्मांतरं भवेत् न विशेष्यव्याप्तिर्विशेषणे नियता कुंडलीत्यादौ सन्ना
मात्रेणापि दर्शितात् तन्निपतसत्ताकत्वे व्यवच्छेदकता । यथा पांडुरशंखद् इति अत्र पृष्ठस्तोत्रे वैकल्पिकत्वा
द्बृहद्रथंतरयोः प्राप्तिकोऽसन्नाव्युदासो विशेषणफलं । व्यवच्छेदकत्वेपि विरोधिबृहद्व्यवच्छेदकत्वं न गाय
त्र्यादेः रक्तत्वस्येव दीर्घत्वाविरोधिनः अतः प्रकृतस्यैव क्रतोस्तद्विशेषणत्वमिति रथंतरविशिष्टक्रतुर्निमि
त्तं । क्रतुविशिष्टं रथंतरं वा । कादाचित्कस्य निमित्तत्वसंभवात् । अतो न रथंतरगुणात्कर्मांतरं १ राजसूये राज
कर्तृकेऽवेष्टिर्नाम दृष्टिः आग्नेयमष्टाकपालं निर्वपतीत्यादिका श्रुता तत्र श्रूयते यदि ब्राह्मणो यजेत बा
र्हस्पत्यं मध्ये निधाय आहुतिमाहुतिं हुत्वा तमभिघारयेत् यदि राजन्यः ऐंद्रं यदि वैश्यो वैश्वदेवमिति । त

ल. टी त्रत्रैवर्णिकानांप्राप्तानांनिमित्तार्थोनिश्रवणान्निप्रजायालनादिकर्मकर्त्तरिराजशब्दस्यार्यैःप्रयोगात्
२० आंध्राणांक्षत्रियत्वजातौप्रयोगस्यपीलुशब्दन्यायेनबाधात्तस्यकर्मणीत्यधिकारेपत्यंतपुरोहिता
दिभ्योयगितिपाणिनिसूत्रस्यसाधुत्वान्वाख्यानपरतयाशक्तिग्राहकत्वात्।प्राप्तिर्द्योतकयदिश्रुतिवि
20 रोधाच्चअतोराज्यकर्तॄणांप्राप्तत्वादनुवादइतिचेत्।यदिब्राह्मणइत्याद्यमवैष्टिप्रापकंवचः।ब्रा
ह्मणवैश्ययोःइतिशेषः।राजशब्दस्यक्षत्रियत्वेआंध्रप्रयोगान्नमूलकत्वाद्व्याकरणस्यतत्ररा
जशब्दस्यपुरोहितादिगणेपाठात्स्मृत्याचारयोर्विरोधेस्मृतेर्बलवत्त्वेनार्थप्रसिद्धेर्वाधात्।यदिशब्द
स्यनिपातत्वाद्राजानमभिषेचयेदितिप्रयोगाच्चराजायजेतेत्यत्रप्राप्तोब्राह्मणवैश्ययोरित्यनु
वादासंभवात्तयोःप्रापकंवचनंएतयात्राद्यकामंयाजयेदितिवचनंनेतिकृत्वाचिंतयेदं २ व
संतेब्राह्मणोग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्यइति।तथावसंतेब्राह्मणमुपनयीतेत्यादिश्रु
तंतत्रब्राह्मणादिश्रवणंकालविधौनिमित्तार्थंयजेतस्वर्गकामइत्यादिक्रतुंविधिभिरग्निविद्यापेक्षि २०

भिस्तत्राधनयोराधानाध्ययनयोरद्दिष्टत्वात् अग्निषाधानसाध्यत्वस्य नक्तं गार्हपत्यमित्यादिगुणविधिभिरव
गतेः अध्ययनांगत्वादुपतयतस्यापि। यएवंविद्वानग्निमाधत्त इतिगुणानाक्त ष्टविधिशाद्धासर्वेषामाधानप्रा
प्तेरभोनिमित्तार्थब्राह्मणादिश्रवणमितिचेत् वसंतादिवचोप्येवमाधानप्रापकं मतं। आधानसाध्यत्वस्या
ग्निषवगमेपि अन्येताहितानांक्रयादिनापिप्राप्तिसंभवेनियतमाधानं नाप्तिपंत्यग्नयः। लिखितपाठादिनापिविद्या
संभवाच्चनाध्ययननियमः सामान्यवचनस्य वर्त्तमानसरूपस्पस्य ष्टविधिसत्वेनविधित्वकल्पनं तस्माद्ब्राह्मणा
दिकर्तृकस्यवसंतादिकालविशिष्टस्यचविधानार्थं वसंते ब्राह्मण इत्यादिवाक्यं। अतः प्रापकवचनमाधानोपन
यनयोः ३ दर्शपूर्णमासप्रकरणोदात्तायणयज्ञेनस्वर्गकामोयजेत साकंप्रस्थायीयेनयजेतपशुकाम इतिश्रुतयो
र्नफलायगुणविधानं तत्रामक गुणयोः लोके दध्यादिवदप्रसिद्धेः अतोऽज्ञातार्थपदद्वयं यजिसामानाधिकरण्याद्या
गनामसत्प्रकृताद्भेदकं। विधेयांतराभावेनयागस्यैवविधिप्रतीतेरभ्यासादपिभेद इति चेत्। स्याद्दाक्षायणयाज्ञादेर्गु
णस्यैवफलेविधिः। लोकेगुणवाचित्वेनाप्रसिद्धयोरपि अवयवप्रसिद्धिवाक्यशेषाभ्यां आवृत्तिसहप्रस्थानलक्षणगु
णवाचित्वप्रतीतेस्तयोः प्रकृतयागसंबंधिनोर्दध्यादिवत्फलेविधानमितिनेतत्संज्ञककर्मांतरविधानं प्रकृतहानादि

प्रसंगादिति ४ दर्शपूर्णमासयोः ईषमालभेतेति विहितेषानुवादेन वायव्यं श्वेतमालभेतेत्यत्रारभ्यश्रुतेन श्वेतगुणो वि
२१ धीयते। संबंधसामान्यविहिततद्धितांतेन वायव्यशब्देन वायुसंसृष्टत्वानुवादः भूतिकामपदमपि सार्वकाम्यवाक्यप्राप्त
फलानुवादकं नैवं। फलपरस्य पाक्षिकानुवादत्वापत्तेः दार्शपौर्णमासिकालंभनेयत्वाभावाच्च अतश्वेतद्रव्यालंभमा
त्रंयावदुक्तं फले विधीयते। तथा तत्रैव चतुरो मुष्टीन्निर्वपतीति विहितनिर्वापे सौर्यं चरुं निर्वपेदिति चरुशब्दलक्षिता
स्थाली आधारत्वेन विधीयते द्वितीया च सप्तम्यर्थे। सूर्यशब्देन गौण्या ऽग्न्यनुवादः फलपरं च पूर्ववदनुवादः अत्रापि वा
यावदुक्तं कर्मफलाय विधीयते इति चेत्। नालंभेस्याद्गुणविधिर्वायव्यमिति दार्शिके। दार्शिके आलंभे वायव्यमिति वाक्ये
न श्वेतगुणविधिः तदीयनिर्वापेणे स्थालीविधिरित्यपि द्रष्टव्यं। वायव्यमिति देवतातद्धितेन द्रव्यदेवतयोः संबंधघटी
ज्यात्तदनुपपत्तिकल्पितस्य वायव्येन श्वेतपशुना यजेत भूतिकाम इति फलाय विशिष्टयागस्य विधिसंभवो न देवता
पदवैयर्थ्यं युक्तं। एवं चरुशब्दस्याप्योदने रूढस्य सूर्यदेवतासंबंधे पूर्ववत् सौर्येणचरुणायजेत ब्रह्मवर्चसकाम इत्युभ
यत्र फले विशिष्टयागविधिरिति ५ अग्निहोत्रे वत्समालभेतेति श्रुतेः प्राणिद्रव्यकर्मकालंभमतिसामान्यात् पूर्ववद्या
गविधिरिति चेत्। अग्निहोत्रे विधिर्वत्समालभेतेति संस्कृतेः संस्कृते विधिरिति योजना। आलंभः स्पर्शः स च यागमं २१

तरेणाप्युपपन्नः अतोवन्नसंस्कारार्थः सः अतोवत्सनिकांताहि पशवइति वाक्यशेषोपपत्तिः। अग्निचयनेचरुमुपदधा
तिबृहस्पतेर्वा एतदन्नंयन्नीवाराइतिबृहस्पतिदेवतावर्वोः संबंधकल्पितयागविधिः। उपधानेस्विष्टकृदादिशेषकार्य
प्रत्याम्नानार्थमितिचेत्। चरूपधानवचनेनयागस्यविधायकं। षष्ठ्यादेवतात्वबोधनेऽसामर्थ्यात्तैत्तिरीयकस्यबार्ह
स्पत्योभवतीत्यस्यवर्तमानसरूपत्वाद्धिध्यनपेक्षितस्यवाक्यशेषादग्रहणाच्चचरूपधानंस्थंडिलनिर्वृत्त्यर्थंतया
कृतार्थंचरुकर्मकोपधानेनस्थंडिलंभावयेदितिअतोनयागविधिरिति ७ त्वाष्ट्रंपात्नीवतमालभेतेतिप्रकृतप
पात्नीवतं र्यग्निकृतंपात्नीवतमुत्सृजतीतिश्रुतेपर्यग्निकृतंकुर्यादितिपूर्वस्मात्कर्मांतरंविधीयतेपूर्वयागेपत्नीवत्त्वगुण
स्यत्वष्टुर्देवतात्वात्तद्द्वारापूर्वकर्मप्रत्यभिज्ञानंतद्धितद्वयश्रवणेपिअग्नयेपवमानायेत्यादिवत्परस्परनिय
मात्पूर्वकर्मणिविधेयगुणाभावाच्चनपर्यग्निकृतमुत्सृजतीतिव्यवहितान्वयः पर्यग्निकरणांतांगकलाप
स्यतस्मिन्प्रकृतितएवप्राप्तेरितिचेत् पर्यग्निकृतवाक्यंस्यात्त्वाष्ट्रगुणविधायकं। उत्सृजतिनापूर्वयागम
नूद्य पर्यग्निकरणांतांगकलापोतिदेशात्पूर्वंविधीयतेगृहमेधीयाज्यभागवत्। पात्नीवतपदंतुनित्यानुवा
दइतिनविशिष्टानुवाददोषः अतोनकर्मांतरं ८ योदाभ्यंगृहीत्वासोमाययजतेयांशुंगृह्णातीतिवानारभ्य

श्रुतयोरदाभ्यं यजत इत्यन्वयेन तन्नामकं कर्म विधीयते तच्च भेदकं ज्योतिरादिवत् अंशो तु गृह्णाति सामान्या
२२ दग्निहोमविध्यंते प्राप्ते तदीयद्रव्यदेवतासंगत्या यागो भविष्यति तन्त्रामकग्रहणविधौ विनियोजकाभावा
द्वैयर्थ्यं स्यादिति चेत् ॥ अंश्वदाभ्यग्रहगिरो न यागांतरगोचराः ॥ अदाभ्यं गृह्णीत्वेत्यव्यवधानाद्गुणाकृष्टशक्तिक
त्वाद्विशिष्टविधौ तु गौरवात् अंशो तु यज्यश्रवणाद्यागत्वानिश्चये यजितोऽतिदेशाप्रवृत्तेर्ग्रहणादेवातिदेशप्रवृ
त्तिविकल्पापत्तेः तैत्तिरीयके त तन्नामकग्रहणयो ज्योतिष्टोमे विनियोजकवचनद्वयस्य यस्यैवं विदुषो दाभ्यो
गृह्यते भवत्यात्मना यस्यैवं विदुषोंशुर्गृह्यते ऋध्नोत्येवेति तत्प्रकरणे दर्शितात् ग्रहणनामनी एते न यागनाम
नी १ य एवं विद्वानग्निं चिनुते इत्यनारभ्य श्रुतेऽग्निं कुर्यादिति तन्नामकं कर्म विधीयते चित्तेति परप्रत्य
येन धातुरख्यप्रत्ययानुग्रहार्थः तस्य वा यातोऽग्निमग्निष्टोमेनानुयजतीति वाक्ये अग्निमनु अग्निष्टोमेनय
जतीति यागस्यानुकरणात् अग्नेरपि यागत्वदेवतमनुगच्छतीति वत् तस्मादग्निसंज्ञकयागविधिरिति चे
त् ॥ अग्निं चिनुत इत्यत्राप्येवं संस्कारगो विधिः ॥ अग्निशब्दस्य ज्वलनेऽत्यंतरूढस्य वाक्यभेदादिनामत्वग्राह
काभावे तद्योगाद्वृक्षैरेव चयनं संस्कारो विधीयते चयननिर्वृत्तस्थंडिलस्थापनेन अग्निसंस्कार्यो दिति त २२

स्य चाग्निष्टोमादौ विनियोजकानि अग्निप्रकरणागतानि ग्रयात्वोग्निमग्निष्टोमेनानुयजतीत्यादीनि संस्कृतेग्ना
वग्निष्टोमादिना कुर्यादित्यर्थः तस्मात्संस्कारविधिः १० कुंडपायिनामयनाख्यसंवत्सरसत्रप्रकरण उपसद्भिश्च
रित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यां यजेतेति श्रुते मासमुद्दिश्योपादीयमानमपि कर्मप्राप्तत्वात्र वि
धीयते उद्देश्योपि मासोऽप्राप्तत्वाद्विधीयतेऽविधीयमानस्य च कर्मणो न भेदः अतस्तदनुवादेन मासगुणविधिरि
ति चेत् । मासाग्निहोत्रं नित्यात्तस्माद्भिन्नं प्रकरणांतरात् । अनुपादेयसंबंधस्य विवोऽसन्निधिः प्रकरणांतरं ततो हेतोर्मा
साग्निहोत्रं भिन्नं स्यात् । मासोद्देशेनोपादीयमानं कर्मोऽसन्निधानान्न नित्याग्निहोत्रं तस्यैव सन्निधापकत्वे विधाय
कत्वे च वाक्यभेदः अत एव त्रइष्ट्यापशुनासोमेन वा यजेतेति सन्निधापितस्य सोमावास्यायां पौर्णमास्यां वा यजेते
ति कालोद्देशेन सोमादेर्विधानेपि न कर्मभेदः अग्निहोत्रनाम यद्यपि द्रव्यस्य मुपस्थापयति धात्वर्थं तथापि भावना
यास्तेनानुपस्थापनाद्धात्वर्थस्यापि विधानयोग्यस्य पूर्वापरीभूतस्यानुपस्थापनान्मासगुणकमग्निहोत्रसधर्म
कं कर्मान्तरं विधीयते एवं सारस्वत्या दक्षिणेन तीरेणाग्नेयेन यजेतेत्यत्रापि अनुपादेयं देशोपादीयमानं कर्मान्तरं दंशमुद्दि
आग्नेयशब्दस्य नामत्वाभावाच्च तया सत्रायावगत्यै विश्वजिज्ञायजेतेति सत्रसंकल्पविच्छेदे श्रूयमाणो याएका

ज०टी० हकांडपरितविश्वजितोएवेति ११ आग्नेयमष्टाकपालं निर्वपेद्रुक्कामइतिश्रुतेपि अनुपादेयंफलमुद्दिश्योपादीयमानतक
२३ र्मोसन्निधानात्पूर्ववद्भिन्नं।तथात्रैधातव्यादीक्षणीयेत्यश्वमेधेदीक्षणीयाशब्दलक्षितेदीक्षितसंस्कारेविधीयमानाऽनु
पादेयसंस्कार्यसंबंधात्काम्यत्रैधातव्याघाअसन्निधानाच्चकर्मांतरंप्रकरणांतरमन्यप्रकरणपठितत्वंफलसंस्का
23 र्ययोःकर्मानुवादेनाहवनीयादेरिवविधेयत्वंवेतिशंकापनुत्तयइदमधिकरणंअसन्निधानमात्रस्यैवोपयुक्तत्वा
त्।विधेयस्यागत्वापाताच्चेतितदाह।भिद्येतरुक्कामाग्नेयोदार्शिकाग्नेययागतः।त्रैधातव्येत्यपिद्रष्टव्यं १२ दर्शपूर्ण
मासप्रकरणेसमेदर्शपूर्णमासाभ्यांयजेतपौर्णमास्यांपौर्णमास्यांयजेतेतिश्रुतेर्देशकालोद्देशेनोपादीयमानं स
न्निहितमपिकर्मविधेयमेवेतिविहितस्यविधानायोगात्कर्मांतरमितिचेत्।।सान्निध्याद्देशकालाद्यैर्नकर्मांतरताभवेत्।
सन्निहितत्वेनप्रत्यभिज्ञायमानतपाकर्मनविधीयतेउद्देश्यावपिदेशकालावप्राप्तौविधीयेते।निमित्तमूलसंस्का
रेष्वप्यावज्जीवंदर्शपूर्णमासाभ्यांयजेतदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतशेषात्स्विष्टकृतेसमवद्यतीतिश्रुतानांक
र्मणामेवयद्यपिविधेयत्वंनिमित्तादीनामविधेयत्वात्तथापिनिमित्तादिसंबंधित्वेनपुनर्विधानाउत्पत्तिविधिभेदे
कर्मभेदात्प्रत्यक्षतेचतदभावात्रभेदः अग्नयेस्विष्टकृतेसमवद्यतीतिविहितस्यशेषादितिपुनर्विधानंसंस्कार्यशेषसं २३

वादः तत्रैवेतदनु २

बंधार्थं १३ दर्शपूर्णमासयोः कालद्वययुताग्नेसन्निधौयदाग्नेयोष्टाकपालोमावास्यायांभवतीतिश्रुतेऽभ्यासात्कर्मांत
रविधिः नच कालद्वययुजाग्नेययोरन्यतरस्यायमनुवादे नापरविधानसंभवे विनिगमनाविरहे कर्मांतरस्यैवविधा
नौचित्यादितिदिचेत् कालद्वययुताग्नेयाद्भिद्यतेनैककालयुक् प्रकृतप्रत्यभिज्ञाऽबाधायैंद्राग्नविधिशेषोयमनुवाद
इति १४ इतिलघुवार्त्तिकटीकायांद्वितीयस्यतृतीयःपादः दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिप्रकृत्ययावज्जीव
मितिश्रुतेप्रकरणानुग्रहायकाम्ययागांगतयायावज्जीविकोभ्यासोविधीयतइतिचेत् काम्यात्प्रयोगाद्दर्शादेर्नित्यो
सोप्रविभिद्यते यावज्जीवपदेकाललक्षणायाययजिपदेभ्यासलक्षणायाश्चश्रुतिसंभवेप्रकरणवशादनुपपत्तेः जीव
नेनिमित्तेपुरुषस्यप्रत्यवायपरिहारायकाम्यप्रयोगाद्भिन्नोनित्यःप्रयोगोनियम्यतइतिएकस्यैवप्रयोगभेदः १ शाखाभे
देनश्रुतान्यग्निहोत्रदर्शपूर्णमासादीन्यभ्यासप्रकरणांतरगुणेभ्योभिद्यंतेऐंद्राग्नमेकादशकपालमित्युत्पन्नस्यैंद्राग्नंद्वा
दशकपालमिति शाखांतरश्रुतेनोत्पन्नशिष्टद्रव्यविधानायोगात् अग्निहोत्रादिकं कर्म शाखाभेदान्नभिद्यते अभ्यासादिहे
तुभ्यः कर्मणोविधानमात्रंसिद्धोत्रभेदः विहितस्यविध्ययोगात्कर्मांतरंवाच्यंइहत्वध्येतृभेदेनविहितस्यापितदुपपत्तेः न
भेदकत्वं एकादशकपालद्वादशकपालयोरुत्पत्तिशिष्टयोर्विकल्पः इतिलघुवार्त्तिकटीकायांद्वितीयस्यचतुर्थःपादःस

२५ ५५

माप्तश्चाध्यायः शेषस्वरूपशेषपदप्रवृत्तिनिमित्तविनियोगतत्प्रकारतत्प्रमाणतद्बलाबलादिलक्षणार्थप्रतिज्ञानं। शे
षलक्षणमारभ्यमिति १ शेषपदप्रवृत्तिनिमित्तानि रूपणात्तद्वानुशेषइत्ययुक्तं। तथाहि नव्यापकत्वं शेषत्वं आग्नेया
दीनां परस्परव्यापकत्वे नाति व्यापनात् प्रयोज्यत्वस्य तुषोपवापांगकपाले तदप्रयोज्ये ऽव्यापनात्। प्रधानत्वाभि
मतविधिभिन्नविधिविधेयत्वमपि पूर्ववदतिव्यापकं वित विहितत्वं तदित्यपि ना। प्रधानात्पूर्वं विहितेष्व व्यापनात्। नोप
कारकत्वमपि न तत्प्रधाने ष्वंगानामनुष्ठानोपकारकेषत्ति व्यापनादिति चेत्। पारार्थ्यं शेषतोच्यते। परोद्देशप्रवृत्तव्यापा
रविषयत्वं पारार्थ्यं तच्च शेषत्वमुच्यते विधेरनुद्दिष्टफलेपुरुषाप्रेरणात्। विध्युद्देश्यस्यशेषिणः फलतत्साधनात्य
तरत्वनियमात्। तादृशोद्देश्ये भिधेयस्य श्रुत्यादिना विनियोगात्। विध्यन्यथानुपपत्तिसहकृतं श्रुत्यादि शेषत्वे प्र
माणमिति श्रुत्यादिगम्यं शेषत्वमुच्यते २३ यागफलयोर्नशेषत्वं प्रमाणाभावात्। उपकारकत्वमेव शेषत्वं तच्च द
धिसोमादौ यागजनके प्रत्यक्षं आरुण्यादौ द्रव्यपरिच्छेदे नक्रयोपकारकत्वं अवघाता दौ वैतुष्याद्युपकारजन
कत्वं चा प्रोक्षणादिषु श्रुतिप्रमाणचाम्यं ततत्। यजेत त्यत्र तु एकपदश्रुत्या यागस्य भाव्यत्वावगमात्त्वफलशे
षत्वं फलं तु काम्यमानतनुच्यते ना त्मार्थपरार्थं वेति। तथा स्वर्गकामस्य पुरुषस्यापि न नु शेषत्वमिति चेत्। द्रव्यादि २५

५

वत्कर्मफलपुरुषेषपि सा भवेत्। साशेषता। यदश्रुतेः (प्रत्ययश्रुतेः प्रत्ययश्रुतेः) प्रत्ययश्रुतिर्बलीयस्त्वाद्धि ध्यचितभाव
नायाः पुरुषार्थभाव्यकत्वं पदश्रुत्यानुयागस्य। तत्करणत्वं फलस्य काम्यमानत्वानुपपत्त्या विधिश्रुत्यात्मनेपदेन च
पुरुषशेषत्वं पुरुषस्य तु आख्यातेन क्रियां प्रति कर्तृतया उपादानात् तच्छेषत्वमिति ३ दर्शपूर्णमासयोर्निर्वापप्रोक्षणा
वघातादय औषधस्य उत्पवनादय आज्यस्य शाखाछेदादयः सान्नाय्यस्य धर्माः श्रुतास्ते तत्तत्स्वरूपमात्रार्थत्वे वैय
र्थ्याद् अपूर्वसाधनतां शेषविनियुज्यन्ते फलापूर्वमेव तेषां प्रयोजकं अन्येषामफलत्वात्। ततश्च तत्साधननिवेशि
नो धर्माः सर्वे सर्वत्र स्युः उत्पत्त्यपूर्वाणां प्रयोजकत्वेपि प्रकरणाविशेषात्सर्वाणि सर्वस्य प्रयोजकानीति ध
र्मसंकर इति चेत् अवघाताद्यौषधाद्येषु यथायोगं व्यवस्थितं। अवान्तरापूर्वाणामपि फलापूर्वद्वारा फलवत्त्वात्तत्सं
निहितत्वाच्च धर्माणां दृष्टार्थत्वाय वा चान्तरापूर्वसाधननिवेशिनस्ते तद्द्वारा यथायोगं व्यवतिष्ठन्त इति ४ दर्शपू
र्णमासयोः पञ्चकपालानि विवेत्युपक्रम्य एतानि वै दशयज्ञायुधानीति श्रुतं। तथा स्फ्येनोद्धन्ति कपालेषु श्रपयति
इत्यादि। तत्र आयुधशब्दस्य साधने प्रसिद्धत्वात् यज्ञसाधनतानिगम्यमानानि साक्षाद्दर्शं भवादंगेषु वर्तरंति। प्रविशे
षात्सर्वक्रियासु योग्यतया संबध्यन्ते उद्धननादिश्रवणं त्ववयुत्यानुवाद इति चेत्। स्फ्यादिनोद्धननाद्येवाव

त्नं॰टी॰ हतामुद्धननादिवाक्यानां प्राप्तिकानुवादत्वे नित्यवच्छ्रवणाविरोधात्। विधायकान्येवैतानि। यज्ञायुधवाक्यं
२५ तु यज्ञायुधानि संभरतीति विधिविषयसमर्पकतया प्रयुक्तं। तस्मात्स्फ्यादिभिरुद्धननाद्येव कर्त्तव्यमिति ५
ज्योतिष्टोमेऽरुणया पिंगाक्ष्यैकहायन्या सोमं क्रीणातीति श्रुतेऽरुणाशब्दस्यारुणाधिकरणन्यायादरुणामात्र
वाचकः तस्य चामूर्त्तस्य क्रयेऽयोग्यत्वान्नेतो भंक्त्वा कृत्स्नप्रकरणनिवेशः गुणवाचिप्रातिपदिकेन प्राकरणिका
25 णीकरणद्रव्याणि लक्षणया तत्प्रशक्यार्थो गुणमात्रपरिच्छेदकत्वेन विधीयते येन येन द्रव्येण किंचित्क्रियते तं
न तेनारुणागुणवद्रणकेनेति। ननु क्रय एव द्रव्यलक्षणया निवेशः स्यादिति चेत्। नाश्रुतद्रव्यावच्छेदलक्षितद्र
व्यानन्वयात्। पिंगाक्ष्यैकहायनीशब्दयोर्यौगिकयोर्द्रव्ये शक्तत्वात्। पिंगाक्षीत्वगुणलाभायैकहायन्यामेव तद्ध
त्तेः विशेष्यस्य पदान्तरलब्धतया दंडी प्रैषानिति वत् पिंगाक्षीत्वपरत्वात् विभक्तेः प्राप्तकरणशक्त्यनुवादित्वात्।
पिंगाक्षीत्वस्य द्रव्याश्रितस्य कारकशक्त्यनन्वयात् न चारुणापदे एकहायन्येव लक्ष्यतामिति युक्तं। शक्त्युपात्तस्य
तस्य पूर्वमेव क्रियान्वयात् गुणद्रव्यक्रियाणामेकवाक्यता तत्तया मध्यवर्त्ति द्रव्यमादाय विरुद्धत्रिकद्वयापत्तेश्च।
वाक्यान्तरविहितद्रव्यानुवादेन गुणविधाने नायं दोषः तस्मात्कृत्स्ने प्राकरणिकेऽरुणिमा निविशत इति चेत्। २५

क्रयत्वारुणोगुणः। तृतीयपयोर्क्रकरणत्वं विरुद्धदारव्यातं वेतद्रूपेणगुणः क्रयसाधनत्वयोग्यः तथैव विरुद्धातिद्रव्य
परिच्छेदद्वारासयोर्क्रकरणत्वं विरुद्धदारव्यातं येतद्रूपेणगुणः क्रयसाधनत्वयोग्यः तथैव विरुद्धातिद्रव्यपरिच्छेदेग्यइति
अरुणागुणापरिच्छिन्नेनेत्यर्थोत्संपद्यते द्रव्यमेकवाक्यत्वसंभवेन वाक्याङ्गोयुक्तः अन्यथाऽरुणापदेद्वित्वेद्वयवि
रोधः एकपदे उद्देश्यविधेयसमर्पकत्वं वस्यात्। अतएव विभक्त्याप्राकरणिकद्रव्योपसर्जनकशक्तिलक्षयित्वा
उपसर्जनद्रव्ये गुणविधिरिति निरस्तं। प्रथमभक्तेस्त्यंगे रित्यादावयवभेदेपि तत्रिषे धातुगुणस्य विशेषणानन्वयात्
शान्त्युपसर्जनकद्रव्यलक्षणायामपि प्रथमदोषानिस्तारात्। तस्मात्क्रयभावनायांकारकद्वारा अरुणगुणसंबंधः
द ज्योतिष्टोमेग्रहंसमाष्टीति श्रुतसंमार्गएकस्यैव। एकश्रुतेनेतु पादेयगतसंख्यावत् उद्देश्यगतसंख्यायाअपि विवक्षि
तत्वात् इति चेत्॥ नविवक्षग्रहैकत्वं। ग्रहमात्रिपदिकवाच्यजात्यासंमार्गान्वयाद्धि किलक्षणायांतत्रग्रहयागाभ्यास
जन्माऽपूर्वसाधनविशेषमात्रमविशेषोपलक्ष्यते। संबंधतोल्पात्। तथाच सर्वस्यसंमार्गइति परिच्छेदेऽनपेक्षितापि
धी रिच्छेदिकासंख्यानविवक्ष्यते। विधीयमानापिसाग्रहानरपरिसंख्यार्यास्यात्। एकमिदंवाक्यमप्राप्तसंमार्गप्रापय
तिपरिसंवष्टेवेत्ययुक्तं। तयोरुद्देश्ययोर्द्रव्यसंख्ययोरेकक्रियायाऽवशीकारात्मत्वेकंवाक्यपरिसमाप्तेर्ग्रहंसंमृज्यादेकं

२६ संमृज्यादित्यावृत्तिः स्यादित्यविवक्षितमेकत्वं । तथा ग्रहस्य संमार्जेवैतत्प्रधानं गुणात्ववा । सर्वथावाक्यभेदः स्यादित्युक्त
वाक्यभेदप्रकारा अपि द्रष्टव्याः ७ अत्रैवोदाहरणे संमार्ष्टीत्युक्ते सोमावसेकनिर्हरणादिप्रयोजनः संमार्गः सोम
26 पात्राणामिति निश्चिते कर्मोकांक्षाभावात् अविवक्षितं ग्रहत्वं यागैक्येनापूर्वैक्यात् । तत्साधननिवेशी सः साधनता
विशेषाद्ग्रहेष्विव चमसेष्वपि स्यादिति चेत् ग्रहत्वं तु विवक्षितं । श्रुतकर्मसंबंधस्य वाक्यभेदादिदोषरहितस्य सतिसं
भवेनापि कैकर्मग्रहणायुक्तं । यागाभ्यासापूर्वाणां भिन्नत्वाद्वाच्य ग्रहत्वसंबंधि साधनविशेषो लक्षणीय इति ग्र
हत्वविवक्षायां न चमसेषु संमार्गः ८ वाजपेये सप्तदशारत्निर्वाजपेयस्य यूपो भवतीति श्रुते । व्यवहितसंबंधला
भाय तु ग्रहाय च सप्तदशारत्निर्वाजपेयस्येति संबंधे परिमाणस्य कर्मण्यसंभवोन्नत्संबंधिषोडशिग्रहलक्षणो ध्वेपा
त्रद्वारा संबध्यते । यूपशब्दोपि तस्यैव लक्षकः अन्यथा वाजपेये शब्दे पशुलक्षणा स्यात् सा च प्रधानप्रकरणभंगात्
मुख्यबाधाच्चायुक्ता । यूपशब्दलक्षणा तु जघन्यानदोषायेति चेत् । सामदश्वमत्लीनापश्वंगं यूपगामिसत्ता । वाजपे
यस्य यूपः सप्तदशारत्निरिति संबंधः पस्पर्थो वाजपेययूपयोः पशुयागद्वारको पकार्योपकारकत्वलक्षणः परं
परासंबंधः देवदत्तस्य नप्तेतिवत् । तथा च न कस्यापि श्रुतित्यागः अन्यथा सन्निधिप्रकरणयोरनुग्रहाय यूप २६

श्रुतिबाधः स्यात्। वाजपेयपदं तु नित्यानुवादः प्रकरणादेव तत्संबंधीपूयइत्यवगमात्। अतएव तैत्तिरीयाः सप्तदशा
रत्निपूर्णो भवतीति पठंति १ दार्शपौर्णमासिकप्रयाजसमीपेऽभिक्रामं जुहोतीति श्रुतमभिक्रमणांगमनूत्रैस
न्निहितप्रयाजहोमकारकानर्हं सत् ततो विच्छिन्नं प्रयाजादिवत्स्वकरणानांगत्वेन गृहीतं सामर्थ्यात्कर्तृसंस्कारद्वा
रकं सत्कर्तुः प्रयोगांगत्वात्तद्वारा कृत्स्नप्रयोगे निविशते। नचामूर्त्तस्य कर्तृद्वाराऽऽरुपवत्प्रयाजनिवेश इति यु
क्तं आख्यातेन कर्तुरनभिधानादिति। नैवं अनभिहितोप्याख्यातात्प्रतीयत इति तद्द्वारा प्रयाजांगमभिक्रमण
मिति भाष्यकारः। वार्त्तिके तु क्रियासमभिहारविहितसामुत्वं तस्याभिक्राममित्यस्य जुहोतेर्विच्छेदशंकाभावा
त्पूर्वपक्षानुत्थानमित्यन्यथा वार्णितं होमानुवादेन विधीयमानमभिक्रमणं प्राकरणिके सर्वहोमानां बुद्धिस्थ
तयोप्रयाजहोमसन्निधिमनाहत्य सर्वहोमांगं। नचावांतरप्रकरणेन प्रयाजांगत्वं शंक्यं। फलवद्भावनोद्भूतकथं
भावाकांक्षालक्षणस्य निःफलप्रयाजादिष्वभावात्। भावे वा परस्परांगत्वं सर्वेषामंगानां प्रसज्येत। अतो महा
प्रकरणेन दर्शपूर्णमासप्रयोगसंबंधि सर्वहोमांगं तदिति चेत्।। अभिक्रमः प्रयाजांगं। प्रयाजान्विधाय समानय
न उपभृत इत्यादिना प्रयाजधर्मान्विधाय अभिक्रामं जुहोतीत्युपक्रम्य प्रयाजानिष्ट्वा हवींष्यभिघारयतीत्यंत

२७ प्रणाजपरामर्शात्तावदंतं प्रयाजावांतरप्रकरणमित्यवगमात्तन्मध्यपतितमभिक्रमणं तेषामेवांगं अंगभावनानां प्रधा
नोपकारभाव्यकानां कथंभावाकांक्षत्वेपि अवांतरप्रकरणं भून्येषु परस्परांगत्वे मानाभावात्। आवमानादिसा
मान्यांगैर्वाचनिकैस्तत्तदंगैश्चतन्त्रत्वं गुणानामिति महाप्रकरणेन सर्वाणि प्रधानगान्येव १० दर्शपूर्णमासयोः
पंचदश सामिधेनीरन्वाहेति सामिधेनीर्विधाय ता सांचत्तिः प्रथमामचाहेत्यादिना गुणान् विधाय निविदोना
ममंत्रावेदेवेद्धो मन्विद्ध इत्यादयो विहिताः ततः काम्यसामिधेनीकल्याः एकविंशतिमनुब्रूयात्प्रतिष्ठाम स्येत का
बमादयः तदनंतरं यज्ञोपवीतमाम्नातं उपव्ययते इति। तदनंतरमपि सामिधेनानामेव वाचनिकां गुणान् विधास्य
तेंतरा नूच्यमित्यादयः तत्र पूर्ववदवांतरप्रकरणेन सामिधेन्यंगमुपवीतं निविदोपि वाचनिकाः गसंदष्टत्वा
त्सामिधेन्यंगं काम्यसंख्या विधावप्यग्रपतयानुवर्त्तनादनुवचनानामिति चेत्। इष्यंगमुपवीतकं। महाप्र
करणात्। निविदां तिंगादग्निसमिधनार्थतया प्रकरणेन सामिधेन्यंगत्वायोगेनाऽसंबंधिपदव्यवधा
नेऽवांतरप्रकरणानुत्थानात्। निविदां तु नावांतरप्रकरणानवासन्निधानमपीति न तदंगत्वाशंका। काम्या
नुवचनानां नित्यानुवचनप्रकृतिकतयातिदेशप्राप्तैस्तदंगैरेव नैराकांक्ष्यात् नोपवीतग्राहित्वं निविद्व २७

हितत्तित्यानुवचनस्याश्रयत्वायोगेन संख्यामात्रस्यफलेविध्यसंभवेऽनुवचनांतरस्यैव संख्याविशिष्टस्यवि
धेयत्वात्। अंतरानूच्यमितिविधास्यमानगुणानांदुरस्यानुवादेनयाज्यादिसाधारण्येनानुवचनत्वावच्छिन्ने
वाविधानमितिनततः सामिधेनीप्रकरणानुवृत्तिशंकाऽतोदर्शपूर्णमासांगमुयवीत ११ आधानप्रकरणेवा
रणोवैकंकतादीनि यज्ञपात्राणिवारणोयज्ञावचरोवैकंकतोयज्ञावचरइतिविहितानि तित्रैवप्रदेशांतरेपवमा
नेष्टयोप्याम्नाताः अग्नयेपवमानायेत्याद्याः तत्रपात्राणिपवमानेष्टिसंगानि अग्निसंस्कारतयाविहिताधान
स्यसफलतयाऽफलानांपवमानहविषाधानांगत्वात्। पात्राणामपिप्रकरणेनाधानसंबद्धानामानर्थक्यतदं
गन्यायेनतदंगभूतपवमानहोमेष्ववतारादिजिचेत्। पात्राणिसर्वयज्ञांगं। अनारभ्याधीतवाक्यानिरेकेणा
धानप्रकरणेपवमानेष्टिसन्निधौयदाहवनीयेजुहोतीतिवाक्यमस्ति। तत्रसप्तमीतप्रेपयसीतिवत् द्वितीया
र्थे। तथाचहोमेनाहवनीयंभावयेदितिपवमानहोमानामप्यर्थतयानर्थक्यतदंगन्यायाभावेवाक्यात्स
र्वयज्ञांगानीतिभाष्यं। वार्त्तिकेतुपवमानहविषामाधानार्थत्वेप्याधानप्रकरणभंगेनयज्ञावचरइतिवाक्येनानु
नुवाद्यसर्वयागापूर्वार्थतयाविधीयमानानिपात्राणिनपवमानयात्रविषयाणि। अनुवादस्यत्राहिभिर्यजे

ल०टी० तेष्वादिवत्सन्निहितगामित्वेपि पवमानयागानां पात्रसंनिध्यभावेन पद्मश्रुतेः सर्वयागविषयत्वात् अतो नास्या
२८ धिकरणस्यापेक्षेत्युक्तं तदाह । वार्त्तिके नास्त्ययं नय इति १२ दर्शपूर्णमासयोराग्नेयसौम्याज्यभागक्रमे वृत्रघ्न
पद्वद्गृह्यमाम्नातं तयोरेकाग्नेयी अपरा सोमी तथा वृधन्वत्पदवद्गृह्यं तयोरप्येकाग्नेयी अपरा सोमी तत्रापरं वच
28 नं वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति । तत्र पौर्णमास्यमावास्याशब्दाभ्यां प्रधानत्रिक
द्वयमनूद्याज्यभागक्रमोद्दिष्टियप्रधानांगत्वेन क्रतुद्वयं विधीयत इति चेत् । स्याद्वार्त्रघ्नीवृधन्वत्योः कालभे
दाद्व्यवस्थितिः वार्त्रघ्नीवृधन्वतीयुगलयोर्लिंगक्रमाभ्यां पर्वणोराज्यभागयोरव्यवस्थयाप्राप्तयोः पौर्णमास्यमावा
स्याकालभेदाद्व्यवस्थास्यात् । पौर्णमास्यमावास्याशब्दो लक्षणीयत्रिकद्वयपरित्यागेन कालेवर्त्तेते । कालस्यमं
त्रानपेक्षत्वेपि तदीयाज्यभागयोस्तद्द्वारा मंत्रव्यवस्था फलिष्यति अन्यथा प्रधानेषु सोमयुगलस्यात्यंतासामर्थ्यं
स्यात् तेषु सोमदेवताऽभावात् वार्त्रघ्नीभ्यां पौर्णमासीं भावयेदित्यादिक्रमेणाविभक्त्यर्थलक्षणया वाक्यीयविनि
योगस्य लिंगाद्दुर्बलत्वादिति १३ दर्शपूर्णमासयोः हस्तावनेनिक्तेउलपराजीस्तृणातीति । ज्योतिष्टोमे मुष्टी
करोति वाचंयच्छति दीक्षितमावेदयतीति श्रुतं तत्र हस्तावनेजमुष्टीकरणवाग्यमानां हस्तादिसंस्कारद्वारानंत २८

योदुल्पराज्यास्तरणादीक्षितावेदनयोरंगत्वमितिचेत्। कर्त्तव्यसर्वकर्मांगंहस्तादेरवनेजनं। आदिपदसवनेजन
पदेपियोज्यं। हस्तादेरवनेजनादि। लिंगप्रकरणाभ्यां सन्निधिवाधेन कर्त्तव्यसर्वकर्मांगं १४ दर्शपूर्णमासयोरा
ग्नेयं चतुर्द्धाकरोतीति श्रुतं चतुर्द्धाकरणं आग्नेयैंद्राग्नाग्नीषोमीयाणां स्यात्। अग्निसंबंधाविशेषात्। सर्वत्राग्निकलि
भ्यां ठगिति संबंधसामान्येढक्स्मरणात् देवताबंधमपि स्याद्धाभ्यां दीयमानस्येकस्मात् अपि दानादितिचेत्। आग्नेयस्ये
वहविषश्चतुर्द्धाकरणं भवेत्। नतावदग्नीषोमीयादेराग्नेयत्वं सापेक्षे तद्धितवृत्त्ययोगात्चतुर्द्धाकरणलक्षणार्थमा
ग्नेयपदं पूर्वप्रसिद्धिमालोचयद्विधिवाक्यावगतदेवतात्वसंबंधमेववक्तिनानवगतं संबंधसामान्यमिति आ
ग्नेयस्यैवचतुर्द्धाकरणं। अतएव प्रथममपि पुरोडाशं चतुर्द्धाकरोतीति वाक्यं जातेरयोग्यत्वात्पुरोडाशपदेन लक्षणा
या यौगिकाग्नेयपदोक्ताव्यक्तिमेवगमयतीति तस्यैव चतुर्द्धाकरणमिति १५ इति लघुवार्त्तिकटीकायां तृतीयस्य
प्रथमः पादः॥ ॥मंत्राणां प्रयोगसमवाय्यर्थस्मारणेनोपकारकत्वं मंत्राधिकरणसिद्धं गौणमुख्यार्थसाधारणं
।अन्योपस्थित्यपेक्षणपदोपस्थाप्यो मुख्यः अन्योपस्थित्यपेक्षपदोपस्थाप्यो मुख्यः॥ अन्येतो तद्गतसादृश्येन प्रती
यमानो गौणः। तदुभयस्मारणसामर्थ्यं मंत्रेस्ति तयोश्च स्मारकापेक्षे तु प्रतिप्रधानगुणावृत्तिन्यायेनोभयत्रापि

ल०टी० मंत्रविनियोगइतिचेत्मंत्राणांमुख्यएवार्थेविनियोगंप्रवर्त्तते।गौणोसदपिसामर्थ्यमन्यासापेक्षतयाविलंबितप्रती
२९ तिकंतन्नात्यर्यकत्वमपि।अग्निशब्दाज्वलनप्रतीतिवत्।माणवकस्यपदांतरसमभिव्याहारंविनाऽप्रतीतेस्त
थावानपेक्षप्रथममावगतमुख्यशेषतयाकृतार्थोमंत्रोनान्यत्रगच्छति।अर्थोपिगौणोध्यानादिनापिसमुत्पद्यतेनै
29 मंत्रमाकांक्षतीतिमुख्यएवविनियोगः १ अग्निचयनेनिवेशनःसंगमनइत्यैंद्र्यागार्हपत्यमुपतिष्ठतइत्यत्रमं
त्रेइंद्रप्रकाशनसामर्थ्यस्यस्फुटत्वादसमर्थस्यगार्हपत्येविनियोगायोगात्।मंत्रमुख्यार्थत्वानुरोधेनगार्हप
त्यशब्दस्ययागसाधनत्वगुणयोगादग्नेपतेर्यजमानस्यापिमित्यवयवशक्त्यावाइंद्रएववर्तनंद्वितीयपासमर्थ्य
र्थंलक्षयित्वागार्हपत्येछित्वेतिवाउयान्मंत्रकरणादितिविहितात्मनेयदनुमिताभिधानक्रियायांसामर्थ्यादिं
द्रसंबद्धतद्धि द्विशेषणोपस्थानक्रियायांवागार्हपत्यःसंबंधनीयःगार्हपत्यमुपैत्यैंद्र्योमभिदध्यादितिक्रमेणब्रा
ह्मणंनेयमतोमुख्यएवमंत्राणांविनियोगइतिचेत्।विनियोगस्तुवचनादैंद्र्यावेगार्हपत्यके।गौणोसामर्थ्यंता
र्य त्यंचान्यसापेक्षतयाविलंबितप्रतीतिकमित्युक्तंपूर्वाधिकरणे।तदिहविनियोजकेब्राह्मणस्यविधित्वप्र
धानत्वात्प्राप्तार्थत्वैर्हेतुभिर्मुख्यार्थत्वंतद्विहीतस्यमंत्रस्यब्राह्मणवैशेनैवजघन्यार्थत्वएवंचवचनात्गौ २९

णोऽपि विनियोग इति गार्हपत्यार्थो मंत्रः २ दर्शपूर्णमासयोः हविष्कृदेहीति त्रिरवघ्नन्समाह्वयतीति श्रुते पूर्ववद्ब्राह्म
णस्य मुख्यार्थत्वानुरोधात् हविष्कृदेहीति त्रिरवहंतीत्यत्र यः आह्वानिरपि अवयाते गौणो जघन्यत्वात् अन्यथा मुख्
ख्यावघातपदस्य काललक्षकता स्यात् त्रिरिति मंत्रपाठप्राप्तानुवादः अतोऽवघातांगं मंत्र इति चेत् । हविष्कृदेहि मंत्रस्यना
वयातांगता भवेत् । हविष्कृदेहीत्याह्वयतीति लिंगविनियोगप्राप्तमंत्राह्वानसंबंधानुवादे न त्रिरित्ये नियमप्राप्तं त्रित्वं नि
यम्यते मंत्रपाठे क्वचित्सकृत्क्वचिद्द्विः क्वचित्त्रिरित्यनियमात् हंतिस्तु सहायाह्वानस्य तत्कालत्वप्राप्तेः तद्धन्तरणार्थो नित्यानु
वादः इति करणविनियोगो वाक्याल्लिंगाद्दुर्बल इत्याह्वान एव मंत्रः ३ ज्योतिष्टोमे उत्तिष्ठन्नाह अग्नीच्चिहरेति । तथा
व्रतं कृणुतेति वाचं विसृजतीति श्रुते अग्नीदिति मंत्र उत्थाने अग्नं व्रतं कृणुतेति वाग्विसर्गे वचनवशादिति चेत् । तथा विसर्ज
नोत्थाने जतमग्नीदिति द्वयोः । विसर्जनोत्थान इति द्वंद्वैकवद्भावेन पुंसकं सप्तम्येकवचनं व्रतमग्नीदिति द्वयोः मंत्रयोः त
थानांगत्वमित्यर्थः पूर्ववदेकवाक्यविनियोगस्य लिंगविरोधेन बाधात् लिंगप्राप्तविनियोगानुवादेन उत्थानकालो वाग्वि
सर्गकालस्त्वप्राप्तो विधीयते ४ दर्शपूर्णमासयोः सूक्तवाकेन प्रस्तरं प्रहरतीत्यत्र सूक्तवाकपठनकाले प्रस्तरं प्रहरती
ति प्राप्तप्रहरणानुवादेन कालविधिः । इष्टदेवताप्रकाशनेन कृतार्थस्य सूक्तवाकस्य तु धारणादि विनियुक्तप्रस्तरस्य

त०टी० चप्रयोजनानपेक्षत्वाद्देवताविधायिमंत्रस्यतदनपेक्षप्रहरणेऽसामर्थ्याच्च।अतोदर्शपूर्णमासाभ्यामिष्ट्वासोमेनय
३० जेतेतिवत्कालार्थःसंयोगइतिचेत्।अंगतासूक्तकस्यप्रस्तरप्रहरणेनोमता।सूक्तवाकेनेतितृतीयाश्रुत्याहृतप्र
योजनस्यापिप्रहरणांगत्वबोधात्।श्रुतिविनियुक्तस्यस्वार्थसमवायकल्पकतयाइष्टदेवतानांप्रस्तरस्यचप्रह
30 हरणद्वारासंबंधेमतितत्त्यागपूर्वकोहोमोभविष्यतीतिप्रकरणांगंसूक्तवाकः ५ सूक्तवाकशब्दस्यकृत्स्नानु
वाकवचनत्वे।नाध्येतप्रसिद्धेःकृत्स्नविनियोगेसतिएकदेशनिष्कर्षेश्रुतिबाधापत्तेरनिष्टदेवतावाचिपद
नामदृष्टार्थत्वेनापिप्रयोगोपपत्तेःप्रधानावृत्तावंगावृत्तिन्यायेनपर्वद्वयेपिसंपूर्णसूक्तवाकप्रयोगइतिचेत्तन्न
स्यपर्वद्वयेलिंगाद्भिन्नस्यविनियोजनंभवेदेवंयदिसूक्तवाकशब्दोनुवाकेरूढःस्यात्।सुष्टुकंवक्तीत्येवयवप्र
सिद्धौप्रोक्तगौणशब्दइवरूढ्यकल्पनात्।तथाचपस्मिन्प्रयोगेयावत्योदेवताइष्टास्तन्मात्राशस्यनिष्कृष्यप्रयोगः
।अन्यथाहृतसूक्तवाकतास्यादिति ६ ऐंद्राग्नमेकादशकपालमित्यनारभ्यकाम्येष्टयःक्रमेणसमाम्नाताःआध्व
र्यवेतेनैवलिंगक्रमेणकाम्ययाज्यानुवाक्याकांडेसमाम्नातमिंद्राग्नीरोचनादिवइत्यादिहौत्रेसमाम्नातंतत
त्रयाज्यादिमंत्राअध्ययनविध्यध्यायिताःप्रयोजनाकांक्षिणःस्वप्रकाश्यदेवताद्वारातद्देवताकत्वपूर्व ३०

मुपस्थापयंतः क्रमसमाख्ये बाधित्वा लिंगात्तद्दैवत्यकर्ममात्रांगानीत्यैंद्र्याग्न्यादि कर्ममात्रे विनियोग इति चेत् । क्रमाद्याज्या
नुवाक्यानामैंद्राग्न्यादिषु संगतिः । भवदेवं यदि मंत्रप्रकाश्यदेवताया जुष्टादिवत्क्रत्वव्यभिचारः स्यात् । न त्वेतदस्तींद्रा
दीनां मंत्रार्थवादादावन्यत्रापि विनियोगप्रतीतेः । अतः क्रत्वपूर्वोपस्थापक क्रमसमाख्यानुरोधेन काम्येष्टिष्वेव
विनियोगः । यत्र लिंगमात्रस्य क्रत्वव्यभिचारस्तत्र केवलाल्लिंगादपि यथा क्रतुज्ञातस्य क्रत्वनुष्ठाने स्वर्गादि
फलककर्मणो शरीरातिरिक्तात्मज्ञानस्येति ७ ज्योतिष्टोमे आग्नेय्यक्षः अग्न आयाहि वीतय इत्याद्याः
पठिताः स्तोत्रादौ विनियुक्तास्ततः प्रदेशांतरे आग्नेय्याग्नीध्रमुपतिष्ठत इति श्रुतेस्तत्र प्रकृताभिरप्रकृताभिर्वा आ
ग्नीध्राग्निरुपस्थेयः । अग्निर्देवताऽस्याः साग्नेयीत्यवयवयोगस्योभयसाधारणत्वात् । सा वैश्वदेवीत्यत्र तद्धितांतर्गत
सर्वनाम्नात प्रपयसः सन्निधानात् परामर्शनं युक्तं नात्र कस्याश्चित्तथा सन्निधानमस्ति । सत्वेपि वा तस्य स्तोत्रार्थत्वेन
चरितार्थतया ऋचां नैराकांक्ष्यात् । ऋगनुवादेन देवताविधौ हि अनुवादस्य सन्निहितगामितयाऽन्यार्थसन्निधानमपि उ
पयुज्येत उपादीयते त्वाग्नेय्याग्नेय्याग्नीध्रोपस्थानं प्रति तत्र वचनप्रकृतग्रहणनियमः प्रकरणात्तद्ग्रहणे श्रुतिजनिता
विशेषप्रत्ययबाधः स्यात् तस्माद्यया कयाचिदुपस्थानमिति चेत् । आग्नेय्या प्रकृतैव स्यादाग्नेयरूपस्थितेः । आग्नीध्रोप

१२

ता०टी० स्थाने प्रकृतक्रत्वपूर्वव्यापाररूपत्वमाग्नीध्रोपस्थानात्मकत्वे चेत्यस्ति रूपद्वयं तद्द्वयमपि शास्त्रादेव ज्ञातव्यं तयोः परस्प
३१ रव्याप्यभावेनैकेन विहितेनेतरानाक्षेपात्। तत्र प्रकृतग्रहणोक्रमचःप्रकरणपाठानुपपत्त्या प्रकृतक्रत्वपूर्वव्यापारसाध
नत्वावगतौ वतेन विधिना अपेक्षितविशेषरूपमात्रं लाघवाद्विधीयते अप्रकृतग्रहणे तु रूपद्वयमप्यनेनैव विधाव्य
31 मिति गौरवं। यद्यप्येवं धात्वादिभिः प्रकरणादपूर्वसाधनव्यापारात्मकत्वं अप्रकृतग्रहणेऽपि स्यात्तथापि तस्य वा
क्यादिकल्पनाप्रमाणत्वाच्छ्रुतिकल्पनया तादृशव्यापारात्मकत्वबोधकत्वमात्रं स्यात् न तु विधायकत्वं अस्यैव
तूभयरूपविधायकत्वमिति गौरवं। एतदप्यंगीक्रियेत यद्यन्यागतिरेव धात्वादिभिर्वचनस्यात् प्रकृतग्रहणे नैवगति
संभवादिति स्तोत्रविनियोगमनाम्नोच्याम्नातरूपमात्रस्य प्रकृतस्यैव मंत्रस्य ग्रहणमिति ८ सोमे भक्षमंत्रः श्रूयते
।भक्षेहिमाविशेत्यादिरनुवाकः तत्र कश्चिदंशो भक्षं प्रतिपादयति केचिदंशा ग्रहणावेक्षणसम्यग्जरणादिप्रका
शकाः तत्र भक्षानुवाकसमाख्यया कृत्स्नस्य भक्षणे विनियोगः ननु ग्रहणादिप्रकाशकानां लिंगेन समाख्याबाधि
त्वात्तेष्वेव विनियोगः स्यात् स्यात् नस्यात्। अप्रचोदितानां तेषां भक्षत्वर्थे तयातत्प्रकाशकमंत्राणामपूर्वासंबंधेना
नर्थक्यापत्त्या लिंगस्याविनियोजकत्वे निर्विघ्नं समाख्या भक्षांगतां गमयति विशिष्टभक्षणप्रकाशने चास्ति साम ३१

र्थे गृहीत्वा वेदस्य सम्यग्जरणाय भक्षयामीति तस्मात् वाक्यसमाख्याभ्यां कृत्स्नस्य भक्षे विनियोग इति चेत्। लिंगेन भ
क्षानुवाकस्य विभज्य विनियोजनं॥ न तावद् ग्रहणादेरवोदनाचोदितभक्षानुपपत्तिकल्प्यस्यापि तेनैव विधिना
चोदितत्वात् तादृशभक्षद्वारा तेषामपि कृत्स्नपूर्वसंबंधात् तेषां वा स्मृतानामननुष्ठेयतया वाक्यसमाख्ये बाधित्वा लिं
गाद्विभज्य विनियोगः सम्यग्जरणामपि विहितभक्षांगतया आसनविशेषादिनानुष्ठेयमिति॥ ९ अत्रैव वाग्जुषा
णः सोमस्य तृप्यत्वित्यंशस्य तृप्तिप्रकाशकस्य पूर्ववत् तत्रैव विनियोग इति चेत्। मंद्राभिभूतिरित्यादेस्तत्र ह्यो विनियोज्य
नात् तस्याननुनिष्पादित्वेन पुरुषेणाननुष्ठेयतया स्मारकापेक्षाभावात् विशिष्टभक्षप्रकाशनेन भक्षप्रकाशकांशैक
वाक्यतया तत्रैव विनियोगः॥ १० भक्षमंत्रे इंद्रपीतस्येति श्रूयते। तत्र इंद्रेण पीतस्येति तत्पुरुषः सोमविशेषणाद् इंद्रपीत
स्य ते भक्षयामीति पीतपदस्यार्थलाभात् न बसमासस्येति सूत्रेणान्तोदात्तत्वप्राप्त्याऽध्ययनप्रसिद्धस्वरविरोधः। तृती
या कर्मणि। कर्मवाचके क्तान्ते तृतीयान्तं प्रकृत्या इत्यनेनाद्युदात्तत्वसिद्धेः न बहुव्रीहिः सवनविशेषणं पदद्वये
प्यन्यपदार्थलक्षणापत्तेः तथा चानैन्द्रप्रदानेभ्योऽसमर्थो मंत्रो व्यावर्तेत इति निर्मंत्रको भक्षः यद्यपि यागे कोपित
द्भासानां भिन्नत्वेनैन्द्रायत्वा वसुमत इत्यादिमंत्राणामैन्द्रप्रदानविषयतया तद्दृशां सोमाभिषवादीनामपि तद्विष

ल॰टी॰ पतयास धर्मकैंद्रप्रदानविकारा अन्यो ऽधर्मकाग्रहास्ततो धर्मो नाद्रंति। ततश्चैंद्रपीतस्येत्यस्य तत्तद्देवतापर ऊह इति
३२ चेत्। अनैंद्रेष्विंद्रपीतस्य नैवोह विनिवर्त्तते। इंद्रपातस्येत्यस्य नावमिकन्यायेनेंद्रायदत्तस्येत्यर्थः। नच स्वरविरो
धः। क्ते च चतुर्थीत्वनुवर्त्तते परे चतुर्थ्यंतं प्रकृत्या इत्यनेनाद्युदात्तत्वसिद्धेः नच भक्षणार्थोद्भूतस्य। तस्मेदत्तत्वाद्भूता
32 द्भूतसमुदायस्यैवतत्त्वात्। तथा च पदद्वयलक्षणातौल्ये ऽन्येषामपि मंत्रवत्वापवहुव्रीहिरेवा। शक्तिरेववा बहुव्री
हिसमासेनापि प्रकृतिविकृतिभावः प्रदानानां सोमेन यजेतेति लताविशिष्टतया विहितस्यैवाभ्यासत्वेन तत्संस्का
राणामपि सर्वग्रहयागाभ्यासेषु समानविधानत्वात्। इंद्रलिंगानांमानग्रहणादिमंत्राणामेवानैंद्रेभ्यो व्यावर्त्तना
त्। तस्मात्सर्वग्रहाणां यथाश्रुतमंत्रवत् भक्षणं ११ द्वितीयपूर्वपक्षे स्थित्वा विचार्यते। ऐंद्रेषु मैत्रावरुणादिच
मसेषु हुतेषु भक्षितेषु सशेषेषु नरभ्युन्नायमित्रावरुणादिभ्यो हुभक्ष्यते तत्रैंद्रो नो पलक्षणाय। अभ्युन्नयनकाले
देवताया अनिर्द्देशेन पूर्वशेषसहितस्यैवाकृत्वा चिंतास्फोरणाय। उन्नयनकाले तस्या ऽनिर्द्देशोपि तस्य कारि
ष्यमाणयागार्थत्वस्य स्फुटत्वात् पूर्वशेषस्येतत्वेमानाभावादनिवृत्तसंबंधइंद्रोप्युपलक्षणीयः १२ ऐंद्रवाय
वायवादीनां शेषा आदित्यस्थालीमागत्य तत आग्रयणस्थालीमागच्छंति। आग्रयणाच्चयाल्लीवतग्रहः याली ३२

वतमाग्रयणाद्गृह्णातीति वचनात्। तस्मिन्पात्नीवतभक्षे इंद्रवाय्वादयोप्युपलक्षणीयाः शेषसंसर्गात्पूर्वकालानसे
वयात्नीवतत्वेन तत्संसृष्टशेषे पूर्वदेवतासंबंधानपायादिति चेत्। पात्नीवतग्रहे नेंद्रवाय्वाद्युपलक्षणं। पात्नीवत ५
शेषभक्षणे इंद्रवाय्वादयो नोपलक्षणीयाः आग्रयणाद्गृह्यमाणे पात्नीवतत्वनिर्देशेन शेषस्यापि तत्ता गृह्यमाणात
पाद्यात्नीवतत्वेन पूर्वसंबंधापायात् १३ पात्नीवत एवाध्वर्यवो होममंत्रः अग्ना३इ पत्नीवाः सजूर्देवेन त्वष्ट्रा सो
मं पिब स्वाहेति तत्र मंत्रात्त्वष्टुरपि पातृत्वेन देवतात्वप्रतीतेः सोप्युपलक्षणीय इति चेत्। न त्वष्ट्रा। त्वष्टा नोपल
क्षणीयः। सहभावस्य कार्यान्वयेपि सहैव दृष्टाभिरित्यादौ दृष्टेः पानस्य चाप्रमाणकत्वात् उत्पत्तिवाक्ये पत्नीवत ए
वतद्धितेन निरपेक्षस्य देवतात्वाभिधानान्मंत्रतस्तस्य प्राबल्यात् १४ तत्रैव याज्यामंत्रः। एभिरग्ने सरथं याह्यर्वाङ्
नानारथं वा विभवो ह्यश्वाः। पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्वेति तत्र पत्नीवत्त्रयस्त्रिंशत्स्वेतु
पलक्षणीयां। तेषां माद्यत्वश्रवणेन पत्नीवद्विशेषणकत्वेन वडुत्पन्नो पत्नीवतो देवतात्वस्येति बहुवचनवृत्तिः
प्रमाणावशादिति चेत्। तत्र त्रयस्त्रिंशतामग्नेः स्वद्रव्येण मादयितृत्वप्रतीतेस्तस्यैव देवतात्वं त्रयस्त्रिंशतां
पत्नीवत्वेपि यजमानदत्वेन मादयित्वाश्रवणेनोत्पन्नो बहुवचनं तत्प्रतीमानाभावात्। पत्नीवतोऽग्नेरेव देव

ल०टी० तात्वमितितस्यैवोपलक्षणं १५ सोमस्याग्नेवीहीतिमंत्रवर्णादनुवषट्कारदेवताऽग्निरुपलक्षणाय इतिचेत् न
३३ देवोवषट्कृतेःप्रकृतोसानोपलब्धिर्नेतीहापिनोपलक्षणाय १६ अमंत्रकभक्षणपूर्वपक्षे स्थित्वाचिंता। ऐंद्रा
ग्नशेषभक्षः समंत्रः समासोपरितद्धितात्समुदितस्यदेवतात्वेनयजमानसंकल्पोद्देश्यत्वेपिमंत्रावगतपानेनिर
33 पेक्षत्वसंभवादितिचेत्। निवृत्तिर्यद्यनैंद्रेभ्यः स्तदैंद्राग्नममंत्रकं। यदीतिकृत्वाचिंतेत्यर्थः। देवताधिकरणन्या
याच्चिबतेदनिलक्षकतयातस्यैवसमुदितविषयत्वेनेंद्रेणाव्यपदेश्या अनर्हत्वादमंत्रकमैंद्राग्नभक्षणं १७
तत्रैवगायत्रछंदसइतिश्रुतेबहुव्रीहेः सोमप्रदानप्रधानत्वात्छंदस्कमंत्रमात्रवतिप्रदानेमंत्रइतिचेत् गा
यत्रछंदसइतिस्याछंदोंतरवत्यपितात्कृतुपदानाप्रसिद्ध्यात छंदस्कमंत्रवत्तामात्रेणासर्वत्रप्रदानेभक्षमाणे
भवतिगायत्रछंदसइति १८॥ ॥इतिलघुवार्त्तिकटीकायांतृतीयाध्यायस्यद्वितीयःपादः॥

ज्योतिष्टोमे प्रजापतिरकामयतेत्युपक्रम्य अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्युक्त्वोच्यते। उच्चैर्ऋचा क्रिय
ते उपांशु यजुषा उच्चैः साम्नेति तत्रोच्चैस्त्वादिकं मंत्रस्यैव धर्मो न तु वेदस्य उपसंहारगतस्यापि ऋगादिशब्दस्याप्राप्तविषयप्रधा
नविधिश्रुतिशब्दगतत्वेन प्राबल्यात् उपक्रमगतस्यापि वेदशब्दस्य तद्विपरीततया दौर्बल्यात् अतः ऋग्जातीयस्मिन्कस्मिं
श्चिद्वेदे स्थितः उच्चैः प्रयोक्तव्यः एवमन्येपि मंत्रा इति चेत्। उच्चैस्त्वाद्या वेदधर्माः स्युरुपक्रमगौरवात्। अर्थवादगतोपि
वेदशब्दोऽनुपसंजातविरोधित्वात् उपसंजातविरोधिनमृगादिशब्दं मुख्यार्थात्प्रच्याव्य वेदे लाक्षणिकत्वं नयति उप
क्रम एवैतदवगतं प्रजापतिसृष्टाग्न्यादिदृष्टत्वेन वेदानां स्तवनात्तत्संबंधि किंचिद्विधित्सितमिति तद्विशेषमात्रं
विधितः प्राप्तव्यमिति प्राप्तार्थमृगादिपदं लक्षणां सहते। अन्यथोपक्रमोपसंहारयोरेकवाक्यत्वायोगादिति। ऋग्वेद
विहितं कर्मोच्चैः कर्तव्यमित्यादिक्रमेण वेदधर्माः स्वरविशेषाः॥१॥ याजुर्वेदिकस्य प्रधानस्य सामवेदे वारवे देवार
वंतीयं गायतीत्याद्यंगविधिः तत्र वारवंतीयादेरुच्चैस्त्वमेव धर्मः निरपेक्षप्रतीतित्वात् नोपांशुत्वं प्रधानधर्मः तद्विधे
कवाक्यतापेक्षत्वादिति चेत्। नैवं सांगप्रधानप्रयोगस्य याजुर्वेदिकत्वेन सापेक्षस्याप्युपांशुत्वस्यैवानुष्ठानं अन्यथा
प्रधानवैगुण्यादिति भाष्यं। तन्नु अंगगुणविरोधे चेति द्वादशाधिकरणेन पौनरुक्त्यादर्थान्तरायांगविधेरपि याजुर्वेदि

कत्वादयुक्तमित्यन्यथावार्त्तिकेवर्णितंसामानिसामानिसामवेदोत्पन्नानिविनियोजकानियाजुर्वेदिकानितत्रोत्प
३८ त्तिवेदस्वरउच्चैस्त्वंकर्त्तव्यंप्रथमत्वादनपेक्षत्वाच्चेतिचेन्न।प्रधानवेदधर्माणोवेदांतरगतागुणाः।प्रयोज्यत्वेनाव
धारितस्यमंत्रस्यस्वराकांक्षणात्तस्यचविनियोजकवाक्यप्रधानतयातदीयमुपांशुत्वंकर्त्तव्यंतेनक्रियतइतिव्यप
देशार्हत्वात्।२।यजुर्वेदेसामवेदवज्ज्योतिष्टोमआम्नातस्तस्यक्वविधिःक्वानुवादइत्यननुगमात्स्वरेप्यनियमइति
चेन्न।स्यात्प्रधानविधिस्तत्रयत्रवेदेधिकांगता।अधिकांगत्वकर्मस्वरूपोपकारिद्रव्यदेवताविधानंतद्यजुर्वेदइतित
त्रविधिरन्यत्रानुवादइतितदीयोपांशुत्वनियमः।।३।।दर्शपूर्णमासयोःसमिदादिप्रयाजाश्रुतास्तेनतयोरंगानिप्र
धानभावनायाभाव्यकरणतदुत्पादकद्रव्यादिभिर्निराकांक्षत्वात्प्रयाजानांवर्मकरणार्थवादिकफलेनविश्वजिन्न्या
येनदर्शफलानुषंगेणवानिराकांक्षत्वात्परस्पराकांक्षालक्षणप्रकरणाभावाच्छ्रुत्यादित्रयाभावस्यचस्पष्टत्वादि
तिचेन्न।प्रयाजानांप्रकरणात्।अंगतेत्युत्तरेणसंबंधः।फलवद्भावनोक्तंकथंभावाकांक्षाप्रकरणंयागेन
स्वर्गंकुर्यादित्युक्तेकरणस्यव्यापारविशेषाकांक्षायांप्रयाजादिभिरुपकारसंपादनंव्यापारविशेषत्वेनसंबध्यते।न
चयागानुष्ठानमेवसंयोगानुकूलक्रियानुष्ठानवत्प्रकारइतिशंक्यंकुठारसंपादनस्यैवव्यापारतातापत्त्योद्यमनादि ३८

वैयर्थ्यापातात्।तस्मात्प्रयाजादिव्यापारेणादृष्टद्वाराव्रियमाणस्यप्रधानस्यफलसाधनत्वंएवंचप्रयाजादेरपिन्न
पेक्षितप्रधानोपकारेणफलवत्वान्नार्थवादादिभिःफलकल्पनाक्लेशइतिप्रकरणादंगत्वंप्रयाजादीनां॥४॥
दर्शपूर्णमासयोःहुतानुमंत्रणमंत्रोदधिर्नामासीत्युपांशुयाजक्रमेसमाम्नातोलिंगप्रकरणाविशेषान्सर्वार्थ
इतिचे[illegible]त्।दधुक्तक्रमतोंगता।क्रमसमाम्नातयोर्मंत्रकर्मत्रकर्मणोःस्थानसामान्यादन्यतरदर्शनेन्यतरोपस्थि
तिनियमःपरस्परसंबंधार्थइत्याकांक्षादिकल्पनाक्रमेणाकृतिकल्पनयोपांशुयाजशेषत्वप्रत्ययाल्लिंगप्रकरणयोरप्रिनाव
तेवचरितार्थत्वं।देशसामान्यरूपक्रमोद्विधःपाठसादेश्यमनुष्ठानसादेश्यंचेतिपाठसादेश्यमपियथासंख्याम्नानंसन्निध्याम्नानंचे
तिद्विविधंतत्रदधिमंत्रःअथमस्योदाहरणंसान्नाय्यपात्रसुंधनसन्निधौशुंधध्वमितिमंत्रोद्वितीयस्यानुष्ठानसादेश्यस्य
तुअग्नीषोमीयपशुधर्माइतिवक्ष्यते॥५॥दर्शपूर्णमासादिषुआध्वर्यवहौत्रौद्गात्रादिसमाख्याताःपदार्थाःसामर्थ्य
लक्षणाल्लिंगात्सर्वैःसर्वैःकर्त्तव्याःआख्यायाःपदमात्रत्वेनाप्रमाणत्वादितिचेत्।कर्त्तारोध्वर्युहोत्रायानियम्यंतेसमाख्य
या।अपौरुषेय्यासमाख्ययाकर्तृविशिष्टपदार्थाभिधानाद्विशिष्टस्यचपदार्थापेक्षानुरोधेनकर्तृणांकार्याकांक्षयाव
क्रियाकर्तृभावरूपेपर्यवसानाद्यौगिकानांसंबंधावाचकत्वेपितस्यगम्यमानत्वात्तस्यचप्रयोगविधिनाविधानात्समा

र्व्ययापरस्यानियमइति।६। ऐंद्र्यागार्हपत्यमुपतिष्ठतइत्यत्रतृतीयाश्रुत्याऽऽमंत्रःशेषत्वंद्वितीययाचगार्हपत्यस्यशेषित्वमि
३५ तिश्रौतोयंशेषशेषित्वबोधः मंत्रस्यैनेंद्रपदेनेंद्रप्रतीतिमात्रंनतुमंत्रस्येंद्रशेषत्वप्रत्ययःइंद्रप्रतीत्यनुपपत्यातच्छेषत्वं
मंत्रस्यकल्प्यमितिलैंगिकोयंविनियोगः।यद्यपिकेवलश्रुत्यापदार्थांतरनिरूपितंशेषत्वंशेषित्वंवानबोध्यतइति
35 अस्तितदंशेवाक्यापेक्षा।तथापिशेषशेषिभावेवाक्यस्याव्यापाराच्छ्रौतएवायंविनियोगः तत्रद्वयोरेकमंत्रसमवाये
लिंगंबलवत्सामर्थ्यापेक्षत्वाच्छ्रुतेर्यिरितिचेत्।नगौणसामर्थ्यस्यगार्हपत्येपिसत्वात्।नापिमंत्रस्योभयत्रविकल्पः
विरोधाभावेनप्रतिप्रधानंगुणावृत्ति[redacted]न्यायेनसमुच्चयोपपत्तेरितिचेत्।श्रुतेर्लिंगाद्दुर्बलत्वंप्रपद्यतइतिउत्तरेणसं
बंधः।नतावच्छ्रुतिलिंगयोरविरोधः।येनोभयत्रमंत्रस्यसमुच्चयःस्यात्।निरपेक्षश्रुत्यागार्हपत्योपस्थानशेषत्वेमंत्रस्यप्रथम
मवगतेमंत्रादर्थबुद्ध्यातत्प्रतीतितननसामर्थ्यंचतस्मिन्नालोच्यमंत्राकांक्षावशेनेंद्रोपस्थानशेषत्वबोधकश्रुतिकल्प
नपाविलंबेनविनियोजकंलिंगंमंत्रप्रयोजनाकांक्षालक्षणमूलस्यश्रुत्यानिराकृतत्वाच्छ्रुतिकल्पनायामसमर्थंसद्बा
ध्यतइतिगार्हपत्योपस्थानएवश्रुत्यामंत्रविनियोगः।।७।।स्योनंतेसदनंकेरातिघृतस्यधारयासुशेवंकल्पयामि।
तस्मिन्सीदामृतेप्रतितिष्ठव्रीहिणांमेधसुमनस्यमानइत्यत्रसमभिव्याहृतपदानामेकवाक्यत्वस्वारस्येनतस्मिन्सी ३५

देवत्वस्यपूर्वसापेक्षत्वेनचसंपूर्णोमंत्रःसदनकरणपुरोडाशप्रतिष्ठापनयोरावृत्याप्रयुज्यतेयद्वालिंगवाक्ययोःसा
क्षाच्छ्रुतिकल्पकत्वेनतुल्यबलत्वात्संपूर्णोविभक्तोवाप्रयुज्यतइतिचेत्।ततोवाक्यं।ततोलिंगाद्वाक्यंदुर्बलत्वंप्रप
द्यते।स्योनंतइतिपूर्वार्द्धस्यात्यानपेक्षंसदनकरणप्रकाशकत्वंतस्मिन्सीदेत्याद्युत्तरार्द्धस्यापीतरनिरपेक्षंपुरोडाश
प्रतिष्ठापनसामर्थ्यमितिततोमपितितन्नदर्थेविनियोक्त्रीश्रुतिःकल्प्यते।द्वयोरेकवाक्यत्वेउत्तरार्द्धस्यसदनकरणसा
मर्थ्यंपूर्वेणैकवाक्यत्ववशेनकल्पयितव्याश्रुतिकल्पना।एवमितरस्येतरत्रेतिविप्रकर्षाल्लिंगबलीयस्त्वेनोभयत्रविभज्ये
वविनियोगः॥८॥सूक्तवाकेअग्नीषोमाविदंहविरजुषेतामवीवृधेतामहोज्यायोक्रातांइंद्राग्नीइदंहविरजुषेतामवावृध
तामहोज्यायोक्रातामितिश्रुतेइदंहविरजुषेतामितिशेषद्वयंतत्तद्देवताप्रदाइत्वात्प्रकरणेनपर्वद्वयेपिप्रयोक्तव्यंय
द्यपिसन्निपातीसूक्तवाकःश्रुतिलिंगाभ्यांप्रहरणेष्टदेवताप्रकाशनयोर्विनियोगात्तथाप्यवघातादिवत्प्रकरणग्रहण
मविरुद्धं।नचवाक्यंबलीयस्त्वंप्रधानाकांक्षात्मप्रकरणस्यप्रधानार्थिक्यापादकतयाबलवत्त्वादितिचेत्।ततःप्रकरणं
तथा।तत्तद्देवतायूदेकवाक्यत्वंशेषयोःप्रत्यक्षंअन्यशेषस्यस्वशेषपरिहारेणेनापरेणैकवाक्यत्वमप्रत्यक्षमेवप्रकरणात्क
ल्प्यमितिविप्रकर्षाद्वाक्येनसामर्थ्यादिकल्पनस्यशैघ्र्यात्तेनप्रकरणबाधः॥९॥राजसूयेभिषेचनीयसन्निधौविदेव

२

३६ तादयःसमाम्नाताःतेषांसन्निधिप्रकरणाभ्यामभिषेचनीयेराजसूयेचांगत्वंनाकांक्षामात्रंसंबंधकारणंगिरिर्भुक्तमग्नि
मानित्यत्रापिगिर्यग्निमत्पदयोःसंबंधापत्तेःनापिसन्निधिमात्रंश्रयमेतिपुत्रोराज्ञःपुरुषोसार्य॰तामित्यत्रराजपद
36 स्यपुरुषपदेनाप्यन्वयापत्तेः।अतउभयंपरस्परापेक्षंउभयांगतांगमयतीतिचेत्।ततःस्थानं।आकांक्षातएकवाक्यतादिक
ल्पनेनश्रुतिकल्पनाशीघ्रा।सन्निधिपाठानुपपत्त्याकांक्षापरिकल्प्यवाक्यादिक्रमेणतत्कल्पनामंथरेतिसन्निधिबाधः।य
थापीष्टिपशुसोमानांविकृतित्वात्प्राकृतांगैर्नैराकांक्ष्यंतथापिराजसूयस्यात्मनासास्त्येवेतिप्रकरणास्तिना।।१०।।पौरोडाशि
ककांडसमाख्यातिसान्नाय्यपात्रंशुंधनक्रमेशुंधध्वमितिमंत्रःपठितःसमाख्यायासंबंधवाचित्या।लिंगाच्चपुरोडाश
पात्रशुंधनांगमितिचेत्।ततोव्याख्यादुर्बलत्वंप्रपद्यते।ततःस्थानात्।समाख्याहिनसंबंधवाचिनी।पाकंतुपचिरे
वाह्कर्त्तारंप्रत्ययोथकःपाकयुक्तः।पुनःकर्त्तावाच्योनैकस्यकस्यचित्।इत्यभियुक्तोक्तेःवाचकत्वेपिपदमात्रस्याप्रमाण
त्वात्।अतःसंबंधवाचिसमाख्योपलंभात्संबंधंसामान्यतःपरिकल्प्याकांक्षादिकल्पनाक्रमेणश्रुतिकल्पनाविलम्ब्य
तेक्रमेतुसंबंधस्यप्रत्यक्षप्रमितत्वादाकांक्षादिकल्पनाक्रमेणसन्निष्पद्यतेसेतिविसे(ति)तेनसमाख्याबाधः।एवंश्रुत्या
दीनांसर्वेषांपूर्वेणोत्तरोत्तरस्याप्राप्तबाधः।श्रुतिवाक्यविरोधेअरुणयापिंगाक्ष्याक्रीणातीत्युदाहरणं।श्रुतिप्रकरणविरोधेए ३६

कविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति ।। श्रुतिक्रमविरोधेरशनाधर्माणां त्रिवृद्भवंतीत्यादीनां क्रमात्यश्वयागांगत्वमाम्नोरश
नयायूपंपरिव्ययतीतिश्रुत्यायूपांगत्वं ।। श्रुतिसमाख्ययोर्विरोधे पौरोडाशिककांडसमाख्यातस्येषेत्वेत्यस्येतिकरणश्रुत्याशा
खाछेदांगत्वं । इतिकरणस्यवाक्यीयत्वेप्यभ्युपगमेनोक्तं । लिंगप्रकरणविरोधे एषानुमंत्रणादिः । लिंगक्रमविरोधेऽनुज्ञानु
ज्ञापनमंत्रौ । लिंगसमाख्याविरोधे भक्षानुवाके ग्रहणादिवाक्यानि । वाक्यक्रमविरोधे परिवीरसि परिवीत आगादित्यनयोः क्रमा
दग्नीषोमीयांगत्वप्राप्तावितपदैकवाक्यतया सवनीयरूपपरिव्याणेपिप्राप्तिः । वाक्यसमाख्ययोर्विरोधे भक्षानुवाके सख्यासा
दिपदैकवाक्यत्वात् । अश्विनोरित्यादीनामवेक्षणादौ विनियोगः । प्रकरणसमाख्याविरोधे पौरोडाशिककांडसमाख्या
तत्राम्नातलक्षणविहितानां प्रयाजादीनां प्रकरणात्सान्नाय्योपांशुयाजार्थत्वमपि । ननु तत्र तत्र शास्त्रप्रदेशेषु प्राकृतस्यवैकृते
नबाधः सामान्यस्यविशेषेण । श्रुत्यालिंगस्येत्यादिः प्राप्तबाधोऽप्राप्तबाधो वा । न चरमः । प्रापकचोदकसामान्यशास्त्रादेः
सत्वात् । नाद्यः । लिंगादिनाश्रुतिकल्पनातः सर्वमेवश्रुत्याविनियोगादत आह । प्रसक्त्तासायुज्यते प्राप्तावप्राप्तावपिबाधनं । प्राप्तौ
सत्यांबाधनंप्रसक्त्यासायुज्यते । अप्राप्तावपिश्रुत्यादिनालिंगादीनांबाधनंनैकरूप्यमित्यर्थः ।। ११ ।। ज्योतिष्टोमेतिरात्रए वसाक्रस्यो
पसदो द्वादशाहीनस्येतिश्रुतेक्रतुसमाप्यमानस्यत्र्युपसत्त्ववत् । तस्यैवद्वादशोपसत्तापिप्रकरणाद्विकल्पोनविधीयते

हीनश्रुतिश्चैवं नहीनो हीन इति सर्वाभिर्विकृतिभिरहीनोपरित्यक्तः प्रकृतितया ज्योतिष्टोम इति प्रकृत एव वर्त्तेन इति चेन्न । उपस
द्द्वादशत्वं स्यादहीनक्रतुगोचरं । प्रकृतगामित्वे साकस्याहीनस्येति च विभागो व्यर्थः स्यात् अहीनश्चाति श्च अक्रः खः क्रतुसम
ह इति विहितखप्रत्ययांततया मध्योदात्तत्वेन गम्यमानाहर्गणे रूढिं गमयति सा च योगाद्बलीयसीति द्वादशाहप्रकरणविहितद्वा
दशोपसत्तानुवादेन त्र्युपसत्ताश्रुतिः परं द्वादशाहीनस्येति न द्वादशोपसत्ताविधिः परं प्रकृतो विकृतो वेति ॥१२॥ ज्योतिष्टोमे यु
वं हि स्थ स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादित्यादिश्रुतं प्रतिपन्नाम बहिष्पवमानस्तोत्रस्याद्यात्मकऋदं विधानं न प्रक
रणादुत्कृष्टव्यं । नित्यप्रयोगे यथाशक्त्युपबंधस्य षष्ठे वक्ष्यमाणतया एकेन करणाशक्तौ द्वाभ्यां बहुभिर्वा प्रकृतस्यैवैकत्व
बाधेनानुष्ठानसंभवात् इति चेन्न । युवं हि स्थः स्व इत्यस्योत्कर्षो द्वियज्यमानको यथाशक्ति प्रयोगः उपादेयांगदक्षिणादिवि
षयः कर्त्तुरुपादेयत्वेपि तदेकत्वमनुपादेयं कालवदिति मीमांसकोद्घोषः अतः प्रकृते निवेशायोगात् कुलायाहीनादिषु
द्विबहुकर्त्तृकेषूत्कर्षः । पत्न्यभिप्रायत्वे विरूपैकशेषस्य कारकद्वयप्रसक्तिर्विधायस्य च प्रसंगात् ॥१३॥ दर्शपूर्णमा
सयोः जाघन्या पत्नीः संयाजयंतीति श्रुते सावमायिकांगत्वलाभाय जाघनीशब्दस्यान्तराद्यादिशब्दस्येवैकदेशाद्य
वचनतया विद्यमानद्रव्यैकदेशविषयत्वेन वत्सदत्ताद्यर्थालब्धपश्वनुनिष्पन्नजाघनीसंस्कारकतया विनियोगभंगेन

पत्नीसंयाजा विधीयंतइति प्रकरणाभंगात्प्रशावुत्कृष्यतेवाक्यमितिचेत्। उत्कर्षोनास्तिजान्याः। तृतीययादृव्याद्यपेक्षप
त्नीसंयाजानप्रतिगुणत्वेनविधीयमानानसंस्कार्यास्यात्। अवयवविशेषस्यजाघन्याःमुंजादिवत्स्रुग्न्यायामुपलंभात्नैकदे
शद्रव्यत्वंअतआज्येतविकल्प्यतेजाघनीपत्नीसंयाजेषु॥१४॥ ज्योतिष्टोमेऽधिषवणफलकेप्रकृत्यनसंतृण्णसंत
णेहिहनूइत्यसंतर्दनंविधायपुनःश्रुतंदीर्घसोमेसंतृद्येधृत्याइतितत्रइष्ट्याद्यपेक्षयाप्रकृतस्यापिदीर्घत्वादनुत्कर्षोन
चदीर्घस्ययजमानस्यसोमइतियुक्तंकर्मधारयस्यबलीयस्त्वात्। धृत्याइत्यर्थवादासामंजस्याच्चात्रतःसंतर्दनासंतर्दनयो
र्ग्रहणाग्रहणवद्विकल्पइतिचेत्। कर्षःसंतर्दनस्यात्तु। इष्ट्याद्यपेक्षयादीर्घत्वस्याव्यावर्त्तकतयावैयर्थ्यात्प्रकृतसो
मापेक्षयादीर्घत्वंक्याहीनादिष्वुत्कर्षः। सं स्यात्स्वपित्रिपर्वणःसोमस्यदीर्घपर्वग्रहणेनबहुरूपग्रहणेनचप्रदानविच्छेदप्र
देयविच्छेदावश्यकत्वेनधृत्याइत्यर्थवादसामंजस्यमतोल्यादिति॥१५॥ यत्प्रवर्ग्यंप्रवृणक्तीतिअनारभ्याधीतःप्रवर्ग्यः
पुरस्तादुपसदांप्रवर्ग्येणप्रवृणक्तीतिप्रवर्ग्यसन्निध्याम्नातोनाव्यभिचरितक्रतुसंबद्धोयसदुपस्थापितज्योतिष्टोमांगं
।तत्रश्रूयते।नप्रथमयज्ञेप्रवृज्यादितिअयंप्रतिषेधःप्रथमयज्ञांगंप्रथमयज्ञश्चेषवावप्रथमोयज्ञोयज्ञानामितिवचनाद
ग्निष्टोमःसहिप्रथमंप्रयुज्यतेयएतेनानिष्ट्वेतिवचनात्तस्माद्वाक्यादग्निष्टोमांगंप्रतिषेधइतिचेत्। भवेदाद्यप्रयोगांगं

३८ प्रवृंजननिषेधनं। प्रथमशब्दस्याप्रवृत्तपूर्वस्य कर्तुराधप्रवर्त्तनवाचितयाप्रयोगद्वौ लक्षण्याऽक्रतोर्वृत्ते रिहलाक्षणि रा
कस्याग्रहणादेषवावेत्यस्यार्थवादतयाशक्तिग्राहकत्वाद्यज्ञशब्दस्य जघन्यतयाप्रयोगलक्षणायामथदोषात्। प्रथ
38 मप्रयोगागमयं प्रतिषेधः अग्निष्टोमेप्रवृणक्तीति तत्रैव प्रतिषिद्धप्रतिप्रसवः तथाचाग्निष्टोमप्रथमप्रयोगे विकल्पः
सचव्यवस्थितः कामम नूच्यानस्यप्रवृंज्यादितिवचनात्। अतिरात्रप्रथमप्रयोगे नित्यमप्रयोगः तत्रप्रतिप्रसवाभा
वादिति अग्निष्टोमेप्रवृणक्तीति न प्रथमयज्ञ इति चेकवाक्यतयापर्युदासार्थः यजतिषु येयजामहं करोति नानूया
जेष्विति वत् अन्यथा न प्रथमयज्ञ इत्यस्य शास्त्रप्राप्तप्रतिषेधकत्वे विकल्पापत्याऽतिरात्रप्रथमप्रयोगेपितत्प्रसंगा
त्। पुरस्तादुपसदामिति तु कालविधिः पुरस्तादुपसदां सौम्येनेति वदिति केचित्। १६ दर्शपूर्णमासयोः पूषाप्रपि
ष्टभाग इति श्रुतं तत्र पूषाभावाच्चातुर्मास्यादिषूत्कृष्यत इत्याह। स्यादुत्कर्षः पेषणस्य १७ तस्येषणं तद्देवताक
वरो। पौष्णं श्याममालभेतान्नकाम इति विहितपशोपुरोडाशे चस्यादविशेषादिति वेत्। चरावेव भवेत्सतु। सऽउत्कर्षः
। तंडुलेषु पेषणं चोदकसिद्धं। न च वचनात्पुरोडाशेपिस्यादिति। युक्तं तादृग्वचनाभावात्। एतस्यात्यंतात्राप्तपेष
णोपस्थापकत्वेगौरवात्। पशावपिहृदयादिनाशापत्यात द्विध्ययोगाच्चरावर्थलोपात्प्रकृतिप्राप्तपेषणं नि ३८

वर्त्तमानं प्रतिप्रसूयते अस्याः पूर्वविधित्वेप्युपस्थितिलाघवमस्त्येव तंडुलानां कणभावमात्रस्य वचनेनानुष्ठानान्य
चरूपत्वविघातोपि ॥ १८ ॥ तदेव पेषणं सोमापौष्णं चरुमित्यादावपि स्यान्न पेषणवाक्ये तद्देवताकयज्ञश्रवणेनतत्पूर्व
प्रयुक्तत्वानापत्त्या पूषमात्रप्रयुक्तत्वेनात्रापि तदनपायादिति चेन्न । यत्रान्यसहितः पूषा भवेत्तत्र न पेषणं । पूषप्रयुक्तत्वे
वैयर्थ्याद्भागशब्दोक्ततद्देवत्यस्य यागस्य पूर्वप्रयुक्तं पेषणं नान्यसहितपूषदेवताकैः संबद्ध्यतइति न तत्र तदिति ॥ इति श्रील
घुवार्त्तिकटीकायां तृतीयस्य तृतीयः पादः ॥ ॥ दर्शपूर्णमासयोः निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवा
नामुपव्ययत इति श्रुतं तत्रोपवीतविधेः शेषो निवीतादिरर्थवादः विधित्वं फलाच्चिंत्यते । षष्ठीश्रुत्या शुद्धपुरुषधर्मो वा प्रकरण
सहितश्रुत्या क्रतुयुक्तपुरुषधर्मो वा प्रकरणाच्छुद्धक्रतुधर्मो वा प्रकरणे मनुष्यप्रधानान्वाहार्यादिदानधर्मो वा स्वतंत्रम
नुष्यप्रधानातिथिपूजाधर्मो वेति चेन्न ॥ अर्थवादो निवीतोक्तिः । केवलपुरुषार्थत्वपक्षे फलकल्पनापातात्तत्राख्याता
भावान्न विध्यंतरशेषत्वात्प्रकरणाविरोधाच्चेति १ दर्शपूर्णमासयोः श्रुतमुपव्ययत इति तत्प्रकरणमनारभ्यसर्वार्थं म
ताग्निहोत्रे यज्ञोपवीती हि देवेभ्यो दोहयतीति बहुवचनां तेन सिद्धवदनुवादान्न ॥ दर्शपूर्णमासयोरिंद्रमहेंद्रयोर्वै
काल्पिकत्वेन बहुवचनायोगात्तद्दूरस्थत्वाच्च । अग्निहोत्रे तु अग्निसूर्यप्रजापतीनां सत्त्वेन बहुवचनोपपत्तेरिति

चेत्॥ सर्वांगंनोपवीतकं। नतावद्बहुवचनानुपपत्तिः। प्राकृतवैकृताभिप्रायत्वाद्बहुत्वस्य। नचदूरत्वं। यथाप्राप्तानुवादत्वेनस्यादोष
३९ त्वात्। तस्मात्प्रकरणस्यलिंगाविरोधाद्दर्शपूर्णमासांगमुपवीतं॥२॥ इदमेवोदोहरणंनित्ययज्ञोपवीतीतिस्मृतिप्राप्तानु
वादइतिचेत्। उपव्ययतइत्येषक्रत्वर्थस्यविधिर्मतः। स्मृतिःपुरुषार्थविधिः। अयंचप्रकरणात्क्रत्वर्थइतिसंयोगभेदाद्भि
न्नविषयतयानानुवादः॥३॥ मृताग्निहोत्रेयज्ञोपवीतीहिदेवेभ्योदोहयतीत्यत्रहिशब्दपरित्यागेनजीवदवस्थायांयज्ञोप
वीतमग्निहोत्रस्यविधीयतइतिचेत्। यज्ञोपवीतीहीत्येतद्भावेत्वास्यानुवादकं। हिशब्दोपबंधात्प्राचीनावीतविधिशेषत्वा
द्दर्शपूर्णमासतःप्राप्तेश्चानुवादत्वं॥४॥ तत्रैवपुरोदंचोदर्भास्तान्दक्षिणाग्नेःस्तृणीयादित्यत्रयेदर्भास्ताःपुराजीवदवस्था
यांउदंचःउदगग्राःस्तृणीयादित्यप्राप्तत्वाद्विधिरितिचेत्। दर्भाणामुदगग्रत्वंस्मृतिप्राप्तमनूद्यते। यच्छब्दोपबंधाद्वि
ध्यभावात्। विध्यंतरशेषत्वाच्च। अग्रवंतुदगग्राणीतिस्मृतिप्राप्तानुवादः। स्मृतेःसर्वकर्मविषयत्वाद्स्यचाग्निहोत्र
मात्रविषयत्वात्रमूलिभूतभावः॥५॥ तत्रैवश्रूयते। अधस्तात्समिधंधारयन्ननुद्रवेत्। उपरिहिदेवेभ्योधारयती
तितत्रहिशब्दश्रुत्याधोधारणविधिशेषत्वेनाचारप्राप्तत्वेनवोपरिधारणानुवादः। देशादेशांतरनीयमानस्यांतरंगद्र
व्यस्यशिष्टैराच्छादनयनेनोपरिप्राप्तेःसमिन्नियमार्थंवचनमितिचेत्। विधिरेवोपरिधृतौ। समिधःपरिमाणाम्नाना ३९

तन्माच्छादनासमर्थत्वात्सुगदेञोपरीतिशाखांतरे अनुवादाच्चाचारादप्राप्तेरपूर्वत्वात्तु हि शब्दपरित्यागेन विधिः ६ ज्योति
ष्टोमे प्राचीनवंशं करोतीति विधापतीचीं मनुष्या इति श्रुतेऽनेककर्तृकोपाख्यानरूपपुराकल्पेन पूर्वपुरुषाचरितेन स्तुतिप्रती
तेर्विधिकल्पनेति चेत्। अप्रतीचीमिति तु स्तुतिः। निवीताधिकरणवत्सिद्धांतः ७ यदं तेरा तन्मनुष्याणांय स्तूर्णेन मनु
ष्याणां निष्पक्वं मनुष्याणामिति यो विदग्धः स नैर्ऋतः यो ऽशृतः स रौद्र इत्येतेषु विधित्वेपि न फलकल्पना लो किकक्रि
यासु प्रसिद्ध फलास्वगुणमात्रविधानान्न विधानात्प्रसिद्धे नैर्ऋत रौद्र पुरोडाशयोर्विदग्धत्वादि गुणमात्रविधानादि
ति चेत्। न तथायदं तेरेत्यादि तु यास्तुतिरित्यर्थः विध्यंतरशेषत्वादिभिः पूर्ववत्सिद्धांतः ॥८॥ दर्शपूर्णमासयोर्नानृतं व
ददिति श्रुतोऽनृतवदनप्रतिषेधः पुरुषार्थः वदनस्य तदर्थत्वात्। तथा हि। आख्यातात्कर्त्ता प्रतीयते। लः कर्मणि चेति
चकारात्तस्मिन्स्मर्यते देवदत्तः पचतीति सामानाधिकरण्याच्च तस्य प्रत्ययार्थतया प्राधान्येन तद्विशेषणतया गम्यमानं
वदनं तच्छेषः तदभिलषितसाधनं। प्रतिषेधोपि तद्विपरीतमर्थं बोधयंस्तस्यैव बलवदनिष्टसाधनतां प्रतिबोधयती
ति तच्छेष इति चेत्। क्रत्वर्थोनृतवर्जनं। आख्यातानां भावनाभिधायकतयाक्षेपादेव तदवगमोपपत्तौ न तद्विशिष्टे शक्ति
कल्पनं। लः कर्मणि चेत्यो कयोरिति विस्तृतयोरेकवाक्यतयाकर्त्तरि कलेलकारैकवचनमित्याक्षेपलभ्य कर्तृसंख्याभिधा

४० नपरत्वः कर्मवेति सूत्रं सामानाधिकरण्यं च गोः शुक्ल इतिवल्लाक्षणिककर्त्रभिप्रायमिति न कर्तुरारभ्यार्थवाच्यत्वं येनवद
नतन्निषेधयोः श्रुत्या न छेषतास्मात् ततश्च प्रकरणात्प्रतिषेधः क्रत्वर्थः अनारभ्याधीनस्मृतिबोधिततत्प्रतिषेधः पु
५० रुषार्थः तद्वत्त्वं घने पुरुषः प्रत्यवेयान्न तु क्रतुवैगुण्यमिति। अयं तु संयोगपृथक्त्वन्यायात् क्रत्वर्थ इति ॥९॥ दर्श
पूर्णमासयोः तस्माज्जंजभ्यमानो ब्रूयान्मयि दक्षक्रतू इति श्रुतेर्वाक्यशेषात् न चाकर्तुरभिधानात्समभिव्याहारात्मक
वाक्येन प्रकरणं भंक्त्वा विपरिणतवाक्यशेषावगतप्राणापानधारणादिरूपफलविशिष्टपुरुषतया मंत्रविधिरिति चेत्
। जंजभ्यमानमःस्यात्सुंसः क्रतुमुपेयुषः कृतावपिताद्दृक्पुरुषसत्त्वेन तत्संस्कारमुखेन प्रकरणानुरोधेन क्रतुफलेनैव तद्व
त्तोपपत्तेर्न तद्विपरिणामक्लेशो युक्त इति १० दर्शपूर्णमासयोः यो ब्राह्मणायावगुरेत्तं शतेन यातयात् तस्माद्ब्राह्मणाय
नावगुरेतेति श्रुतः प्रतिषेधः फलकल्पनाभयात्प्रकरणाच्च क्रत्वर्थ इति चेत्। पुरुषार्थतया बोध्यमवगोरणवर्जनं ॥ नि
षेधान्यथानुपपत्त्या निषेध्यक्रियायाः बलवदनिष्टसाधनत्वे कल्पिते तद्विशेषसमर्पकशतयातनार्थवादान्न दूपतेः
निष्टस्यावधारितेवगोरणनिवृत्तिरूपप्रतिषेधस्य तदनुसादफलत्वाकामान्न प्रकरणानुप्रवेशः केवलपुरुषार्थ
एवायामिति ११ दर्शपूर्णमासयोः मलवद्वाससा न संवदेतेत्ययं प्रतिषेधः प्रकरणात् क्रत्वर्थ इति चेत्। न संवदेतम ४०

वलवद्वासमसेत्यपिपूर्ववत्। पुरुषार्थइत्यर्थः। तामपरुध्यपयजेतेतिवचनात्सर्वस्मात्क्रतुव्यापारान्निवृत्तारजस्वलेतिनतयाक्रतो
संवादप्रसक्तिः अप्रसक्तस्यक्रतौप्रतिषेधोऽर्थकः पुरुषस्यतुस्वाङ्गघातरागतस्तत्प्रसक्तौतंप्रत्येवायंप्रतिषेधइति। पुरुषा
र्थस्याग्निहोत्रादेर्दीक्षितोनजुहोतीनददातीतिप्रतिषेधस्यप्रकरणात्क्रत्वर्थत्ववत्क्रतुमध्येपुरुषार्थतथाप्रसक्तान्त
वदनस्यप्रतिषेधवच्चैतस्यापिक्रत्वर्थतास्यादितिकेचित् १२ अनारभ्यश्रुतेसुवर्णंहिरण्यंभार्यंदुर्वर्णोस्यभ्रातृव्योभव
तीत्यत्रविनियोगभङ्गेनसुवर्णताविशिष्टहिरण्यधारणंविधीयमानंफलकल्पनाभयाद्वैदिकत्वसामान्यात्क्रत्वङ्गत्वमु
पस्थाप्यतदर्थंसंपद्यते। नचकर्मणिकृत्यप्रत्ययेनक्रत्वङ्गहिरण्यानुवादेनधारणसंस्कारोविधीयतइतियुक्तंलोकेपि
तत्सत्त्वेनतदनुवादेप्रमाणाभावात्। अतएवक्रत्वर्थधारणानुवादेनसुवर्णताविधिरित्यपिनिरस्तमितिचेत्। पुरुषार्था
स्वर्णधृतिः।। नतावद्वैदिकत्वेनक्रत्वङ्गस्याननियमः स्वर्गतदुत्पत्त्योरपिवैदिकत्वात् अंतआर्थवादिकंफलमुद्दिश्यवि
धीयमानास्वर्णधृतिःपुरुषार्था।। १३।। येनकर्मणेर्त्सेत्तत्रजयान्जुहुयादितिसनारभ्यश्रुताजयाहोमालौकिकेषुकृष्या
दिष्वपिस्युः कृष्यादिनापिऋद्धिंप्राप्तुमिच्छेत् तत्तदर्थमेवाहवनीयप्रणयनोपपत्तेश्चेतिचेत्। जयाःकर्मणिवैदिके। अंग
प्रधानयोःसादेश्यंप्रधानविध्यवगतंगमाबाधातिश्रौतेष्वेवाहवनीयवत्त्वंगंजयाः अन्यथास्रेत्रेअलपिःआहवनीयेहो

८

४१ मइतित्तयोर्वैयधिकरण्यंस्यात् अतएवस्मार्त्ताग्निसाध्यस्थालीपाकादिष्वपिनांगानि ॥१४॥ काम्येष्टिकांडेयावतोश्वान्प्रति
गृह्णीयात्तावतोवारुणान्चतुष्कपालान्निर्वपेदितिश्रुतंतत्रलौकिकेमित्रदायादिभ्यःप्रीत्याविध्यनपेक्षयाक्रियमाणेश्व
दानेनिमित्तेद्रव्यदेवताविशिष्टयागविधिःवरुणपाशान्मुंचतीतिश्रुतफलस्यनकेसरिणोददातीतिनिषेधोल्लंघनसमुत्प
न्नदोषवत्वस्यैवसंभवेनविहितकर्मांगाश्वदानेऽयोगादितिचेत् । अश्वेष्टिर्वैदिकेदाने । लौकिकेवरुणपाशशब्दवाच्यजलोदर
जनकत्वालोकाद्वेदाद्वानावगतेत्यर्थवादस्यफलपरत्वाभावेतद्दर्शनंलौकिकदाननिमित्तकत्वायोगात् । उभयनिमित्तकत्वेलौ
किकांशेपुरुषार्थोविधिःवैदिकांशेक्रत्वर्थइत्यादिवैरूप्यंस्यात् । तस्माद्वैदिकाइष्टिर्वैदिकदानस्यैवसादृश्याज्ज्योतिर्बुद्धिस
मारोहाज्ज्योतिष्टोमपौंडरीकादावश्वदानवतिक्रतोवाक्यमिदंनेयमितिवैदिकस्यैवदानस्यनिमित्तत्वंएतेनगृहदाहादि
ष्वपिव्यभिचारशंकापास्ता १५ इयमिष्टिःप्रतिग्रहीतुरेवयावतोश्वान्प्रतिगृह्णीयादितिविधिवाक्येतस्यैवश्रवणात्उ
पक्रमस्यार्थवादस्यदातुरपीष्टिःकिमुतप्रतिग्रहीतुरितिकैमुतिकत्वद्योतकत्वेनाप्युपपत्तेरितिचेत् । नस्याद्दोषात्प्रतिग्र
हेवेदोपक्रमाधिकरणन्यायेनानुपजातविरोध्युपक्रमबलात्तत्रोक्तरीत्याप्राप्तार्थत्वेनचप्रतिग्रहीतुर्निर्ज्ञातत्वभावि
नवापड्भिर्हिलैकर्षनीतिवत्स्वव्या॰ पारद्वारकप्रयोज्यव्यापारकर्त्तृत्वविवक्षयावानेय इतिभाष्यं । वार्त्तिकेतुतेनैवगतत्वामे ४१

मधिकरणांतरमि सुक्तंनदाहप्रतिग्रहेनिषेधार्थो वार्त्तिकेनाभ्युपयंनयः। प्रतिग्रहेनिषेधार्थोपिंत्तयः वार्त्तिकेनास्तीत्यर्थः॥१६॥
अनारभ्यश्रूयते। विश्वाएष इंद्रियेण वीर्येण व्यृध्यते यः सोमं वमिति तस्मात् एतं सोमेंद्रं श्यामाकं चरुं निर्वपेदिति तत्रलो। किंकसोमव
मनेश्रुतफलस्यप्रत्यक्षत्वात्तत्रैवेष्टिरितिचेत्। वैधसोमवमादिष्टिः। तत्रवांतार्थमेवपानात्प्रतीकारानपेक्षणाद्दैहिकस्यतुस
म्यग्जरणपर्यंतंमात्रमेवाऽनाभिमतिगाइतिमंत्राद्यापाशवगमात्प्रतीकारापेक्षायांतत्रैववमनेइष्टिःफलवचनंतुअर्थवा
दमात्रमतोनतद्दर्शनेलौकिकविषयतेति॥१७॥ येयमिष्टिःफलकल्पनाभियावैदिकवमनउक्तामात्रमार्त्विग्वमनेपि
स्यात्वैदिकवमनत्वाविशेषादितिचेत्। मानर्त्विग्वमनेभवेत्। इष्टेःक्रत्वर्थायाःयजमानकर्तृकतया। तत्समानकर्तृकं
गम्यमानंवमनंनिमित्तमितिनर्त्विग्वमनइष्टिर्भवेत्॥१८॥ दर्शपूर्णमासयोः यदाग्नेयोष्टाकपालोभवतीतिश्रुतंतत
थोपस्तृणातिअभिघारयतिद्विर्हविषोवद्यतिचतुरवत्तंजुहोतीतितत्राष्टाकपालद्रव्यंदेवतासंबंधित्वेनतद्धितादवगतं
माबाधीतिसंपूर्णंप्रक्षेप्तव्यंअवदानंतत्सन्निशिष्टपुरोडाशावरुद्धंसाक्षात्साधनत्वायोगात्पुरोडाशस्यतत्साधनत्वंद्वार
मितिद्विर्द्विरवदायसंपूर्णमाहुत्याहोतव्यंएवंद्रव्यवाद्यग्रहहोमवत्शेषकार्याणितुद्रव्यांतराक्षेपणिकातद्दशाद्वाशेषस्या
पनंनव्यवदानविधिसामर्थ्यादितिचेत्। अवदानस्यैवयागेद्रव्यत्वं। एकेनैवाव्यवदानेनयागनिर्वृत्तेर्नैर्गुण्यात्तद्व्यव

४२ शात्प्रधानावृत्तिर्विनावचनं युक्ता। नचैंद्रवायववदोयाग्याभ्यासाद्विनाक्रमसमुच्चयदर्शनाद्यनुपपत्तिवत् आग्नेयत्वमनुप
पन्नं। प्रदेयप्रकृतित्वेना पिपशोरिवतदुपपत्तेः अतोघ्यवदानद्वारकं पुरोडाशैर्यागसाधनत्वमितिभाष्यं। वार्त्तिकेतु हृदयादि
द्वारकं पशोरग्नीषोमीयत्वमित्यत्र हृदयादिघेकादशवैपशोरवदानानीतिवचनवत्। नघ्यवदानद्वारकं पुरोडाशस्याग्ने स
यत्वमित्यत्रमानमस्ति चतुरवत्तवाक्यस्योपस्तरणादिवाक्यप्राप्तावत्तोद्देशेनयागसमसमयप्राप्तहोमसंस्कारविधिपरतया
तदनुवादेनचतुरवत्तस्यसाधनत्वेनविधानायोगात् यागस्यचविनापिप्रक्षेपमारण्योत्सर्गवदुपपत्तेः आचारस्यचकृत्स्नस्ययागसाधनत्वबोधि
तश्रुतिविरोधेऽप्रमाणत्वात्तस्मात्चतुरवत्तंजुहोतीत्यप्राप्तहोमविधिः त्यागस्तुकृत्स्नस्याष्टाकपालस्यैव। अधिकरणंतुहोमविषयंहविषांप्रायोहोम
दर्शनात् अग्निमुखावैदेवाइत्यर्थवादाच्चकृत्स्नहोमइतिचेत्। अथवार्त्तिके। कृत्स्नेहविषियागार्थप्रक्षेपोघ्यवदानगः। चतुरवत्तंजुहोतीतिवचना
त्तावत एव होमः त्यागस्तुकृत्स्नस्य। तथाचशेषात्स्विष्टकृतइत्युपपन्नं। त्यक्तस्यापिपुनस्तावन्मात्रस्यस्वीकारोवचनवशाद्वारबाधेनापिभक्षिष्य
तीतिनत्यक्तेऽत्तरावदानविरोधइत्युक्तं ॥१९॥ शेषकार्याणिस्विष्टकृदादीनिएकस्मादेवकार्याणितावतैववचनोपपत्तेरितिचेत्। शेषकार्याणिसर्वेभ्यः। द्रव्य
गुणकप्रधानकर्मत्वेस्यादेतदेवं आकीर्णकरइत्याणां क्वचिद्दूरीकरणप्रसक्तोप्रतिपत्तिनियमोयं सपस्यैव। नक्रियतेतस्यैववैगुण्यंस्यात्। प्रतिपत्तित्वं चचतु
र्थसिद्धंनार्हतीनगतमितिनेदमधिकरणांतरं किंतुएवाधिकरणपूर्वपक्षसिद्धांतयोः प्रयोजनकथनपरं २० शेषकार्याणांप्रधानकर्मत्वंकृत्स्नचिंता। शेषकार्याण्यनियमेनकु ४२

८ विनियोगत्वान्नकृतकरशेषेप्यस्तीति न कर्तव्यानि शेषकार्याणि। साकंप्रस्थायीयेन हकुंभीभिरभिक्रामेदिति श्रुतेः अभिक्रम्यावदायपयोग्रहः इति गुरुकाहवनात् शेषसत्त्वेभवंतीति स्वि
ष्टकृदादीनीति चेत्। नसाकंप्रस्थायीयकुंभ्यांस्यात्। प्राकृतहोमार्थाभिक्रमानुवादेन गुरुकृस्याने कुंभीनां विधानात्ताभिरेव होमः अत एव ते स्विरीये। पुर्णहोतव्यंदारूपा
त्रेण जुहोति ग्रैउंबरं भवतीति श्रूयते अतः ४ शेषाभावान्नतत्कार्याणि॥ २॥ सौत्रामण्यांपयोग्रहाः सुराग्रहाश्च तत्र अश्वतं यथाग्रहे इतन्यग्रहानन्त्वितिजउपा हहलेउलरेत्रो
नष्विष्टकृदादितिचेत्॥ एकस्माद्यदि मुख्यात्तः। यदीतिह त्वात्सिं। तो ह्वाटनं मुख्येस्वप्रासनिमित्तत्वाच्छेषस्यापि तेजन एव शेषकार्यं संपन्नोपि पित्रवि
द्यान्नेतरेभ्यः शेषस्थापनमिति मुख्यादेवतानि कार्याणि २१ आग्नेयं चतुर्धाकृत्वेदं ब्रह्मण इदं होतुरित्यादेशपूर्वकं कल्पितेभ्यः कर्मकरेभ्यो दीयमानं
भक्षणश्रवणात्सोमचमसवत्सरिकपार्थमितिचेत्। इदं ब्रह्मण इत्यादिनिर्देशो भक्षणार्थकः। कृत्स्नपुरोडाशस्य देवतायै दत्तस्याग्नीशानोपज
मानप्रत्विग्भिर्मुख्यः कथं ते नपरिक्रीणीताः ततः प्रतिपत्तिसापेक्षभक्ष्यद्रव्यस्यतदेव भक्षणं प्रतिपत्तिकर्मेति प्राप्तभक्षस्यकालत्विङ्किः यम मात्रं कुरि
ष्यमाणा कर्मणपुत्राहजननायविधीयतइति भक्षणांप्रतिपत्तिरिति २२ ॥ इति लघुवार्त्तिकटीकायां तृतीयस्य चतुर्थः पादः॥ ॥ शेषकार्याणि स्वि
ष्टकृदादीन्युपांशुयाजार्थाज्यशेषादपिकर्तव्यानीति चेत्। आज्येनोपांशुयाजार्थे शेषकार्यं विधीयते। उपांशुयाजार्थे आज्ये शेषकार्यार्थं न विधीय
ते। जुह्वां चतुर्गृहीतस्यनिःशेषकृतत्वात् श्रौवस्य तद्विमोपस्तरणादिस्यैरिष्टयजुर्होमान्तेषु विनियोगस्य माणत्वात्। ध्यास्त्राज्यस्य च ध्रुवाप्यायना
पशाग्निकहोमादिषु विवक्षीइत्यन्वयः। एकपुरोगशेतत्तद्देवतोद्देशेन निरूप्तानां संकीर्तितयाप्रदेशाविशेषस्य याग साधनत्वायोगे नत्वागकालेप्रस्थे
यनिरूपंततत्स्यैतममेतिवृद्धातिष्ठव्यत्वागात्साधारणः शेषः ततः सकृदवदाने व्यगृत्यमाणाविशेषतात्साधारणात् शेषकार्याणि नावर्त्तनि।
वचनाद्यावदानेपदेशानियमः ४ ऐंद्रवायवग्रहशेषभक्षः सकृदेवान्यग्रहयोरपिविवेतिचेत्। ऐंद्रवायवशेषस्यद्विवारं भक्षणं भवेत्। द्विरैंद्रवा
यवंभक्षयतीतिवचनात्॥ ५॥ सोमेभक्षणानान्तिग्रहैर्जुहोतिचमसैर्जुहोतीतिवचनेर्निःशेषहोमविधानात् अल्पंजुहोतीतिवचनस्यार्थम
पयोग्रहानजुहूतिदक्षिणेग्नौसुराग्रहानितितत्रसोमग्रहतुल्यत्वात् अल्पहोमेशेषसत्वेनभवंतिततत्कार्याणीतिचेत्। नापिसौत्रामणीग्रहे। उपदेशातिदेशाभ्या
मल्पहोमाभावात्तेनशेषकार्याणि शेषाभावात्॥ ३॥ सर्वपृष्ठेष्टाविंद्रायराथंतरायनिर्वपतिइंद्रायवार्हतायेत्यादिनापृथक्कर्माणि विधाय सत्रयथा ग्रहतिविधिनं
स्यविभागप्रसक्तौ अश्रूपतेरथचक्रमात्र एकः पुरोडाशोभवतिसमंतं पर्यवद्यतीतितत्रातिदेशामकृतियागंप्रदेशप्रेरेनास्विष्टकृदाद्यवदानानिका

ग्रहेषुपुरोडाशेनावयवसः शेषप्रतिपत्तिः ८

त्विवेदपि भक्षविध्यभावान्न दभाव एवेति चेत्। सोमप्रेषस्य सद्भावाद्वचनाद्भक्षणे। पूर्वस्मादेवं वायवं भक्षयतीति विशिष्टभक्षविधित्वस्य प्रती २
४३ तेः अत्रिवाचनिको भक्षः समाख्यानिमित्तस्य श्रुतेर्हेतुत्वमसः प्रवरणतः शेषात् ग्रावयजमानस्येति वैदिकी समाख्या। सोमचमस इति लौकिकी
चा। चमसेइदनार्थस्योग्णादिको धिकरणसाधनः अत्रसमः अतो होत्रादिमिश्रं स्मृते अथवे तेष्वित्रिति सिद्धः सामाख्यानिमित्तो भक्षः। तदाह। होत्रादीनां
43 भवेद्भक्षश्चमसेषु समाख्यया ६ प्रोक्ता तृणा मित्तत्वाः पश्च ब्रह्मणानां त्रयाणां भक्षः न चोत्सर्वस्य गापतेः सामं द्वितीयमक्ति वाचित्वयात ज्ञानक
र्तृरेकस्येवोद्गातुः पाशम्नायेन बहुवचनमनादृत्य प्रातिपदिकात् रोधाद्भक्ष इति युक्तं प्रातिपदिकलक्षणया पि बहुवचनस्यार्थवत्वेन स्वगति
कपाशम्नायस्यात्रानवत्तात्। न च तथा सति प्रकृतकर्मसंबंधिषु द्रुपमात्रलक्षणास्विति वाच्यं। अनतिप्रसक्तावांतरसामान्यस्यगानकर्तृत्वस्ये
व लक्षतावच्छेदकत्वादिति चेत्। उद्गातृचमसं तस्यगणः सर्वो विभक्षयेत्। छंदोगतेनैव लक्ष्यत्वात्सत्सुब्रह्मणानां चतुर्णां भक्ष इति भाष्यं। वार्त्ति
ककारस्तु गानकर्तृणामेकत्वोत्तरसंबंधिनां होत्रादिवत्स दक्षिण्यितानामेव सदः प्रतिनीयमानचमसभक्षकत्वमित्युपसुब्रह्मणानामेवेत्यूचे। त
दाह। मतं वार्त्तिककारस्यैस्य सुब्रह्मणांपविनेति तु ७ यथा चमसमन्यो भक्षमसांश्चमसिनो भक्षयंत्यथेतस्याहारियोजनस्य सर्व एवलिप्सं तइत्यत्रलिप्सा
मात्रवचने फलाभावात् भक्षलक्षणार्थो लिप्साशब्दः तत्र सर्वशब्दस्यद्र्यससर्वे ब्राह्मणा भोज्यंतामिति वत्संनिहितविषयत्वात् चमसिनां चासन्नि एम ·
धानान्न एव सर्वशब्देन गृह्यंत इति न्याय वस्तुतो भक्ष इति चेत्। हारियोजनस्यलभते ग्रावस्तोत्रा विभक्षणं। चमसिनो मपि प्रयोगांतरकर्मांतरगतानां वा ४३

रणायप्रकृतप्रयोगसंबंधित्वे वक्तव्ये तावतैवासंकुचितवृत्तिसर्वनामस्थाने वचनान्यार्थोपात्तचमसिभिर्विशेषणमिति ग्रावस्तुतोपि भक्षः
८ वषट्कर्तुः प्रथमभक्षः स्यात्तत्समाख्यानात्प्रभक्षानुवादेन प्राथम्यमात्रविधानान्नेदं भक्षान्तरमिति चेन्न। वषट्कारनिमित्तोपि भक्षः सोमेस्तीति कस्य
न। वषट्कर्तृविशेषितभक्षानुवादे विशिष्टानुवाददोषादेकस्मिन्समासपदे शेषाप्रवृत्तेः प्रसमर्पणांशद्वयोः प्राप्तवद्विधेयसमर्पणानिर्वहसंभवा
च्च प्राथम्यविशिष्टभक्षान्तरं वषट्कारनिमित्तं विधीयते ९ हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यंचः परेत्य सदसि भक्षान् भक्षयन्तीति श्रुता
नां भक्षातिरिक्तानां सर्वेषां वचनं तत्र यदर्थात्प्राप्तं होमाभिषवसमानकर्तृकं भक्षान्तरं विधीयत इत्यर्थाद्विशिष्टनिमित्तकं पर्यवस्यती
ति नैवैककर्तृभक्षः न दोहान्तर्थ्येवास्य परो भक्षो होमाभिषवहेतुकः १० चमसादिसमाख्याया निरवकाशत्वात् होमाभिषवनिमित्तस्य
वषट्कारनिमित्तस्य च भक्षस्य चमसातिरिक्तग्रहेष्वपि सावकाशत्वात्समाख्यानिमित्तत्रयवचमसेषु भक्ष इति चेन्न। उक्तानां भक्षहेतूनां
समवाये समुच्चयः। तयोरपि वाचनिकयोः समाख्याया बाधायोगात् तत्समाख्या निरवकाशतया दुर्बला समाख्यापि ताभ्यां बाधायोगात्। हेतु
त्रयसमुच्चये तन्निमित्तभक्षाणामपि समुच्चयः ११ त्रयाणामेकत्र भक्षेऽर्धर्चहृत्तिशेषस्य स्थितत्वात्सप्रथमं भक्षयेत्। वषट्कर्तुः प्रथम
भक्ष इति श्रुतचमसिष्व्यः प्रथममिति भविष्यतीति चेन्न। समवाये वषट्कर्तुः प्रथमं भक्षणं मतं। वचनस्य न्यायमात्रेणासंकोचायोगात् होतेव
नः प्रथमः पाहीति मंत्रवर्णात् होमापेक्षया वषट्कारप्राथम्याच्च वषट्कर्तुरेव प्रथमं भक्षः १२ नानुपहूतेन सोमः पातव्य इत्यत्रोपहूत

२

४४ शब्देनानुज्ञापयनमुच्यत इत्यनुप तापूर्वक एवभक्षइत्याह। अनुज्ञातेः सोमभक्षः कर्त्तव्यो वचनाद्भवेत्॥१३॥ नत्वानुज्ञानं लौकिकाच्छब्दान्मं
त्राद्वेति चेन्न। अनुज्ञानं च मंत्रेण कर्त्तव्यं लिंगदर्शनात्। लिंगवन्मंत्राम्नाने लौकिकाप्रसक्तेनैवानुज्ञानं १४ उपहूतउपह्वयस्वेति मंत्रयोः
५५ प्रथमचरमभाव्यनुज्ञानुज्ञापनयोः सामर्थ्यात् वाक्यवशेन संपूर्णो मंत्र उभयत्रापि प्रयोक्तव्य इति चेन्न। अनुज्ञानुज्ञापनयोर्मंत्रौ युक्
मतौ मतौ। वाक्यक्रमयोर्लिंगबाध्यत्वादर्थक्रमानुरोधेन प्रथमभाव्यनुज्ञायां उपह्वयस्वेति चरमभाव्यनुज्ञापने उपहूत इति च प्रयोक्तव्यः
॥१५॥ तदुपह्वानमेकपात्राणामन्येषां चनानुपहूतेनेति वचनाविशेषादिति चेन्न। एकपात्रप्रसक्तानामेवानुज्ञानमिष्यते दृष्टार्थमनुज्ञा
पनेव्यलीकं भागाधिक्यं च मत्वेति नुमिसेकपात्राणामेव १६ होत्र समाख्याता याज्यानुवाक्या चित्होत्र पत्नीयजमानस्य विहिता तत्र से
वापनेया नवषट्कारः याज्या याज्या विवषट्कृतेतीति तयोर्भेदावगमात् स्वयं वा निषद्य यजतीत्यस्यापि याज्यापयनेनेव चारितार्थ्यात् तत्त त
स्वहोते व वषट्कर्त्ताभक्षपिता चेति चेन्न। याज्यायां मष्टुस्येव स्यादूषद्कृतिमक्षणं। संपूर्णयाज्यत्वस्य वषट्कारेण विनाऽयोगादनवानं वषट्कु
र्यादिति मध्याज्यावषट्कारयोरंतराऽवाननप्रतिषेधाद्धि वषट्कारपूर्वकं भक्षणं होतुः पत्नीतं यजमानस्येव स्यात् १७ यदि राजन्यं वैश्यं वा याजयेत्स राम॰
यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोममिति तत्र यजमानचमसे भक्षमात्रं विकि
यते तस्यैवाद्यंतयोः कीर्त्तनादिति चेन्न। त्रिभिन्नः साधनेऽयोगो। यागीयद्रव्यत्यागीपत्तित्वात् द्रव्यस्य तस्यैव प्राह्म तस्ये हव्रत्समभिज्ञानादनेन क्र ४४

स्या

मेणायजमानचमसत्यागाभ्यासएवदृष्टं विधीयते तद्विधौच भक्षस्तां प्राप्तमेवानूद्यत इति प्रागएव स्तिभिन्नः साधनं एतेनाभिषवयुक्तपूतीका
नामपिप्रयोगसाधनत्वं व्याख्यातं १८ राजसूये दशपेयो नामसोमयागः तत्र प्रकृतितो दशचमसाः प्राप्ताः तत्र वचनं दूर्यं श्रूयते । दशदशैकैकं चमसं
मनुप्रसर्पयु इत्येकैकशतं ब्राह्मणाः सोमान् भक्षयन्तीत्यर्थं । तत्र यजमानचमसे दशराजन्या भक्षयेयुः अनुप्रसर्पणे इति विधिश्रवणेन दश
त्वसंख्याविधानात्प्रकृतौ संख्याबाधितास्याज्जातिस्तु स्थिता वा तत्र जातिसंख्ययोर्नियमेयजमानचमसे दशराजन्याः अन्येषु दशदश ब्राह्मणा
इति फलितं प्राप्नेति शतं ब्राह्मणा इति तु वर्तमानरूपता तत्र च यथोक्त संख्यानुवादः ब्राह्मणपदं तु ब्राह्मणब्राह्मणसमुदायानुवादकमिति चे
त् । पिवेषु ब्राह्मणाः शतं । समस्तानुवादस्य लक्षणायाश्च सति बाधके नुपपत्तेः शतानुवादेन ब्राह्मणत्वं पंचमलकारेण विधीयते । तेन न्यायप्रा
प्तराजजातिर्निवर्त्तत इति ब्राह्मणा एव शतं भक्षयेयुः १९ इति लघुवार्त्तिकटीकायां तृतीयस्य पंचमः पादः ॥ ॥ यस्य खादिरः स्रुवो भवति यस्य पर्ण
मयी जुहूर्भवतीत्यनारभ्य श्रुतं पर्णता द्यव्यभिचरितक्रतुसंबंधि जुह्वादिद्वारा जुह्वादिलक्षितक्रत्वंगत्वं वाक्येन प्रतीयते यदिदं सविगीतं तत्रोपदे
शातिदेशाभ्यां प्राप्तजुह्वद्वारा प्रकृतिविकृति साधारण्येन प्रत्यक्ष विधिना विधीयते पर्णतादीति चेत् । अनारभ्य विधानं यत्प्रकृतिं तत्प्राप्यते । अति
देशात् तज्जुह्वा प्राप्तुपजीवनेन विकृतौ पर्णत्व प्राप्तिस्यात् तज्जुह्वा सहैव तत्प्राप्तौ पुनर्विधानं व्यर्थं । पर्णत्वं विहाय नातिदेशः उपकारविशेषणा
नां समुच्छिसेव तद्विशेषणात्वस्य प्रकृतौ क्लृप्ततया विकृता वपितथैवातिदेशा द्युपदेशाज्जो पो घत्यो निर्दिशा प्रकृतेश्च अतः प्रकृता वेवानारभ्या

३

४५ धीतानां निवेशः १ अनारभ्यसमाम्नातसामिधेनीस्तु ब्रूयादितिश्रुतं सामान्यदर्शपंश्चाकरणातिकं च पांचदश्यं वा अह्निकस्मिंतं सामिधेन्यंगं प्रकर
णामनारादस्येति चेत्, विरूद्धं सामान्यदर्शपादि विहितं प्रतिपद्यते। सामिधेनीस्वरूपे संख्ययोर्वैयर्थ्यादपूर्वसाधनतांशे तन्निवेशो वा अथ प्रकरणे न तत्सा
धनत्वं पांचदश्ये प्रकृतिप्रतीयते सामान्यदर्शपेत्वव्यभिचारितक्रतुसंबंधि सामिधेनीद्वारा क्रत्वपूर्वमुपस्थाप्यतत्साधननिवेशो विलंबत इति नैरा
कांक्षात्प्रकृतेः। श्रुतसामान्यदर्शपासुमित्रविंदादिषु निविशते सामान्यदर्शपं २ प्रकृतावेव सप्तदशानुब्रूयाद्वैश्यस्येति श्रुतं सामान्यदर्शपं वा काम्यप्रकरणायो
रविशेषान्यां चद्दश्पेन विकल्पतामिति शंकित्वा सर्वप्रयोगसाधरणां पांचदश्यं वैश्यप्रयोगं पाबल्लात्प्रसरायागच्छति तत्पूर्वमेवतनुद्देश्यविहितं
सामान्यदर्शपं तेन संबध्यते। प्रथमत्वाद्धात्रुपजातविरोधिपांचदृश्यं नाप्राप्तमुत्तरं वाधते। उत्तरं तु न पूर्वाबाधेनात्मलाभं लभते। ब्राह्मणराजन्यप्रयोग
योःस्वावकाशं नित्यं नैमित्तिकं तु निरवकाशमिति पांचदृश्यस्य दुर्बलस्य वाधकमिति न विकल्पः इत्युक्तापूर्वपक्षमाध्यमत्रालोच्यास्यवितमपि काम्यमु
दाहरणं ह्युपकाय्यः। गोदोहनेन पशुकामस्य प्रणयेदित्यत्र न काम्यगोदोहनेन नित्यचमसवाधः। पुरुषार्थक्रत्वर्थत्वाभ्यां भिन्नविषयत्वात् चमसवा
धे क्रतुवैगुण्यापत्तिगुणाक्त्वाश्रितगुणास्यापि वैगुण्यापत्त्या क्रतुगुणफलयोरभावापाताज्ञातो विरुद्धतिगामिताक्रतुत्वे च चमसे न प्रणीयकामस्य – रा०म०
गोदोहनेन प्रणयनं तं वा कर्तव्यमिति चेत्, काम्यं नित्यस्यवाधेन प्रवृत्तावचुतिष्ठते। सामान्यतः प्रवृत्तत्वपूर्वभावित्वसावकाशत्वैर्नित्यस्य
वाध्यत्वं काम्यस्य तद्वैपरीत्याद्बाधकत्वं पुरुषार्थप्रत्यासत्तेपि नित्यनैमित्तिकयोर्बाधकं काम्यं अत एवैकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति विहि ४५

तत्काम्यानुवचनांतरेणानिरूपांचदर्शपूर्णेनेमितिन्निर्कस्मात्दर्शपंचवाध्यते। एकप्रयोगयतनसंबंधाद्भिन्नविषयोऽपिविरोधोऽस्त्येव। तथाचपशुका
मप्रयोगेबाधितश्चमसस्तोमयज्ञांगमितिनक्रतुवैगुण्यंतवाविगुणात्कृत्वाश्रितत्वंनवाप्रणयनाभ्यासः। तस्मिन्प्रयोगेचमसरहितप्रणयन
स्यैवांगत्वात्काम्यगोदोहनेनप्रणयनस्यप्रसंगसिद्धत्वादिति॥३॥ आधानेपवमानेष्टयःश्रूयन्तेविहिताःसमाम्नाताः। तेत्रेष्टीनांविश्वजिन्न्यायेनस्व
र्गफलकतयातत्सन्निधाम्नातमाधानमग्नीतिदेधिकाग्निसंस्कारकत्वेनेष्टांगमितिचेत्। आधानंपवमानेष्टेरंगं। फलवत्कर्मांगत्वेनाग्नीनांतदुत्पा
दकाधानमपिफलवत्पवमानेष्टयोप्याधानप्रकरणाधीतयदाहवनीयवाक्यादर्थ्यार्थाः। तद्वाक्याभावेफलवदाधानप्रकरणात्तदंगानिचेतिन
स्वर्गफलाः। अतआधानंनेष्टांगं॥४॥ अनारभ्याधीतमाधानपरत्वादिवदग्निद्वारेणोपस्थितक्रत्वर्थमितिचेत्। अग्न्यर्थमेवतत्। पदार्थत्वस्याकृति
विशेषरूपत्वज्ञुद्धर्थत्वेतिनविनाप्रकाशांतरेणतदाकारसंभवाद्धिपर्य्याप्तजैर्युक्तयत्नश्लक्षितक्रत्वपूर्वार्थत्वंवाकात्। आधानस्यतुश्रुत्स्यवगताह
ष्टरूपाहवनीयाद्यर्थत्वेपितद्रूपस्यान्यतःसिद्धानवगमेनवैयर्थ्यायोगात्क्लेशेनक्रत्वपूर्वार्थत्वं॥५॥ पवमानेष्टिष्वग्नयोतिदेशप्राप्ताः। तदु
त्पादनायासाःकार्याः। तत्राप्यग्न्यर्थमग्नाइतियावत्यएकेनाद्राभवंतितावत्यःकार्याइतिचेत्। पवमानेष्टिषुनताः। प्रथममनाहवनीयेकर्त्त
व्याः। ताभिरग्निसिद्धावन्यवैयर्थ्यमसिद्धावपिश्रुतत्वंअतिदेशात्सामानामप्यसंभवेनबाधात्। इष्टीनामग्न्यर्थत्वेआधानांगत्वेवाऽग्निसाध्यानांत
त्साधनत्वायोगात्पवमानेष्टीनांदर्शाद्यंगत्वमनाशंक्यमितिनातिदेशात्पवमानेष्टिषुइष्टसंतरप्राप्तिः। अंगत्वेप्येतद्विधिवेलायांप्रकृतसंगत्वसि

द्धा तदिति रिक्तस्यैवातिदेशात्॥ ६॥ ज्योतिष्टोमे त्रयः पशवः तेष्वग्नीषोमीयः क्रमस्तन्निधानुत्सवनोपिसस्त्वउपवसथीयेहन्यद्दैवसः पशुरा
 लभ्यत इति वचनादौपवसथ्येहन्यनुष्ठीयते। सवनीयस्त्वौपवसथ्ये सौत्ये च श्रुतः आग्नेयः पशुरग्निष्टोम इत्यौपवसथ्ये आश्विनं ग्रहं गृही
46 त्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति सुत्यायां गोरन्वंधस्त्वव भूपांते पुतः पशुधर्माश्च यूपछेदपश्चौपवसथ्ये समग्राः श्रु
ताः ते चाग्नीषोमीयस्य पशुधर्माणां वानुष्ठानसादेश्य लक्षणात्स्थान प्रमाणांवापित्वास्यौतिष्टोमिकमहाप्रकरणान्नेषां तदंगत्वे प्राप्ते सोमया
गानुपपन्नाः धर्माश्चानर्थका न तदंगत्वापेनांगभूतपशुयागोत्पत्तरं तोऽविशेषात्त्रिष्वप्यवतीर्णास्त्रयाणामप्यंगं भवेति। न च सवनीयस्य न सो
मयागद्वारकं प्रकरणं औपवसथ्य एव ग्रहणानाकृष्टधाक्षिकविधिना तद्विधानात् सुत्यायां त्वाश्विनग्रहग्रहणोत्तरकालविधौ संक्रान्ततयायाग
विधायित्वात्। अतो वांतरप्रकरणान्तदर्था एव धर्मा इति वाच्यं। प्रसाकालो सन्नद्धस्य यागानुवादेन च पपा प्रातःसवने प्रचरति साधं दिनसव
नेषु होडाशेनां गेस्तृतीयसवन इत्युपादेयगुणाविधिसंभवादौपवसथ्ये सन्नद्धस्य कर्मानुवादेन कालस्यानुपादेयस्य विधातुमशक्यतया काल
विशिष्टकर्मण एव सुत्यायामुत्पन्ने रवांतरप्रकारणस्योत्पत्तिविधिविधुरौपवसथ्येहन्यनुन्मेषात्। न च प्रातःसवने वपाप्रचारद्वारौपवसथ्योत्स
न्नस्यापि सन्निधानात्कालविधिर्युक्त इति वाच्यं। तथा ह्युपाकरणादीनां वपाप्रचारान्तानां कालिकानां प्रातःसवने विपरिहृत्य भावेन तत्र कालविध्य राम॰
योगतादवस्थ्यात्। तस्मात्सवनीयस्यांवान्तरप्रकरणाभावादग्नीषोमीयस्यानन्यदुर्बलत्वाज्ज्योतिष्टोमिकमहाप्रकरणद्वारकसंबंधस्त्रिष्वपितुल्य

इति तु स्यात्तद्धर्मसंबंधउपदेशादिति चेत्। पशुधर्मास्तु देशगाः। भवेदानर्थक्यात्तदंगस्यायोपदिसा हस्तद्धर्मग्राहि पशुयागो निकटेन स्यात्। शक्नोति
त्वग्नीषोमीयस्तत्रानुष्ठीयमानस्तद्धर्मान्ग्रहीतुमिति तदर्थ एवोपदेशात्तो धर्माः महाप्रकरणस्यापि तावतैवोपपन्नत्वेनाविरोधात्। अग्नीषोमीयाद्वा व
ष्पति देशो न धर्मान्गृह्णीत इति यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति वाक्योत्पन्नो देशः। तद्गाः पशुधर्माः ७ दर्शपूर्णमासयोः सायंदोहः पूर्वेद्युः प्रातर्दो
हो परेद्युः कपालोपधानानंतरं क्रियते शाखाच्छेदादयस्तु केचन धर्माः पूर्वेद्युः क्रियमाणाः सन्निधानात्सायंदोहार्था इति चेत्। उभयार्था दोहध
र्माः प्रकरणात्। दधियागस्यापरेद्युरनुष्ठीयमानस्यस्थानस्याप्यभावात्। दध्नः सांनाय्यार्थ दोहनांतं च न शाखाच्छेदादेश्च गुणानां च परार्थत्वादिति
न्यायेन परस्परं गांगिभावायोगात्। तस्मात् उभयार्थाः। ८ चात्वालः सवनसन्निधावुपोत्पन्नग्रहाः साद्यंते तु योन्ते ध्रुव इत्याम्नातानां सन्निधानात् संदेहात्स्या
तः सवनार्थतेति चेत्। ग्रहधर्माः। समस्तगाः। सवनत्रगाः प्रकरणावलीयस्त्वात् ९ अग्नीषोमीये यूपपरिव्याणांप्रतं पत्नीव्ययं स्रुचैश्चरेशनेति सवनी
ये प्याम्नित्वे ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययतीति तत्र स्थानाद्धर्माः त्रिवृद्बर्हिषि तदर्भमयीभवतिप्रविशानांकर्त्तव्येत्रैव माद्यः क्रमादग्नीषोमीया
र्थ इति चेत्। परिव्याणादयस्यापि सधर्म्म प्रशानासमाप्य पमिति द्वितीयानुसारश्रणात्तद्धर्माणां एतयूपार्थत्वावगमात् स्थानबाधः १० पूर्वोक्ता ग्रह
धर्माः प्रकरणात् तत्रास्नातानामेव स्युः नानारभ्याश्रुतानामदाभ्ययोरिति चेत्। ग्रहधर्माः समाम्नातामवं स्यर्थ्यंदाभ्ययोः। प्रकरणायागार्थानां तथा
गस्याधनग्रहमात्रनिवेशादंशुदाभ्ययोरपि तत्साधनत्वात्तद्धर्मत्वं ११ अग्निचयने समाम्नाता इष्टकाधर्माः अरत्नउामरुक्मा नित्यादयः अप्रकरणा

४७ धीतानां नमवंति विनियोजकवाक्यस्याप्यप्राकरणिकत्वेन तद्वारकप्रकरणसंबंधस्याप्यभावादिति चेत्। एवमेवेष्टकाधर्मोऽग्निचित्या
दिषु संगताः। अप्राकरणिकवाक्येनापि द्वारस्यानुवादेन तत्पूर्वसाधनसंबंधनात्तत्साधननिवेशिनो धर्मास्तास्वपि स्युः १२ ज्योतिष्टोमे राजन्या
दिनिमित्तः फलचमस इज्याविकार इति स्थिते सोमेन समानविधानत्वादुपदेशेनैवापूर्वसाधनांशे विहिताभिषवादीन् गृह्णातीति व्रीहिषु श्रु
तावघातादीनिवेयवा इति चेत्। स्तिमिनीनां न सोमेन स्यात्समानविधानता। व्रीहियवयोरनुष्ठानतोऽनित्यत्वेऽपीतरेतरानालोचनेन विहित
योराम्नानतो नित्यत्वादनुष्ठानतो नित्यद्वाराभावानुल्लवद्धर्मग्राहित्वं युक्तं। निमित्तेष्ट्रूपमाणोनुष्ठीयमानश्च फलचमसो न त्वेवदाम्नातानां नि नि
त्यवदपूर्वसाधयतां धर्माणां ग्राहीभवितुमर्हति अभिषवादिधर्मैर्नित्यवत्क्रतोरुपकुर्यादनित्यफलचमसद्वारेत्यनुपपत्तेः। सोमस्तु आम्नानतो
नुष्ठानतश्च नित्य इत्युक्तं यद्द्वारतां प्रतिपद्यते धर्मविधीनामपि नित्येष्टधर्मविधायचरितार्थानां निमित्तानालोचनेन पश्चाद्विधीयमानफलचमसस्वा
र्थविधानं नाद्दष्टाविनास्यात्। तस्मादतिदेशात एव धर्माः। न तु निमित्तिनीत्वेन द्वारत्वे उक्तदूषणानि नापूर्वसाधनत्वेन। तद्रूपस्य सर्वदा सर्वांश्रत्यव्य
भिचारात्। यथा नीवारपूतीकयोस्तात्रूप्येणानित्यत्वप्यपूर्वीयत्वेन नित्यसमानयासामानविद्धं व्रीहिसोमाभ्यां। न च विधिवाक्ये तत्त्रूप्येणानयोरवि
धानाद्व्रीहिसोमावयवानुसृत्यात तद्रूपेणैव विधानाद्द्विजातीयाकारस्यावर्जनीयत्वेन ग्रहणान्न दोषः। क्षितभीणानां तु न सोमावयवविवक्षयावि राम०
धानं किं तु निमित्तेनातेन रूपेणोतिवैषम्यमिति वाच्यं। तर्हि व्रीहित्वेनैव विधिवाक्ये तेषां विधानान्नचश्रुतावघातादीनां प्रवेशः प्राप्नुयात्। यदि च ४७

तत्रापूर्वीयत्वेनैव तेषां शेषित्वाद्यवेष्टेः पितृरूपत्वात्तन्मात्राभिः तर्हि स्तिभिनीनामपि स्वरूपे धर्माणां वैयर्थ्यात्सोमे शेषिकापूर्वीयत्वेनैव शेषित्वमिति
तुल्यं तस्मादत्र कथं सिद्धांत इति केचित् १३ मुख्यद्रव्याद्यभावे नीवारादि प्रतिनिधिर्वक्ष्यते तत्रापि पूर्वाधिकारात्सिद्धांतवदुक्तेन सद्वारत्वादसमा
नविधानत्वमिति चेत् । व्रीह्यवयवविवक्षये वसकलासंभवे विधानान्नानित्यद्वारत्वमिति समानविधानता १४ यदि सोमं न विंदेत् पूतीकानभि
षुणुयादित्यत्र मुख्याभावे निमित्ते पूतीकत्वेन विधानात्फलचमसवदसमानविधानत्वेति चेत् । पूतीकानां तथैव साधनाभावे विधिः प्रतिनिधि
नियमोयमिति पक्षे वक्ष्यते । तथा च पूर्ववत्समानविधानता १५ ज्योतिष्टोमस्य वचनैः संस्था अग्निष्टोम उक्थ्यः षोडशी अतिरात्र इति । तत्राग्निष्टो
मसंस्था कर्तव्या । फलाश्रवणात् । अस्मात् स्वः कृत्वा श्रिताः फले विधीयंते । पशुकाम उक्थ्यं गृह्णीयात् षोडशिना वीर्यकामस्तुवीत अतिरात्रेण
प्रजाकामं याजयेदिति पशुकामवाक्ये । उक्थ्यशब्देन संस्थोच्यते न ग्रहणं तत्र तस्य वाच्यत्वात्तत्र संबंधेन लाक्षणिकत्वात् । संस्थायामपि स्तोत्रसं
बंधेन लक्षणेति चेत् । न । तत्संस्थक्रतौ विवक्षितस्तोत्रसंबंधषोडशपात्रद्वारप्रयोगात् । तत्र चाहुत्यधिकरणन्यायेन संस्थायाः एव वाच्यत्वात् । न च
स्तोत्रस्यैव फले विधानं । तस्य नपुंसकशब्दवाच्यत्वात् संस्थायां चाश्रयतो लिंगलाभात् अत्र चोक्थ्यषोडशिशब्दयोर्विकारशेषात्तल्लिंगत्वाच्च ग
मात्संस्थयोरेव फले विधानं ग्रहणस्तोत्रयोश्चानुवादमात्रं अतिरात्रशब्दस्तु रात्रिमतीसमाप्यमानक्रतोर्वर्तमानोपि क्रतोः सोमेन यजेतेति वि
हितत्वात्समाप्तिरेवात्र विधेयेति तस्या एव फलं । एवं सर्वासां संस्थानां फलसाधनत्वे दीक्षणीयादीनां अंगानां आश्रयीभूतयागस्य संस्थानां च स

४८ 48 मानविधानानि सर्वस्यापि फलवत्त्वेन प्रकरणविशेषादिति चेत्। स्वाश्रयक्रियया संस्थानसमानविधानकाः दृष्ट्यादिवदाश्रयाकांक्षाणां
संस्थानामाश्रयक्रियानिरपेक्षत्वे तयांगत्वं बाधायोगात् क्रियायाश्च स्वयं फलवत्त्वात् संस्थाभिर्विनाप्यंगसंबंधोपपत्तेर्विशेषग्रहणात्त तुल्यवदं
गग्राहित्वात्। तथात्वे चांगविधीनां प्रधानविद्योतकवाक्यतयाप्रयोजनपर्यवसायिचात्रिसानित्यप्रयोगदृष्ट्यानुसारेणानित्यवदनित्यवच्चस्वार्थ
विदधतां आवृत्तिः स्यात् तथा फललाघवविधेयत्वगुणत्वप्रयुक्तं संशभावनाश्रयतयातत्तांगानि विधाय दर्शाद्विधीयमानगुणकरणिका
यामपि भावनायां स्वार्थविधानादावृत्तिः स्यात् सोमतंत्रसंस्काराणामाश्रयक्रियामात्रार्थतया द्विविधविधिविधेयानामारादुपकारकांगानां
तद्वत्तत्प्रकरणेनाश्रयक्रियाप्रत्वेत्वांगतयाश्रसंबंधिसंस्कारविधिनिर्विशिष्टेन प्रकरणाः संस्थाः न दीक्षणीयायांग्रहणे समर्था इत्यतिदेशा
देवतत्वं गप्राप्तिः आश्रयक्रियार्थानुष्ठितैरंगैरेव प्रसंगासिद्धेर्न पृथक् क्रियंतेऽतो न समानविधानाः॥ ६॥ ॥इति लघुवार्त्तिकटीकायां तृतीय
स्याध्यायस्य षष्ठः पादः॥ ॥दर्शपूर्णमासयोर्वेदार्थं बर्हिर्बिहर्वीष्यासादयति वर्हिर्लुनाति वेदिं खनति इत्यादिना विहित वेदिवर्हिस्तद्धर्माः प्रकर
णात्प्रधानमात्रमात्रार्थाः वाक्यश्रुतिभ्यां हविर्वेद्यादिमात्रार्थत्वे वैयर्थ्यात्प्रयोगांतरवेदिहविरायतिप्रसंगाच्चेति चेत्। अंगप्रधानहविषां वे रा.म.
दिधर्मादयः समानाः वाक्यसंकोचपरिहाराय प्रकृतदर्शपूर्णमासोपकारिहविर्मात्रग्रहणेऽप्यंगहविषां स्वस्वापूर्वे निर्हृतिद्वारा प्रधानोपकारित्वे
नवैयर्थ्यप्रसक्तेः सत्यपि वा प्रधानमात्रार्थत्वे प्रकृतप्रयोगसंबंधिहविर्मात्रस्य द्वारत्वोपपत्तेरंगप्रधानार्था वेद्यादयः ७ ज्योतिष्टोमे यजमानसंस्का ४८

यः केशश्मश्रुवापादयः कर्तृसंस्कारकाः संतस्तद्द्वारांगप्रधानार्था भोक्तृसंस्कारकत्वेन फलार्थत्वे कस्मात्तु स्यकस्य तापन्ने इति चेत्। प्रधानार्थाः पु
नः केशश्मश्रुवापादयो समाः। भोक्तृत्वांशस्य प्रधानत्वाददृष्टत्वेन प्राप्तेऽपि कर्मत्वात् कर्तृंशस्य तु तद्देहरीसात्फलप्रतिग्रहयोग्यता धाने विफलसा
धनत्वाबोधनेन कस्मात्तु स्यतानापन्नेः प्रधानार्था एवं वपनादयो नांगार्थाः ३ सोमिकी वेदिः प्रधानसमानार्था इयति शक्ष्यामहे सां कर्तृपितिफलवच्चि
कीर्षितप्रधानार्थत्वावगतेरिति चेत्। वेदिरंगप्रधानानां प्रचारदेशो मिकी समा। सांगस्य फलवत्वेन चिकीर्षितत्वादंगप्रधानार्था वेदिरिति संगवि
कारपक्षादोषप्रवर्तते। न त्वंगेषु प्राकृती वेदिरस्तीति चेत् न उपदेशात्तद्द्वाधात् ३ दर्शपूर्णमासयोः चतुर्होत्रा पौर्णमासीमभिमृशेत् पंचहोत्रामावा
स्यामिति हविरभिमर्शनमंत्रो प्रधानसमानार्थौ पौर्णमास्यमावास्याशब्दयोस्तद्वाचित्वादिति चेत्। अंगप्रधानहविषां मंत्रो तदभिमर्शनो पौर्णमा
स्यमावास्याशब्दयोः कर्मबोधितया तयोरभिमर्शयोगाद्द्वितीयासप्तम्यर्थात् कृत्वा तस्मिंस्तस्मिन्प्रयोगे तेन तेन मंत्रेणेति पर्यवसानेंगप्रधान
हविरर्थता स्यात्। अत्र सन्निहितविधीति वाक्यांतरानुग्रहाश्च भवति। ४। ज्योतिष्टोमे दंडेन दीक्षयति द्वादशशतं दक्षिणेति च श्रुतं दीक्षादक्षिण
मंगप्रधानार्थं दीक्षाणां कर्तृसंस्कारकत्वाद्दक्षिणायाः कर्तृनतिद्वाराप्रयोगांगत्वादिति चेत्। सोमे प्रधानसमानार्थो दीक्षादक्षिणापासह। दीक्षाः सो
मस्य दक्षिणाः सोमस्येति तादर्थ्यषष्ठ्या प्रधानसमानार्थत्वावगमात् परं परामृश्यमाणार्थकार्ययोः प्रयोगात् समानार्थत्वं ५ यूपेष्यूपते। अर्द्ध ईमंततर्वेदिमिनो
त्यर्द्धं वहिर्वेदीतितत्र ईमंतर्वेदीतिविधिः वहिर्वेदीसर्थप्रापानुवाद इति चेत्। अन्तर्वेदी वहिर्वेदीत्यंततोऽस्य लक्षणा। वहिर्ईस्य नित्यवत्वाश्च

४९ भावाद्विधानेववाक्यभेदाद्दर्शयेवांतर्वेदीति विधेयोपरिसंख्यापन्नेः साभ्यां संविदेशो लौकिको लक्षितो पूर्ववदमानागलेन विधीयते ६ उतयत्तु
त्वंति सामिधेनीस्त्वद्द्वाकुरितिसोमो दक्षिणाह विर्द्धाने सामिधेनीयूपादिन्यर्थके हविर्द्धानं सामिधेन्यंगं विधीयत इति चेत् । देशः स्यात्सामिधेन्यंगं ह
49 विर्द्धानेन लक्षितः । कृतकरस्य हविर्द्धानस्य विधावपूर्वविधित्वानपेक्षितविधित्वयोः प्रसंगाद्दाहवनीयपश्चिमदेशस्य प्रकृतिशामस्य दक्षिणोत्तर
हविर्द्धानाधारस्यानियतप्राप्तस्य लक्षणावादेशविशेषस्य नियममात्रं विधीयते ७ दक्षिणायुक्तानि सर्वकर्माणि यजमानेनैव सांगानि कार्या
णि सामानाधिकरण्यात्मनेपदाभ्यां फलस्य कर्तृगामित्वावगमात्तस्य च सांगप्रधानसाध्यत्वात् । दक्षिणादानेत्वदृष्टार्थसर्वकरणाशक्तयजमान
विषयं वा शक्तः स्वयमेव सर्वं कुर्यात् स्यात्क्रशक्तानातिरिक्तमन्येन कार्येदिति चेत् । हविस्तागादितोन्यत्र कारणीयाक्रियेतरैः । दृष्टसंभवेऽदृष्टक
ल्पनस्य दानपाक्षिकत्वस्य च परिहाराय परिक्रयार्थत्वं दानस्य सांगकर्तृत्वं चांगेषु प्रयोजकत्वेनातो दक्षिणादानसागाभ्यामन्यत्र ऋत्वि
क्कार्यं ८ स च लिंगेकएव त्र्यावद्यादिसमाख्यानात तत्कर्मनिमित्तत्वेनैकस्मिन्नपि पावकलावकादिसमाख्याच दुपपत्तेरिति चेत् । होत्राया स्तेच भि
द्यंते संज्ञाचरणभेदतः ॥ अप्रवृत्तप्रवृत्तस्य कर्तुरभ्यर्थनात्मकवरणकालेतत्साध्यत्वेन ज्ञास्तरां हृणीत इत्यादिभ्यो वगम्यमानात्समाख्यानक्रियायोग
निमित्ताभवितुमर्हति वह्निनिचवरणान्यथासमात्येन विधीयंत इति दृष्टस्य वरणायोगाद्यावरणमृत्विग्भेदः तत्र महर्त्विजां होतृकाणां च मंत्रेणान्वन्ये रा.प.
षां लौकिकवचनेन वरणो न रक्तालं चयएवं हृतः स्वयं चैव मममानीति संकल्पयति तस्मिन् लोकवेदयोस्तत्र तत्समाख्यादर्शनाद्यजमानप्रार्थन त्विक्षं ४९

कल्माम्यामध्वर्युत्वादिकं साध्यं सत्रेषु सर्वेषां स्वयं प्रवृत्तेः संकल्पमात्रमेव निमित्तं । न चालौकिकमध्वर्युत्वादिकं तत्साध्यं । दृष्टान्तस्यार्थत्वेनैवोपपन्ना
वदृष्टकल्पनायोगात् । तथा च वरणभेदात्संज्ञाभेदाच्च तावतां भेदः ॥९॥ चमसाध्वर्यवस्तु यौगिका समाख्यया अध्वर्युपुरुषा एवेति चेत् । चमसाध्वर्यवस्ते
भ्यो भिन्नाः स्युः । वरणभेदात्तेभ्यो भिन्नाः स्युः । सदस्योऽपि वरणभेदादन्यः १० चमसाध्वर्यून्वृणीत इत्यत्र बहुत्वस्य संख्यार्थगतत्वेनाविवक्षितत्वादेकश्चम
साध्वर्युरिति चेत् । बहवः स्युः । क्रत्वंगतया तेषामुपादेयत्वाद्बहुत्वविवक्षा । वृतैश्चमसाध्वर्युभिः क्रतुं भावयेदिति । अत एव सत्राध्यायो ध्येतव्यः पुरोहितं वृ
णीते ऽध्वर्युं वृणीत इत्यस्यादावुक्तेः सोपादेयगतत्वाद्विवक्षिता संख्या । तथा चाध्वर्यवं सर्वमेकेनाध्वर्युणा कर्तव्यं । एवं होत्रादिसमाख्या तमपि होत्रा
दिभिः ११ चमसाध्वर्युगतं बहुत्वं कपिंजलन्यायात्त्रित्वरूपमिति चेत् । दश स्युः । चमसदशत्वात्तेऽपि दश १२ संज्ञाभेदात् शमिता तेभ्योऽन्य इति चेत् ।
शमिताध्वर्युपुरुषः स्यात्तु कश्चन । समाख्याया यौगिकत्वात्पृथग्वरणाभावाच्च परांङ्वर्त्तते ऽध्वर्युः पशोः संज्ञप्यमानादिति वचनादध्वर्यतिरिक्तः ।
न तु पुरुषः शमिता १३ उपगास्तेभ्योऽन्ये ऋत्विजां परस्परगुणाभावायोगात्तेषां च गुणत्वादिति चेत् । ऋत्विक्स्वेवोपगातारः । प्रैषप्रैषार्थकारित्वव
त् गुणाभावसंभवाद्वरणाभावात् यौगिकत्वाच्च समाख्यया ऋत्विज एव ते १४ सोमविक्रयी वरणाभावादृत्विङ्मध्यम एवेति चेत् । तद्भिन्नः सो
मविक्रयी । अक्रत्वर्थत्वाद्विक्रयस्य न ऋत्विजः कुर्युरित्यन्य एव सः १५ ये वृताः पुरुषाः ते सर्वे ऋत्विक्शब्दवाच्याः ऋतौ यजन्तीति ऋत्विक्शब्दः स्य दंतः
सर्वेषु तद्योगाद्यदृशद्ववदविशिष्ट इति चेत् वृतेषु ऋत्विजः केचित् । ब्रसायाः । वरणविशेषनिमित्तमृत्विक्त्वं न सर्वेषां । यद्यपि चमसाध्वर्युवरणा

५० व्याहृतमन्येष्वनुगतं वरणं तावतरणमात्रं नास्ति तथापि तत्तद्वरणविशेषा एव तावद्रूपेण निमित्तमिति भाष्यं। तथात्वे आर्त्विज्यदक्षिणेत्यादिना
ऋत्विक्त्वेन निपातनस्य आर्त्विज्यतद्धितस्य च बाधापत्तेः यौगिकत्वप्रसिद्धिविरोधाच्च॥ वरणविशेषनिमित्तत्वपक्षे न विशेषनिमित्तत्वेना
50 पि च भक्षाधिकृत्याहृतिसिद्धेः आर्त्विजो वृणीत इत्यस्याध्वर्युं वृणीते इत्यादिवदप्रसिद्धार्थत्वप्रसंगाच्च। तस्माद्यष्टृत्वविशेषनिमित्तमृत्वि
क्त्वं ब्रह्मादीनामेव १६ ऋत्विक्शब्दोपात्तनियम इति चेत्। ते तु षोडश॥ ऋत्विग्भ्यो दक्षिणां ददातीत्युक्त्वा अग्नीधे ददाति ब्राह्मणे ददातीत्यादिना षो
डशानां संकीर्तनान्नावं तत्र एव॥ १७ पृथग्वरणविधानात्सदस्यः सप्तदशः न च ब्रह्मैव सदस्यः तयोर्वरणभेदादिति चेत्। त्वामिसप्तदशास्ते स्युः। स
दस्यवरणस्याहृतार्थत्वात्सामान्येव सप्तदशः १८ षोडशर्त्विजां लिंगप्रकरणाभ्यां समाख्यां बाधित्वा यद्येन कर्तुं शक्यं स तत्कुर्यादिति व्यवस्थे
ति चेत्। तेषां कार्यव्यवस्थया। लिंगप्रकरणयोरितिपन्नकर्त्रादकयोर्व्यवस्थाकांक्षत्वात्समाख्योक्तनियममनुमन्येत। तस्माद्यथासमाख्यं राम०
नियमः तेषु यथोत्री यथा ज्ञमानादिविशेषसमाख्याभिर्विशेषवचनेषु सामान्यसमाख्या बाध्यते। यथा मैत्रावरुणः प्रेष्यति चान्वाह चेति प्रै
षेध्वर्योर्बाधः अनुवचने होतुः पूर्वोक्तसमाख्याविनियोगस्यैवायं प्रपंचः १९ यदाहवनीये जुहोतीत्यनारभ्याधीताहवनीयादेः प्रकृतिमात्रार्थ
त्वं पर्णतादिवदिति चेत्। अयमयस्तु सर्वयांतिहोमात्ता प्राकृतवैकृतानुः प्रत्यक्षद्वारत्वात्प्राकृतात्प्राकृतोपदेशिके वृष्ट्यग्निहोत्रचतुरवत्तग्र ५०
हणमात्रमनोपहोमादिद्विकृतादोषाभावाददातिदेशिकहोमवर्जमुपदेशादाहवनीयप्राप्तिः २० मैत्रावरुणः प्रेष्यति चान्वाह चेत्यत्र स

द्विनोद्देशेन प्रशास्तृविधौ वा कर्मभेदापातात् तयोरपि न कर्तृत्वमिति चेत्। प्रैषानुवचने पुरुषैकैकस्य वरुणकर्तृको एकैकात्मकः स्यप्रैषस्यानु
वाचनस्य च निर्ज्ञातकर्तृत्वेनानपेक्षितविध्यापातात् प्रैषानुवचनात्मकहोतापक्षे इत्यादेरुभयकर्तृत्वानुपपत्त्यातान्मां विशिष्टस्यापेक्षि
तः कर्तृत्वमिपात्मकमन्त्रोद्देशेन विधीयत इति न विशिष्टानुवादद्दोषः २१ विशेषसमाख्यया सामान्यसमाख्याबाधाच्चमसेष्वमसाधर्यव एव जु
हुयुरिति चेत्। चमसानां न होतारश्चमसाध्वर्युसंज्ञिताः। चमसेष्वध्वर्युवदिति चमसाध्वर्युव इति सामान्यसमाख्यापेक्षत्वात् न बाधकत्वमतो
ध्वर्युर्जुहुयात्तस्य ग्रहहोमादिव्याप्ततत्वेन पि जुहुयुः २२ सामवेदे विहितः श्येनः यजुर्वेदे वाजपेये प्रयुक्तोस्तैव सांगप्रयोगविधेरतिदेशाश्रमना
नाकर्तृनुवाधितो पदेशरूपप्रयोगवचनेन तन्नतः वस्तकर्तृक इति चेत्। श्येनादिषु स्तुतौ नैव कर्तारः प्रकृता विव। पदार्थप्रास्यपेक्षः प्रयोगवि
धिः सकर्तृकाणां पदार्थानामतिदेशतः प्राप्तिं प्रतीक्षत इति उपजीव्यविरोधेनोपदेशात्मकोपि तदनुसारेणोवनानाकर्तृकान्पदार्थान्विधत्ते।
समाख्यापाठनिमित्तानविधिनिमित्तापाठश्च पदार्थानां नाना वेदेषिति यथा प्रकृतिनानाकर्तारः २३॥ ॥इति लघुवार्त्तिकटीकायां तृतीयस्य
सप्तमः॥ ॥सोमे परिक्रयस्याध्वर्यव औद्गात्रे च द्वादशशतं दक्षिणोत्साधातः समाख्यावशाद् त्विग्भ्यां कर्तव्यः यजमानस्तादृशमुपायं मादि
ना कुर्यादिति चेत्। परिक्रयो याजमानः। परिक्रयाम्नर्वमृत्विजामभावात्यदिक्रीतानां वान्यत्रैव समाख्यया नियमा यजमानेनापि कस्यचित्क
र्तव्यत्वप्राप्तेर्नत्रियमार्थत्वात्परिक्रयवचनस्य यजमान एव तं कुर्यात्। यएतामिष्टकामुपदधाति सत्री त्वरान्द्वा दिसादो वचनादन्येनापि

९

५१ दातव्य १ केशश्मश्रुवपनद्रुतिश्रुताः श्मश्रुवापादयः समाख्ययाध्वर्योरिति चेत् ॥ श्मश्रुवापादयस्तथा ॥ याजमानाः फलसंस्कारा एते न क
र्तृगुणकाः यजमाने फलग्रहणयोग्यतार्थं क्रियंते। अध्वर्युस्तु गुणकर्तृत्वेनैव परिक्रीतो न तान्कुर्यात्। हिरण्यमालिन ऋत्विज इत्यादेर्व
चनादृत्विजामपि २ अहं नाश्नीतीत्यादिकायशोषणं तपः क्लेशात्मकत्वादार्त्विज्यमिति चेत्। तद्वत्तपः ॥ पवनादिवत्तयो विपाजमानं। फ
लोत्पत्तिप्रतिबंधकपापक्षयार्थत्वात् ऋत्विज उपवसंतीति वचनादृत्विजामपि ३ वाजपेये हिरण्यमालिनः प्रचरंतीति श्रुते हिरण्यमालित्वं
समाख्ययाध्वर्युप्रभृतीनामेवेति चेत्। हिरण्मय्यो मालाः सर्वस्य ऋत्विजः। प्रतिसंस्कार्यसंस्कारहेतुः सर्वेषां। गुणकर्तृष्वेव समाख्या नियामि
का ४ यदि कामयेत वर्षुकः पर्जन्यः स्यादिति। नीचैः सदो मिनुयादित्यत्र मिनोति सामानाधिकरण्यात्काम आध्वर्यवो यदि कामयेताऽध्वर्यु
रिति वाक्यादिति चेत्। सदोमानादिगुणगुरोर्यदुरेव फलं भवेत्। मिनुयादिति परस्मैपदश्रुत्या वाक्यस्थसामानाधिकरण्यबाधान्नाभिदग्धः प
र्यत इति विहितक्रत्वर्थस्यान्यदीयकामस्य गुणेन बाधायोगाच्च याजमान एव कामो यदि कामयेत यजमान इति। आत्मने यजमानाय वा यं का
मं कामयते तमागायतीति वचनादुद्गातुरपि फलं ५ अकरणमंत्रा आयुर्दा अग्नेऽस्यायुर्मे देहीत्यादयः समाख्यानादाध्वर्यवा इति चेत्। यजमानेन वक्त राम०
व्या मंत्राः स्युः प्रत्यगाशिषः। ते यजमानेनैव पठनीयाः कर्मफलस्य यजमानगामित्वेनाभिप्रेतत्वार्थत्वस्य न कर्तृत्वोचितत्वात्। ऋत्विग्भिर्दक्षिणा
यजमानादर्थनीया ऽतो लिंगात्समाख्या बाधित्वा यजमानेन वक्तव्याः ६ वाजस्येमां प्रसवेनेत्यादयः आध्वर्यवे याजमाने च पठिताः। केन विद्वक्तव्याः ५१

विशेषसमाख्यया यजमानेनैव वाससुरभ्यूहनस्याध्वर्यवत्वात्तत्प्रकाशकत्वेनैव वा वक्तव्यम् इति चेत्। आम्नातमन्त्रानाजस्येत्यादयः स्रुद्दयोर
पि। एकस्यापि मन्त्रस्य प्रकरणोद्दिष्टपाठानन्ययोग्यवचनोपसंग्रहात्सिद्धरूपमन्त्रस्य स्वरूपप्रकरणाग्राह्यत्वान्न दृश्येनैव क्रतुमध्ये मन्त्रपाठसि
द्धेः पाठद्वयस्यापि कर्तृद्वयाकांक्षायां समाख्ययाम्नायाद्वा व्यवस्थितविषयत्वान्नियम्येते ७ वाजपेये लक्ष्मीर्यजमानं वाचयतीत्यत्र तस्मात्तस्मात्तए
व वा वाचनीय इति चेत्। लक्ष्मीर्वाचयतीत्यत्र भवेद्यस्यैव वाचनं श्रुतत्वप्रकृतत्वप्रसक्तेः जस्यापि ब्रूहीति प्रारम्भोपपत्तेः जस्यैव वाचनं ८ दर्शपू
र्णमासयोरध्वर्यवे वेदमुपावसृज्य त्वामग्निश्च यतीत्यादिना प्रत्येकं ते ते पदार्था विहिताः पुनर्यजमानेनैव वत्सं चोपावसृजत्युत्वां चाग्निश्च यतीत्या
द्यनुकीर्त्य द्वादश द्वन्द्वानि संपादयन्नेते निष्कृते विशेषसमाख्यानात् द्वंद्वसंपादनस्य मानकर्तृकत्वात्मनेपदाभ्यां यजमानकर्तृत्वप्रतीतेर्यजमा
न एव कुर्यादिति चेत्। वत्सं चोपावसृजतीत्यादिरध्वर्युकर्तृकः। पदार्थानामाध्वर्यवे विधानात्तैरेव कर्त्रपेक्षायामाध्वर्यत्वप्रतीते यजमानेनानुवाद
मात्रत्वादध्वर्युणानुष्ठीयमानानां द्वंद्वशः सम्पादितो न प्रयोजककर्तृत्वे नापि समानकर्तृकत्वान्मनेपदयोरुपपत्तेरध्वर्युरेव कुर्यात् ९ अग्नीषोमी
ययपशावाध्वर्यवो यूपपरिव्याणमन्त्रः परिवीरसीति क्रियमाणानुवादी होत्रो मन्त्रो युवा सुवासा इति। तौ चोदकपरंपरया कुंडपायिनामयनाख्ये सं
वत्सरसत्रे प्राप्तौ तत्रेदं वचनं यो होता सोऽध्वर्युरिति तत्रापरिसंख्यस्वधर्महीनाध्वर्युशब्दलक्षिते तत्कार्ये विधीयत इति करणमन्त्रबाध इति चेत्॥
होतुराध्वर्यवं कार्यं विशेषेष्वर्युताजुषः। अध्वर्युताजुषः। अध्वर्युना नुषो होतुरेककालिकमन्त्रद्वयपाठनविरोधेश्चाध्वर्यवं कार्यं न होत्रं। प्रत्यक्षवच

१०

५२ नेनतस्यतत्कार्यविधानात्। होतुः स्वपदार्थकरणोस्मानुमानिकचोदकात्राप्यातेन तस्य वाच्यत १० प्रोक्षणीरासादयेत्यादिः प्रैषः प्रोक्षणासादना
दिः प्रैषार्थः तदुभयमाध्वर्यवं समाख्यानात्। लोटुप्राप्तकालतायामितिचेत्। प्रैषप्रैषार्थकर्त्रोर्भेदो विधियेते परस्परं। प्राप्तकालताया अप्यन्यं प्रत्येव
बोध्यतयासंबोधनमध्यमपुरुषादिभिरन्यकर्तृत्वप्रतीतिलक्षणाल्लिंगान्मैत्रावरुणस्य प्रैषार्थकर्त्ता ११ तत्राध्वर्युः प्रैषार्थकर्त्ता आग्नीध्रः प्रैषे पदा
र्थानां प्रधानत्वबहुत्वाभ्यां तत्राध्वर्यवसमाख्यावाधायोगात्। प्रैषस्य च तद्वैपरीत्यादिति चेत्। तत्राध्वर्युः प्रैषकर्त्ता समाख्याना विरोधतः। प्रैषस्या
ध्वर्यवत्वेन तस्य तत्र साक्षात्कर्तृतात्। पदार्थेषु प्रयोजककर्तृत्वेतिनक्वापि समाख्याबाधः। नाप्याग्नीदिति संबोधनविरोध इति स एव प्रैषकर्त्ता १२
ममाग्ने वर्च इत्यग्निसमिंधनार्थमंत्र आध्वर्यवः। इध्मानां तनुवं पुषेमेति कर्मकर्तृत्वेवप्रतीतेः। वर्चः प्रभृतिफलकवाक्यगतायुष्मदादिवत्फलमध्वर्योरेवा
ममेतिलिंगादितिचेत्। यजमानस्यैव भवेत्फलमध्वर्युमंत्राणां प्रधानवाक्यगतात्मनेपदश्रुत्या सांगप्रधानभावनाफलस्य सर्वस्य यजमानगामित्व
प्रतीतेर्ममयजमानस्येति चोपचारात्। यजमान एव वा ध्वर्युणा ममेत्युच्यत इति लिंगस्याबाधः १३ यन्नु मामा संताप्समित्यसंतापनं फलतत्क्रत्वर्थियाता
र्थमध्वर्युगतमेव यजमानस्येष्टमितिश्रुतिविरोधाभावाल्लिंगादध्वर्योरेवेत्याह। मामासंताप्समित्यादेरात्विजिगामित्वमिष्यते १४ भद्रं तन्नो सहेति
द्विवचनस्यास्वं ताग तिकत्वादध्वर्युयजमानयोरेवेत दित्याह। तन्नौ सहेत्यादिमन्त्रस्त्वात्विजोपि फलं भवेत् १५ बर्हिस्तद्धर्माणां पूर्वोक्तमंगप्रधाना राम०
र्थत्वं उत्तर विवक्षया प्राप्यते। सामान्यद्रव्यसंस्कारः सर्वशाकृतकर्मणां १६ बर्हिषा पूर्णमासे व्रतमवः स्तृणातीति श्रुते बर्हिषि तद्धर्माः कार्याः स्तेषामंगप्र ५२

धानार्थत्वोक्तेरिति चेत्। स्रुपावदानस्य बर्हिर्द्धर्मोऽत्र गच्छति। प्राकृतकार्यैक्ये वातिदेशाद्धर्मप्राप्तेर्यूपावदानस्य बर्हिषस्तत्प्राकृतकार्यत्वान्न तत्राति
देशः १७ प्रकृतौ पवित्रार्थविधृत्यर्थबर्हिषोस्तु द्वयं तद्धर्मवदित्याह। पवित्रार्थे विधृत्यर्थे बर्हिषी प्रकृतावपि। पवित्रार्थे बर्हिषी विधृत्यर्थे च बर्हि
षी प्रकृतावविनत्तद्धर्मानार्हतः यथा लूनास्तन्नासादितस्य वेद्यास्तरणे विनियोगादसंस्कृतादेन च पवित्रादि १८ पुरोडाशशकलमैंद्रवायवस्य पा
त्रे निदध्यादित्यस्मादौ सवनीयहविषां यागार्थानामन्यत्र विनियोगाद्योगात्सयस्माधंतरमुत्साद्यमिति चेत्। सवनीयपुरोडाशशकलस्य ग्रहो भवेत्।
पयस्यादेरित्यपि द्रष्टव्यं। यागीयसंस्कारार्थत्वस्यावगमात् नान्यत्र विनियोगः १९ यज्ञार्थवरणं वै काम्याद्रष्टव्यः। तादर्थ्यं पांशुकर्त्तव्याइति श्रुतमुपांशुत्व
मंगप्रधानार्थं सर्वमंत्रेषु स्यात्। उच्चैः प्रवर्ग्येण प्रचरंतीति श्रुतौच्चैस्त्ववदिति चेत्। उपांशुत्वं प्रधानार्थं काम्यास्विष्टिषूच्चोदितं। तादुपांश्विति प्रलार्थ
प्रधानकर्मिकायां क्रियायां श्रूयमाणमुपांशुत्वं तन्मात्रएवस्यात्। प्रवर्ग्ये तु तत्कालिकार्यांसांगभावनायामुच्चैस्त्वं श्रुतमिति विशेषः २० रूपेनेदृति
नवनीतमाज्यं भवतीति श्रुते पूर्वमाज्यस्य प्रकृतत्वादिति नवनीतप्रकृतिकत्वविशिष्टं विधीयमानमाज्यं प्रकरणात्प्रधानार्थं सत्सोमं बाधतइति चेत्।
रूपेणांगार्थं दृतिनवनीतस्य ग्रहणं मतं। अतिदेशप्राप्ताज्यानुवादेन तत्प्रकृतिकत्वमात्रविधौ लाघवात्। यथा प्रकृते अंगेष्वेवेति न सोमबाधः २१ तत्रैव
सह पशूनालभत इति विहितं साहित्यं सुत्याकालीनं अग्नीषोमीयानुबंध्ययोः स्थाने पुरोडाशाभ्यामनुग्रहवचनात् तद्रूपेण वैशेषिकांगत्वा
दाज्यमपि सुत्याकालीनांगार्थमिति चेत्। अंगेषु तदिदं सुत्याकालेष्वेवेति नेष्यते। न तत्र वैशेषिकांगत्वकृतं सुत्याकालत्वं किंतु प्रधानप्रत्यासन्नित्व

ष्टत्वं रहस्तु वाक्याद् विशेषेण सर्वार्थगम्यमानं नानुमानात् संकोचमर्हतीति सर्वार्थं २१ शाक्यानामयनं नाम षट्त्रिंशद्वार्षिकं तत्र श्रूयते संस्थिते सं
५३ स्थिते हनि गृहपतिर्मृगयां याति स यान्मृगान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशा इति। तत्र पुरोडाशोद्देशेन तरसमयत्वविधानात्तस्य च सवनी
यत्वेन विशेषणे वाक्यभेदापत्तेः सर्वपुरोडाशविषयं तरसमयत्वं। सवनीयपदं तु लिंगसमवायात् सवनीयाः सवनीयविषयमनुवाद इति चेन्न। सव
नीयपुरोडाशा एव स्युस्तरसात्मकाः। सवनीयोद्देशेन तरसमयत्वमस्य वा याद्विधीयते पुरोडाशपदं तु लिंगसमवायाद्विर्मात्रानुवादः। अतः स
वनीयपदं मुख्यार्थमविष्यति नापि विधिशिष्टानुवादकृतो वाक्यभेद इति ॥ २२ ॥ ॥ इति सुवार्त्तिककारीकायां तृतीयस्याष्टमः पादः ॥ ॥ समाप्तश्चाध्यायः
॥ ॥ श्रीगणेशाय नमः ॥ ॥ शेषशेषिविचारानंतरं तद्हेतुकः प्रयुक्तिविचार आरभ्यः स च केषुचिदधिकरणेषु क्रत्वर्थपुरुषार्थविचारद्वारा क्रि
यत इत्याह। अथ प्रयुक्तौ क्रत्वर्थपुरुषार्थविचारणा। अथ शेषशेषिविचारानंतरं प्रयुक्तौ प्रयुक्तिविचारार्थं क्रत्वर्थपुरुषार्थविचारणा क्रियत
इति शेषः यः शेषी स सर्वः प्रयोजक इति न नियमः किंतु यः प्रयोजकः स शेष्येवेति। प्रयोजकत्वं नामानुष्ठापकत्वं तत्र यद्यपि विधेरेव तथा
पि यदुद्देशेन यदनुष्ठापयति तत्प्रयोजकमित्युपचर्यते यद्वा क्रियामनुष्ठापयन् विधिः अनन्यप्रयुक्तं तद्विशेषणमपि यत्रानुष्ठापयति स प्रयोज
कः। यत्तु विध्यन्तरप्रयुक्तं विशेषणं तदन्येनैवानुष्ठापितत्वान्नासावनुष्ठापयतीत्यप्रयोजकमुच्यते यथा पुरोडाशश्रपणविधिप्रयुक्तस्य कपा राम॰
लस्यानोपवापविधिरिति १ वक्ष्यमाणयोः क्रत्वर्थपुरुषार्थयोर्लक्षणमाह। क्रत्वर्थपुरुषार्थौ तु क्रतुपुंप्रीतिसाधनौ। क्रतुसाधनं क्रत्वर्थं पुंप्री 43

तिसाधनं पुरुषार्थं। पुंप्रीतिसाधनमित्यत्र द्वंद्वैकवद्भावः प्रीतिशब्दः पश्वादिफलोपलक्षणार्थः तदपमर्थः भावनाकथंभावपूरकं क्रत्वर्थं।
करणं फलं च पुरुषार्थमिति २ विधेयभावनाविशेषणत्वात्फलस्यापि विधेयत्वमिति चेन्न। फलं च न विधेयं स्याद्भागादेव प्रवृत्तितः॥ ३॥ गो
दोहनादेः क्रतूपकारकत्वात्क्रत्वर्थत्वमपीति चेत्। गोदोहनं न क्रत्वर्थं। तादर्थ्ये पशुफलकामोद्देशेन विहितत्वात्तस्यान्योपकारकत्वाविरोधा
त्स्फलप्रयुक्तमेव न क्रतुप्रयुक्तमिति ४ वर्णभेदेन द्रव्योद्देशेनोपायनियमः स्मर्यते। ब्राह्मणस्य याजनादिः क्षत्रियस्य जयादिः वैश्यस्य कृ
ष्यादिः शूद्रस्य सेवादिः सर्वेषां दायादिरिति स क्रत्वर्थ एव। अन्यथा तद्वैयर्थ्यात्। यत्र स्वरूपस्योपायान्तरेणापि प्राप्तेः तत्कार्यस्य दृष्टस्तु त्रिवृत्ता
देरपि येन केनचिदर्जितात् तद्भावात्। क्रत्वदृष्टं तन्नियमं विना भवतीत्यत्र मानाभावात्। नियमेनार्ज्यमानं क्रत्वर्थमिति चेत्। न च द्रव्यस्य वार्जनं। क्र
त्वर्थमित्यनुषङ्गः। अर्ज्यमानद्रव्यात्पुरुषप्रीतेः प्रत्यक्षत्वान्नापूर्वसाधकक्रतुशेषत्वं प्रकरणाभावात्। अर्जनस्य च रागप्राप्ततयाऽविधेयत्वात् द्रव्यस्य
क्रत्वैकान्तिकत्वे जीवनलोपात्सर्वक्रतुलोपापत्तेः। अतः पुरुषार्थो द्रव्यपरिग्रहः क्रतोऽपि पुरुषार्थत्वेन भुज्यादिवद्वैषिना। नियमस्य तु दृष्टाभाग
त्पुरुषार्थार्जनाश्रितत्वाच्च पुरुषार्थत्वं। तथा चान्यथार्जयन्प्रत्यवेयादिति कल्पते। ५। नेक्षेतोद्यन्तमादित्यमित्यादिस्मर्तं तत्र नञ आख्यातसंबंधे
न प्रतिषेधोऽयं। प्रत्यर्थलाभात्। न जीक्षति नानीक्षणसंकल्पलक्षणा। प्रतिषेधस्य प्रतियोग्याकांक्षायां कृतं गमादित्यदर्शनं शीघ्रमुपस्थितं भ
वतीति तत्कालीननिषेधोऽपि तदर्थः। एवं फलं न कल्पमिति चेन्न। नादिनोद्यन्तमिति। तस्य व्रतसचारिणो व्रतमित्यनुष्ठेयं वाचि व्रतशब्देनोपक्र

५८ मात्यर्युदासस एवायं तस्य चक्रत्वं गतत्वग्रहणकाभावात्। एतावता हि तेन सोऽपुक्तो भवतीति वाक्यशेषावगतपापक्षयः फलमिति पुरुषार्थः। द्यास्य
स्य कपालानि चेत्युपक्रम्य एतानि वै दशयज्ञायुधानीति श्रुते यज्ञशब्देन प्रकृताग्नेयादियागोपवादेन आयुधशब्दलक्षितस्फ्यादिद्रव्यं प्रदे
5४ यत्वेन विधीयते। वाक्यावैयर्थ्यापेतिचेत्। अन्यानुक्तिर्यज्ञायुधश्रुतिः उपस्तवगतपुरोडाशाय वक्तृत्वात् यागानां ते भूत्यन्त्रपिष्टद्रव्यानिवेशा
योगात्। यज्ञायुधानि संभरंतीति वाक्यापेक्षितसमर्पणाय स्फ्येनोद्धन्तीत्यादिवाक्यशेषानुवादः ७ पशुनायजेतेत्यत्र पदश्रुत्युपात्तमेकत्वं पश्वं
गं न वाक्याद्यागांगमिति नद ननु षष्ठानेपि कत्व वै गुण्यादविवक्षितमिति चेत्। पश्वेकत्वं श्रुतं यज्ञे कारकत्वं प्रपद्यते। विभक्तिश्रुत्या प्रधानकार
कांगतया तद्वारा वाक्याद्यागांगस्य न पदश्रुत्या द्रव्यांगत्वं। पश्वालंभनाम्नावेन पार्ष्णिकोद्रव्यसंबंध इति विवक्षितमेकत्वं ८ लिंगं त्वलिं
गे वृक्षादौ। विपरीतलिंगेपि पीलकादौ च दर्शनादविवक्षितमिति चेत्। लिंगमप्यस्य च पशोः प्रधानार्थत्वाद्विवक्षितं सिंहः सिंहीत्यादौ प्रती
यमानत्वात्तन्न छत्रवाच्यं कारकसात्कृतं विवक्षितं। ९॥ उक्तमप्रयाजादयो नादृष्टार्थाः। यागांतरदेवताद्रव्यसंस्काररूपदृष्टप्रयोजनलाभा
त् इति चेत्। सागांशेनादृष्टमपि कुर्युः। स्विष्टकृदादयः। देवतास्मरणाप्रक्षेपांशप्रायोक्तथात्वेनापि न्यागांशस्यानन्यप्रयोजनत्वान्न दंशो दृष्टार्थः राम०
१० ननु प्रयुक्तिविचारस्य लक्षणार्थत्वे शेषशेषित्वविचारः स्तत्र नत्राग्रे किमर्थो तत्राह। प्रयुक्त्यर्थो परियं शेषशेषित्वस्य विचारणा। तद्धेतुत्वेन
तद्विचार इत्यर्थः ११ तप्तेपयसीत्यारभ्य वाजिभ्यो वाजिनमित्यत्र वाक्यश्रुतदध्यानयनमामिक्षा वाजिनोभयप्रयुक्तमुभयजनकत्वलिंगात् ५८

आमिक्षाया अप्यप्रत्यक्षकठिनत्वाभ्यां पयसोऽर्थान्तरत्वादिति चेत्। वाजिनं न प्रयोक्तव्यं स्याद्दध्यानयनकर्मणः। आनयतेर्द्विकर्मकत्वेन पयनयस्य
र्थकर्मद्ध्नाव्याप्यमानतया पयसः प्रधानकर्मणः। तत्पदे न परामर्शात् त्रिलिंगामिक्षापदयोर्निसानुवादत्वाज्जुमर्तापुरुस्पपय इति मन्त्रव
र्णाच्च पयस एवामिक्षा। मधुरत्वविशेषस्यैव पयस्त्वव्यंजकतया तद्दर्थ्यमिवादिद्वत्वानपेक्षत्वात्। अम्लत्वस्य च संस्कारकदधिधर्मत्वात्तत्सं
स्कार्यस्यैव संस्कारप्रयोजकतया आमिक्षाप्रयुक्तमेव दध्यानयनं न कदुदस्तवाजिनप्रयुक्तं १२ एकहायन्या क्रीणातीति प्रकृतस्य षट्पदान्व
न्वनिक्रामति सप्तमं पदं गृह्णातीति। यद्धि हविर्द्धाने प्राचीप्रवर्त्यं यं प्रत्ताहितेनाक्षमुपांज्यादिति च श्रुतं एकहायनीनयनमन्यतरेणाप्यसंयुक्तं स
न्निधानाविशेषाद्द्वाभ्यां जनकयाभ्यां प्रयुज्यत इति चेत्। नयनस्यैकहायन्यानाशस्याभ्यंजनक्रियाः एकहायन्याः नयनस्याऽञ्जनाभ्यंजनक्रि
यानप्रयोजिका। नयनस्य क्रयसाधनद्रव्यसंस्कारकतात्तद्वारा क्रयार्थस्य तत्प्रयुक्तत्वात् १३ पुरोडाशकपालेन तुषानुपवपतीत्यत्र तृ
तीयाश्रुत्या कपालस्योपवापांगत्वात्तेनापि प्रयुज्यते कपालमिति चेत्। नोपवापः कपालस्य पुरोडाशार्थेन कपालेनेति तदर्थोपात्तस्य वि
नियोगप्रतीतेरप्रयोजकस्तुषोपवापः कपालस्य १४ अग्नीषोमीयपशोर्हृदयस्याग्रेऽवद्यति शूलप्रविध्यति लोहितं निरस्यतीति श्रुतं। त
त्र हृदयादि शूललोहितं च पश्वालंभप्रयोजकं सन्निधानाविशेषादिति चेत्। न शूललोहिते पशोः। दाशमिकन्यायेन हृदयादीनामेव हवि
ष्ट्वान्नस्य छतिः पशुस्तैरेव प्रयुज्यते। शूललोहितनिरसनं तु हविषः प्रतिपत्तिः १५ उत्तरार्द्धात्स्विष्टकृते समवद्यतीत्यत्र श्रुतः स्विष्टकृद्यागः

५५ उत्तरार्द्धहविरंतयोः प्रयोजकः सन्निहितानां प्रधानयागदेवताभ्यस्यमानत्वादिति चेत्। स्विष्टकृत्करणीयः स्यादाग्नेयापुत्तरार्द्धतः॥ उत्तरा
र्द्धशब्दस्यैकदेशवाचिनः संबंधिद्रव्यालोभे अर्थापर्यवसानात्सन्निहितानामेव संबंधः प्रतिपन्नत्वाद्वचनाच्च विनियुक्तस्यापि विनियोग
55 प्रयोजकः। स्विष्टकृत् १६ प्रयाजशेषेण हवींष्यभिघारयतीति श्रुतमभिघारणं हविःसंस्कारः। द्वितीयातृतीयाभ्यां हविषां शेषस्य चाभिघा
रणं प्रतिकर्मकरणत्वप्रतीतेः। उपयुक्तशेषसंस्कारादुपयोक्ष्यमाणानां हविःसंस्कारस्य न्याय्यत्वात्। ततश्च वाजपेयेपशातः सवनानुष्ठितप्रयाजशेषो
ब्राह्मणस्पत्यमालभत इति वाक्यान्माध्यंदिनसवने प्राजापत्यालंभोत्कर्षपक्षे तद्धयानां सर्वपशुहृदयादीनां च संस्कारलोपापायपातांतरे धर्त्र्योज्झ्या
पादृष्टत्वादिति चेत्। प्रतिपत्तिः प्रयाजाज्यावशेषस्याभिघारणं। शेषप्रतिपत्तेरपेक्षितत्वाज्जुहूरिक्तत्वापादनेन दृष्टार्थत्वाच्च तानपेक्षितादृष्टार्थ
हविःसंस्कारोभिघारणं अतः शेषप्रतिपत्तिः हविराधारनियमादार्थिकस्तत्संस्कार इति। हविःशुष्कारणो न प्रयाजशेषं संकुर्यादित्यर्थः एवं च सन्नि
हितक्रतुपशुवपास्वेवक्षरणमिति। एवं हि विभक्तो लौकिकत्वं दृष्टार्थत्वापाश्रितं स्यात्। तत्र तस्तु तशस्त्राधिकरणविरुद्धं श्रोपभृतप्रथमच
तुर्गृहीतस्योपरितनप्रयाजद्वयार्थस्योपांशुयाजार्थं च तुर्गृहीताज्यादिवद्धोमेन निःशेषमाहवनीयेक्षारितस्य विनावचनं शेषप्रसंगात्। अतः
कथमत्र विषयत्वाभः कथं वासिद्धांतसिद्धिरिति केचित् १७ दर्शपूर्णमासयोराज्यग्रहणं प्रकृत्य श्रुतं। यत्जुह्वांश्चतुर्गृह्णाति प्रयाजेभ्यस्तत्। यदुपभृ रा० म०
ति प्रयाजानुयाजेभ्यस्तदिति। तथात्र निहायेडो वर्हिः प्रतिसमानयतेत्जुह्वामोभृतमिति। यदिदमोभृतस्य चतुर्थप्रयाजोपक्रमे जुहां समानय ५५

नं न दौपभृतास्य ग्रहणस्य न प्रयोजकं। अनूयाजार्थाज्यसंस्कारकत्वात्। प्रयाजानुयाजेभ्य इति बहुवचनस्य प्रयाजेष्वप्यन्वयेन जौहवौ
पभृतयोः सर्वप्रयाजविषयत्वे वैकल्पिकत्वेन यदौपभृते न प्रयाजाः क्रियंते तदोपक्रम एवं पंचानामप्यर्थे औपभृतग्रहणं पंचकस्यानी
तत्वेनास्यां वेलायां न तत्प्रयाजार्थाज्याभावात् इति चेत्। प्रयोक्तौपभृताज्यस्य बर्हिः प्रतिसमानयः। अतिहायेति वाक्येऽर्थप्राप्तसमानयनेका
लविप्रमात्रविधावसार्थविधिद्वयार्थत्वयोर्लाभात् तदनुरोधेन च प्रयाजाभ्यामनूयाजेभ्यश्चेति विग्रहेणोपरितनप्रयाजद्वयकरणाय क्रियमाण
मानयनं प्रयोजकमौपभृताज्यग्रहणस्य। अन्यथाऽनेकार्थविधिद्वयकल्पना च। तत्कालाप्राप्तनयनकालयोर्द्वयार्थप्रतिपत्तेश्च विधानात्
।तथा चाज्ययोर्भिन्नविषयता समुच्चयः १८ चतुर्जुह्वां गृह्णात्यष्टावुपभृति चतुर्ध्रुवायामित्युक्तसंख्यानां सामर्थ्यात्सर्वार्थानि विनियोजकवच
नान्यवपुरस्तादाः। यद्वा यज्जुह्वामिति वाक्यात् जौहवस्य प्रयाजार्थत्ववत्। यदुपभृतस्तनूयाजेभ्यस्तदिति वाक्यादस्यापि केवलानुयाजार्थत्वमिति
चेत्। व्यवस्थया प्रयाजादीन्याज्यैः स्रुग्जौहवादिभिः प्रयाजानुयाजेभ्य इत्यनेनौपभृतस्योभयार्थत्वादितरोऽग्रहणानुवादः। ध्रौवं तु त इति तदिति वि
क्तसर्वविषयं॥१९॥ अष्टावुपभृतीति वाक्येन न चतुष्टुविशिष्टग्रहणाद्वयविधिः लक्षणाप्रसंगात्। किंत्वष्टत्वविशिष्टस्यैकस्य चतुर्गृहीतं जु
होतीति सामान्यवचनं विशेषवचनेन प्रयाजानुयाजव्यतिरिक्तपरं। न च ग्रहणहोमरूपविषयभेदाद्विरोधः अष्टत्वस्यैकेवलग्रहणार्थत्वे
वैयर्थ्येन तद्द्वारा होमार्थतया एकविषयत्वप्राप्तेरिति चेत्। अष्टावुपभृतीत्येव चतुःसंख्याद्वये विधिः। प्रधानार्थचतुःसंख्यानां ग्रहणसंख्यावाधित्

१५

५६ -56 मलाग्रहणमात्रार्थत्वे चोक्त एव दोषः। अतस्य तु हृदयलक्षणायां मयसामंजस्यमिति ॥ २० ॥ ॥ इति लघुवार्त्तिकटीकायां चतुर्थस्य प्रथमः पादः ॥
॥ अग्नीषोमीयपशौ यूपस्य स्वरूपं करोतीति स्वरूपलक्षणायामुमनन्कीर्त्तिश्रुतेऽजनसाधनत्वेनावगतस्य करोतेरर्थप्राप्त्यादानानुवादेन यूपादिति विधौ करोते
रुपादानलक्षणा। वाचयार्थविशिष्टस्यादतः स्वरूपकर्मकभावने व विधेया। तस्य श्चकरोतिकर्त्तव्यतांशत्वायां यूपशब्दो लक्षणायां खदिरादिकं क
रणत्वेन छेदनादिकं चेति चेत्। स्वरूपं यूपानुनिष्पादी। विशिष्टभावनाविधौ विधिगौरवाद्वाक्यार्थविधेश्चावर्जनीयतया तुल्यता स्मुख्ययूपशब्दमु
ख्यत्वाय करोतेरर्थप्राप्त्यादानलक्षणाया तदनु दनुवादेन यूपादिति विधानान्न दनुनिष्पन्नः शाकलः स्वरूपप्रयोजकः १ शाखामयिहृत्य प्राचीं शा
खामाहरतीतिश्रुते प्राचीशब्दः श्रुत्या दिग्वचनः तां पलाशहरेदिति नीतिचेत्। प्राचीमिति न दिग्वचः। प्रतीत्यध्याहारापातात्सामानाधिकरण्यात् शाखा
वादः याप्राचीशाखा तामिति २ शाखामाछिनत्ति शाखामाहरति मूलतः शाखां परिवास्योपवेषं करोतीति उपवेषेण कपालान्युपदधाति। शाखया
वत्सानपाकरोतीतिश्रुते छेदनादीनां वत्सापाकरणां कपालोपधानं च प्रयोजकं छेदनादिवाक्ये समूलाग्रे शाखाशब्दश्रवणात्तत्तस्य च परिवासनेन
द्विधाकृतस्यापाकरणोपधानयोर्विनियोगादिति चेत्। मूलं शाखानुष्यादि। परिवासनवाक्ये मूलापादानकपरिवासनेन शाखां भावयेदिति परि राम०
वासनमूलयोरग्रार्थत्वावगमात्तदर्थमूलेन क्रियमाणमुपधानमप्रयोजकं छेदनादेः। छेदनादिकमपि मूलपादानकपरिवासनार्थमित्यग्रा ५६
र्थमेव। करोतिश्चोपधानार्थप्राप्त्योपादानलक्षक इति ३ सहशाखया प्रस्तरं प्रहरतीत्यत्र हरतेर्ज्ञातीयन्यायेन यागत्वपर्यवसानान्न च प्रस्त

रस्य गुणत्वान्न तत्सहभूतलाशाखापि तन्नैव गुणभूतेति प्रहरणं प्रयोजकं शाखाया इति चेन्न। शाखाया महत्त्वाद् अतो। सूत्रवाक्येन प्रस्तरं प्रहरतीत्यत्र
मांत्रवर्णिकदेवतासंबंधबलायागत्वपर्यवसाने पि सहशाखयेत्यत्र प्रहरणस्य प्रतिपत्तित्वात्तत्र च प्रस्तरस्य प्रतिपाद्यत्वात् तत्सहभूतशाखापि
प्रतिपाद्यैवेत्यस्य प्रयोजकं प्रहरणं शाखायाः ४ अपः प्रणयतीत्युक्ता प्रणीताभिर्हवींषि संयौतीत्यत्र तेर्वेदिं प्रणीता निनयतीति श्रुताभ्यां संयव
ननिनयनाभ्यां प्रणीताः प्रयुज्यंते तयोस्तत्साध्यत्वाविशेषात् इति चेत्। प्रतिपत्तिर्निनयनं प्रणीतानामपां भवेत्। तृतीयया संयवनशेषत्वं द्वितीय
यानिनयनं प्रतिप्रधानं च प्रणीतानां प्रतीयत इति निनयनं प्रतिपत्तित्वात्तासामप्रयोजकं ५ क्रीते सोमे मैत्रावरुणाय दंडं प्रयच्छतीति श्रुतं दंडदानं
तद्दंडप्रयोजकं दंडेन दीक्षयतीति दीक्षार्थतया कृतकार्यमैत्रावरुणहस्तप्रक्षेपे द्वितीयं तथाविनिर्दिष्टदंडप्रतिपत्तित्वादिति चेत्। दंडदानं प्रशा
स्त्रेयत्र दंडस्य प्रयोजकं। दंडकर्मकदानेन मैत्रावरुणाभावप्रयेदिति मैत्रावरुणार्थतया पूर्वमाप्तं न प्रतिपत्तिः प्रशास्तस्य स्थिताऽनवानां प्रेषानुव
चने पटतो वर्हंभायापेक्ष्यमाणदंडस्य दानं तस्य प्रयोजकमिति स्थायी सोमीयविकारपश्वंतरे दीक्षाभावोपे दंडइसाध्यः ६ चात्वाले कृष्णविषा
णं प्राश्यतीत्यादिवाक्यश्रुतकृतकरडूयप्रतिपत्तित्वाभिमतं प्राशनाद्यर्थकर्म। तादृग्द्रव्यस्य संस्कारे प्रयोजनाभावे न विनियोगमंगादिति चेत्॥
प्राशनं प्रतिपत्तित्वं विषाणायाः प्रपद्यते। न भंजस्यार्थकर्मत्वं सर्वाश्च प्रतिपत्तयः। कृतकरमपि द्रव्यं स्थलाच्छादकं कचित्स्यात् क्वचिदिति तान्नियमोयं
विधीयते। तद्दशादेव तल्लोये निर्वृत्तमप्यपूर्वं नश्यतीति कल्प्यते ७ यत्किंचित्सोमलिप्तं स्यात्तेनावभृथं यंतीति श्रुतेवभृथोद्देशेन तृतीयया सा

धर्मे सोमलिप्तं विधीयते। अन्यथावभृथशब्दे देशलक्षणा तृतीया द्वितीयार्थलक्षिका च स्यादिति चेत्। नयनं सोमलिप्तानां प्रतिपत्तिरितीष्य
५१ ते। वारुणेनैककपालेनेति उत्पत्तिवाक्यविहितद्रव्यावरुद्धे द्रव्यविध्ययोगायंतीति प्रत्ययेन सोमलिप्तावभृथसंबंधविधौ वाक्यार्थविध्याप
त्तेश्च सोमलिप्तोद्देशेन यानं धात्वर्थो विधीयते। अवभृथदेशनयने न सोमलिप्तं भावयेदिति ८ सत्ते प्रजेतेत्यादिकारकश्रुतयो नापूर्वे विध
57 यः क्रियाविध्यनुपपत्तिप्राप्तत्वात्। न विषमादिनिवृत्त्यर्थाः परिसंख्याया त्रिदोषत्वादतो नुवादा इति चेत्। द्रव्यदेशादिषु विधिर्नियमात्मक इष्य
ते। क्रियाविधिना यत्प्राप्तानां द्रव्यदेशकालादीनामप्राप्तांशपरिपूरणफलकनियमविधिसंभवान्नानुवादाः ९ श्वेतमालभेत शुक्लानां चरु
मित्यादौ शुक्लादेरमूर्तत्वेन क्वचित्क्रियासंबंधाभावेन च नियम इति चेत्। तद्गुणोपि शुक्लादौ। गुणविशिष्टचरोः कारकत्वात्तद्वारेणास्यापि परि
च्छेदकतया तल्लोपपत्तेर्नियम एव यं। अरुणाधिकरणस्य प्रपंचः। १०॥ अवहंतीत्यत्रावहननस्य यागसंबंधित्वाश्रवणाच्छुक्लाचरणाविवदृष्टा
रापि तदुपपत्तेनैतत् तुलाक्षिप्तक्रियानुवाद इति चेत्। तथावहननादिषु सोपानं तत्संबंधाश्रवणापि प्रकरणान्नदपूर्वसाधनत्वाक्षिते तद्विधाना नियम
मोपपत्तिः ११ प्रयाजाद्या यागहोमदानानां लक्षणमाह। त्यागो द्रव्यस्य यागः स्याद्देवतोद्देशपूर्वकः। उद्देशपूर्वकस्त्यागो यागः। तत्त्वं यजिपदप्रवृत्तिनिमि राम०
त्तं। उद्देशत्यागयोः सकर्मकत्वाद्द्रव्यदेवतयोः कीर्तनं न तु यजिवाच्यतया। अप्रतिग्रहीतृत्वे सति त्यज्यमानद्रव्योद्देश्यत्वे सति विधिगम्यत्वं देवता ५१
त्वं। विशिष्टं तु यजिवाच्यमकर्मकमेव। स एव होम इत्युक्तः प्रक्षेपांशाधिको यदि। स उद्देशपूर्वकस्त्यागः आहवनीयादौ यः प्रक्षेपः तदंशाधिक

दान श्चेद्धोमइत्युच्यते। स्वीयस्य परकीयत्वापादनं मुच्यते। लक्षणानीमानि भाष्ये। लोकप्रसिद्धपदार्थकत्वाद्यज्यादीनां न लक्षणया त्यजेः क्त्यमित्यज
आह। प्रयोगप्रक्रिया स्वभि। यो देवतामुद्दिश्य द्रव्यं त्यजति तेन यागचोदनार्थो नुष्ठितो भवति। प्रयोगो नुष्ठानं तत्प्रकारः प्रक्रिया तामु सूत्रयोः पदानि
वेर्जितइति शेषः एवं होमादिश्वपि न त्ववहननादर्पो ग विधानमित्युक्तं उत्सर्गो तदश्रवणादित्याशंक्य यजति चोदनाद्रव्यदेवताक्रियं समुदायेकृ
तार्थत्वात्। तदुक्तेश्रवणाज्जुहोतिः॥ से चनाधिकऽस्यादिति सूत्रयोर्वार्त्तिकोक्तं जनांतरमाह। वार्त्तिके त्वश्रुते यागे श्रौर्यादौ यागकल्पनाद्रव्यदेवता
संबंधानुपपत्तिः कल्पितो यागो विहित इत्यर्थः। यागे जुहोतिश्रवणं युक्तं चेत्तिन यद्दयं यागे विहिते चतुरवत्तं जुहोतीति यज्जुहोतिश्रवणं तदुत्पन्न
प्रप्रक्षेपांश विधानाद्युक्तमिति न्यायद्वयं सूत्रद्वयेनोक्तमित्यर्थः ॥१७॥ यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येत्यत्राहिते विधानादातिथ्यायां वि
धिवैयर्थ्यात्। निरिष्टको पदेशे शिष्टाचारविरोधाद्धर्मलक्षणार्थो विधिः साध्ववालप्रसंगादिप्राप्त्यर्थ इति चेत्। आतिथ्ये प्युपसद्द्वेसाः स्युःसाधारणा
बर्हिषः। देशोग्नीषोमीयः। लक्षणापत्तेर्गौयंपक्षइति धर्मविशिष्टबर्हिःसाधारणविधिः॥ इति चतुर्थस्य द्वितीयः पादः॥ अनारभ्ये श्रुतं पयस्य पर्णमपी
जुहूर्भवति न स पापं श्लोकं शृणोतीत्यादि तत्र पर्णत्वादि सत्रवद्धिपरिणतानाऽपापश्लोकश्रवणादिफलोद्देशेन क्रत्वर्थजुह्वां च विधानात्क्रत्वर्थमपि
दद्यादिवदितिचेत्। अंगानां पर्णतादीनां फलं नास्त्यर्थवादिकं। क्रत्वर्थमि चरितं जुहूद्वारा जुहूपदं नस्य क्रत्वर्थत्वेन विधाने न न फलापेक्षा पर्ण
तादीनां दध्यादावित्र वाक्यद्वयाभावाच्च लोभयार्थत्वं। फलं प्रति विधीयमानस्याश्रयालाभाच्च अतः क्रत्वर्थमेव पर्णत्वादि १ अपः प्रणयतीति प्र

५८ हस्त्यमृतम्नयेन प्रतिष्ठाकामस्येत्यादिश्रुतं। तथा वार्हद्गिरं ब्राह्मणस्य ब्रह्मसामं कुर्यादिति। तत्र वारणाभीवर्त्तौ दिनित्यविधिमदृष्ट्वा। सने तिष्ठ
त्वाचा पूर्वपक्षः। यद्वा वारणादीनां सामान्यविधित्वान्नमन्नयस्य कामेवार्हद्गिरस्य द्वादशाहे च विशेषविधित्वाद्वलीयस्त्वात्तेनैव निजस्यापि सिद्धि
58 रिति चेन्न। गोदोहनादेरन्यत्वस्यानित्ये प्रणयनादिके। अन्यो देशेन विहितस्य सन्निहितस्याप्यङ्गस्य मानाभावान्नित्यस्याक्षेपात्सामान्यवच
नाद्वा साधने प्राप्तेर्नैमित्तिकश्रुतिविरोधाच्च न काम्यनैमित्तिकयोर्नित्येन संबंधः। अत्र द्वादशाहे अहीने ब्राह्मणो वार्हद्गिरस्य राजन्ये पार्थुरश्म
स्य वैश्ये रायोवाजीयस्य विधानान्नित्याभीवर्त्तस्य मूर्द्धाविलक्षविषयत्वमिति केचित्। २ अग्निहोत्रें दध्नेन्द्रियकामस्येति श्रुते दध्नि केवलफ
लार्थं दध्नो जुहोतीति वाक्यस्य फलवाक्यापेक्षितात्रयसंबंधबोधकत्वेन तदेकवाक्यत्वादिति चेन्न। दधिक्रतुफलार्थं स्यात्। इंद्रियकामा
धिकरणोक्तन्यायेन सन्निधानादेवाश्रयलाभात्तस्य क्रत्वर्थत्वबोधकत्वं तादृग्दध्नः क्रतुफलेनैव फलवत्वं चेति ३ मयार्थं दधि २ ज्योतिष्टो
मे पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति श्रुतं पयोव्रतादिपुरुषार्थं व्रतसमानदृष्टे राजन्यी तेर्दृष्टे [illegible] दाश्रितनियमस्यापि स्त
तदेव फलमिति चेन्न। क्रत्वर्थं तु पयोव्रतं। नियमं विनापि प्रीतिदृष्टेः सन्निहितक्रतुफलेनैव तस्य फलवत्वमिति जन्यमानमंत्रवक्रत्व राम०
पुरुषसंस्कारकत्वेन क्रत्वर्थं ४ एकाहकांडे विश्वजिता यजेते स श्रुतफलं कर्मश्रुतं तन्निष्फलं। तदश्रवणात्। पाणं कुर्यादिति राकांसे वा ५८
क्याध्याहारायोगात्। पुरुषार्थप्रवृत्ति विद्याप्रामाण्याययोरिष्टत्वात्। प्रवर्त्तनायुक्तभावनाश्रवणानुपपत्त्या फलपदाध्याहारेनेष्टस्यत ज्ञान

कत्वानुपपत्तिः। न चापूर्वद्वारकत्वादुपपत्तिः अध्याहृते फलेऽपूर्वसिद्धिः तत्सिद्धौ तद्द्वारफलसिद्धिरित्यन्योन्याश्रयात्। नियोज्यस्य नि
बोधेऽपि वस्तसामर्थ्यादेव तत्कालजीविशक्तस्यापि भेरतो निष्फलमेवंजातीयकमिति चेत्। फलं विश्वजितः कल्प्यं। विधिप्रयुक्ता भावना नापुरु
षार्थधात्वर्थभाव्यत्वेन स्वीकरोतीति। सर्वानुपपत्तिपरिहारेणाकांक्षापूरणाय फलपदाध्याहार इति सर्वाणि सफलानि कर्माणि। न तान्य
विशेषात्सर्वार्थानीति चेत्। तदेकं। एकेनैवाकांक्षापूर्तेः। एकस्य विधिव्याज्ञानेन सर्वार्थत्वाप्रामाण्ययोरन्यतरप्रसंग इति चेत्। स्वर्ग एव
सः। यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं। अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदमिति शक्तिग्राहकार्थवादान्निरतिशयप्रीतिरूपः प्र
त्यवायपरिहाराद्दुःखाभावाच्च शीघ्रोपस्थितिकः स्वर्ग एव फलं दुःखासंभिन्नत्वं साधनसंपादनायासरहितत्वं। अनंतरं दुःखाग्रस्तत्वं न प
रदारगमनाच्छेदिसादिनिषेधोल्लंघनजं तद्दुःखशून्यत्वं। आयासशून्यत्वस्य सुखनित्यत्वेऽप्युपपत्तिवारणायाभिलाषोपनीतमिति। अभिला
षमात्रेण स्रगादिसमवधानान्नयागादेर्व्यंजकत्वमिति। यज्ञेन विविदिषंतीति वाक्येनैवंजातीयकानां ज्ञानादौ विनियोगान्न स्वर्गकल्प
नेति चेत्। न। तस्यासन्निहितत्वात्। अन्यथा दर्विहोमवद्दर्शादेरप्याकांक्षोपशमनसंभवे प्रयाजादेरपि ज्ञानादौ विनियोगापत्तेः। अश्रुतफ
लानामन्यतराकांक्षयाहूतस्य कर्मांगतापत्तेश्च। रात्रिसत्राणामपि विपरिणामपरिहारायार्थवादानां सामर्थ्यात्सर्वेषां च ज्ञाने विनियोगप्रसंगाच्च। स
र्वेषामपि तत एवोभयलिंगाद्विस्तुतरतंत्रे सन्निहितफलनिराकांक्षाग्निहोत्रादेरेव वचनात् ज्ञानविनियोगोकेश्च। तस्मात्सन्निष्पन्नार्थस्वर्गपदाध्याहार एवे

१८
१७

ति ७ प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीत्यत्र रात्रिसत्रं श्रुतं। ज्योतिष्टोमो गोरायुरित्यादि विधिहिताः क्रतुः सा रात्रय तत्र स्वर्गः फलमध्याहार्यः वर्तमा
५९ 59 नापदेशिनः कामपदस्यास्यश्रवणात् प्रश्रवणाच्च प्रतिष्ठाश्रवणात् स्वार्थवादतया तत्रास्य विधिरिति चेत्। रात्रिसत्रं प्रतिष्ठार्थं। अध्याहारतो
विपरिणामस्य च कृतिसंबंधयोर्लघुत्वाद्येप्रतितिष्ठंतीति ते य एता रात्रीरुपेयुरिति कल्पनात् फलमेव प्रतिष्ठा अन्यथार्थवादस्यासमवेतार्थता
पातात् तत्परिणामस्य कल्पनात्प्रतिष्ठातो वैषम्यमपापश्लोकस्य ८ सोऽर्थवत्त्वमित्यादावविशेषणाद्विधिः सर्वानुद्धयति प्रवृत्तत्वप्रतीत्युपपाद
नाय स्वर्गोऽध्याहार्यः ब्रह्मवर्चसादिश्रवणात् तत्राचयार्थं। कान्ताहरणाद्वशाकाहरणमिति चेत् न सोऽर्थस्य कल्पना। ब्रह्मवर्चसकामपद
समभिव्याहारलक्षणा वाक्यात्तत्कामपदस्यैव विधिप्रवृत्ते (विशेषणप्रवृत्तत्वप्रतीत्यसिद्धेरत्राचयत्वे चान्योन्याश्रयापत्तेः श्रुतमात्रफलानि सोऽर्था
दीति ९ एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियंते सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति तत्र श्रुतं। तत्राप्या
तायभावेन विधिभावनयोरश्रवणात्तदध्याहारे वानुवादे यत् फलसंबन्धः सन्निधिनाकर्मांतरं तापत्तेः सदोमानादिगोदोहनादिगुणफलसं
बंधानुवादः सर्वकामशब्दस्तु लर्थ इति चेत् न। सर्वेभ्यः स्यात् फलविधिः। सर्वेभ्य इति वाक्ये फले कर्मविधिः स्यात्। तादर्थ्ये चतुर्थ्या फलपरत्वावग राम
मात्। कर्मणाश्च स्वांगाश्रितगुणफलार्थत्वस्याप्रमाणकतया न तदनुवादायोगात्। फलानि वृत्ति कर्मणो ध्याहृतेनानुषक्तो सन्निविधिना या ५९
विधिसंभवात् प्रत्यक्षाख्यातस्यैव प्रकरणांतरन्यायेविषयतया तत्र तदप्रसंगात् उद्देश्यसाहित्यं च कृतयोर्विकल्पे भेदभियाः विवक्षणात्तत्स्क

लोद्देशेन कर्मविधिः १० तत्रैकस्मिन् प्रयोगे सर्वेषां फलानि साधनस्याविशिष्टत्वादेकोद्देशेनैव विनिगमनाभावाच्चान्यच कामनातो व्यवस्था। न
स्यात्तद्गतः पुरुषस्य वा कर्माङ्गतामिति निमुद्दिश्य कर्मणो विधेयत्वात् अत एव पुंस्त्वाविवक्षा स्वर्गकामादिवाक्ये। बहुफलकामनायां तावतामे
कप्रयोगोत्साध्यत्वस्यैवमप्यवारणाच्च। तस्मात्सर्वेषां युगपदेव जन्येति चेत्। तेषां पर्यायतो जनिः। विधेः समीहितफलसाधनत्वाक्षेपकतया
काम्यमानस्यैकस्यैवोपस्थितावहुकामनायामपि सामग्र्यस्वाभाव्याद्दृष्टसामग्र्या द्वाविव एकफलसाधनत्वेन श्रुतकर्मण एकस्मिन् प्रयोगे तज्जा
तीयस्यैकस्यैवोत्पादवच्च। अतो न्यायैकस्मिन् प्रयोगे एकमेव फलं स्यात् ११ चित्रादिफलं पश्वाद्यामुष्मिकमेव स्वरूपस्य प्रतिग्रहाद्युपायान्तरसाध्य
त्वेनादृष्टानपेक्षतया शरीरस्यैव तदपेक्षणात्तत्तद्यागसाध्यादृष्टारब्धशरीरोपभोग्यं पश्वादि सूक्ष्मोपमपि जन्मान्तरे भविष्यतीति चेत्। नामुष्मिक
त्वनियमः श्वित्रादीनां फलेषु चायागात्तस्य पुः फलं श्रूयते नैहिकं जन्मान्तरीयं चेति। तथा चादृष्टसहितप्रतिग्रहादिनाऽसतिप्रबलप्रतिबन्धे इहापि
भवितुमर्हतीत्यनियमश्चित्रादिफलानामैहिकामुष्मिकत्वयोः १२ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र दर्शपूर्णमासः सोमयोरिव साराङ्ग
पुरोधादिफलवत्त्वेनाङ्गतकरयोः क्रमापत्त्यर्थे क्रमकालार्थः संयोग इति चेत्। अङ्गं बृहस्पतिसवो वाजपेयस्येति नो भवेत्। वाजपेयप्रभृतेः कालोपलक्ष
णार्थतयाप्यस्तं तपानर्थ्यं वाजपेयप्रकरणाबाधश्च कालविधौ स्यात्। अनुपादेयकालसंबन्धस्य च विधावरुचिविधिना कर्मान्तरत्वे तस्यानिर्ज्ञातफल
स्याग्निहोत्रशब्दवद्धर्मिलक्षणाया बृहस्पतिसवस्य धर्मिकस्य वाजपेयाङ्गत्वेन विधौ प्रकरणानुग्रहादि भवतीत्यङ्गप्रयोजनमेवायं संबन्ध इति वाज

येपप्रयोगं समाप्येदमपरं कर्त्तव्यमिति १३ संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीत्यत्र समाप्तिसंयोगान्नांगांगित्वसंबंधः किंतु कालार्थः प्रकर
६० णाच्च पक्षान्तरं गं वैमृध इति चेन्न। दर्शेन वैमृधः। वाक्यात्पौर्णमास्यंगमेव नामावास्यांगं प्रकरणान्नयमुत्कृष्टत्वात् साधारणप्रयोगसमाप्तावविध
60 ध्यागार्थत्वपक्षे इवांगांतरस्य वैशिष्टिकस्य संभवात्। अत एव वाकाशोपः वैमृधः पूर्णमासे तु निर्वीर्यं भवति॥ तेन पौर्णमासः सेंद्र इति संस्थाप्य
पौर्णमासीमित्यत्र द्वितीयासंयोगात्प्रधानत्रयं परिसमाप्यत्विष्टकृतः पूर्वं वैमृधः कार्यः न तु सांगप्रयोगसमाप्तौ द्वितीयासंयोगे प्रधानमा
त्रार्थत्वस्य तात्पर्यं प्रकर्त्तव्या इत्यत्र स्थितत्वात्। यदि प्रयोगसमाप्तौ कार्यः तदा यइष्ट्वेति वाक्यात्सर्वप्रतीक्षया कार्य इति केचित् १४ आग्नि
मारुतादूर्ध्वमनूयाजैश्चरंतीत्यत्राप्याग्निमारुतस्तुतेरूर्ध्वं तथा शास्त्रार्थ्यवारणायांगांगिसंबंध इति चेत्। नानुयाजाः सौमाग्निमात्। आग्निमारुतस्य
सौमांगत्वोपदिष्टस्यानुयाजानां च सवनीयपश्वंगत्वातिदिष्टानां कृतकरत्वात्कालार्थः संयोगः १५ ज्योतिष्टोमे श्रूयते दर्शपूर्णमासाभ्यामि
ष्ट्वा सोमेन यजेतेति तत्राप्युक्तहेतोरंगांगिसंबंध इति चेन्न। इष्टयोर्न सोमः। अनुपादेयमिष्टुत्तरकालमुद्दिश्योपादीयमानमपि कर्मसन्निधौ
त्वविभागाद्विति न्यायेन नक्रमांतरं। प्रकृतस्य च मफलत्वाद्दर्शपूर्णमासयोश्चाविधीयमानयोः सोमांगत्वायोगात्कालार्थ एवायं संयोगः। य दाम०
द्यपि तैत्तिरीये एष वै देवरथ इत्युपक्रम्य दर्शपूर्णमासाविष्ट्वा सोमेन यजेत इति दर्शादिप्रकरणे श्रुतं। यद्यपि चाचार्यवाचस्पतिमिश्रेरना
रभ्याधीतमित्युक्तं तथाप्येतत्सिद्धांतसिद्धार्थं तदुभयं सोमप्रकरणादुत्कृष्टं १६ वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्युपक्रम्य यस्मि ६०

न्जातइत्यादिश्रुतं तत्र त्रिसत्रन्यायेन समुदितमेकं फलमित्युक्तं नामधेये। यद्यपि निमित्तफलयोर्निरपेक्षयोरुद्देश्यत्वे वाक्यभेदशंका। तथापि नि
मित्ते विधीयमाने त्वाप्यफलाकांक्षत्वान्नानन्तरत्वसंगः तद्यफलं पितृगामि। विधेयपानवाक्यगतात्मनेपदाच्चेति चेत्। पुत्रस्यभवेद्दृष्टा नरीफलं फ
लप्रतिपादकवाक्यशेषे एनोवपुत्रगामित्वप्रतीतेः पितुः पुत्रगतफलाभिलाषितया विध्यात्मनेपदयोरुपपत्तेः पुत्रगाम्येव फलं १७ इयमि
ष्टिर्जननोत्तरकालउपक्रांतव्या निमित्तोपजननेस्तत्र विलंबहेत्वभावादिति चेत्। प्रागजातकर्मणो नेष्या। जातकर्मोत्कर्षे तन्मध्यपतितस्तन
पाशनोत्कर्षापत्त्यापुत्रविपत्त्यापत्तेर्जातकर्मणोनंतरमेव कर्तव्या। १८। जातकर्मानंतरमेवांतर्दशाहेपि चितमन्यपेक्ष्य कर्तव्या। नैमित्तिकेयथा
शक्त्युपबंधादिति चेत्। कर्तव्यानच सूतके। प्रयोजनाविरोधान्निमित्तस्यास्यमुख्यत्वोत्कृताशौचार्थे गोपसंहारायसूतकांते पर्वणि कर्तव्या १९
वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र श्रुतो बृहस्पतिसवः शारद्ये वा वाजपेयप्रयोगस्यसांगस्य शारदि वाजपेयेन यजेतेति तत्र विधानात्।
बृहस्पतिसवस्यापि तदंगत्वेन तत्कालस्योपदेशात् ग्रामेणतिदेशिकवसंतकालबाधादिति चेत्। न वाजपेयकाले स्याद्बृहस्पतिसवक्रिया।। वा
जपेयेपकरणाकफलार्थव्यापारेष्ठुताशरन्नद्दृशिश्रुतबृहस्पतिसवेन भवितुमर्हति। अंगस्यतत्तोप्रंतं रकरणप्रस्तावपिकालोपसंग्रहा
पन्नक्रियतेत्वापत्त्यपश्चपूर्वकालतायामेवनाव्यवहिततायां। तेनोत्पत्त्यमध्यपूर्वं बृहस्पतिसवप्रयोगसाध्यः शरद्यहीक्रियते।। ।।इति चतुर्थ तु
स्यतृतीयःपादः।। ।।अनुमत्यादीष्टीः मल्हादिपर्वत्पवित्रादिसोमयागान् विदेवनादीन्यागरूपाणि चप्रकृत्य श्रूयते राजसूयेनस्वाराज्य

६१ कामो राजा यजेतेति राजकर्तृक राजसूयेन स्वाराज्यं भावयेदित्यर्थः तत्र यागानामयागानां च प्रकृतानामप्रासिद्ध्यर्थेनापि प्राप्तिर्यदि के-
न परामर्शात्तद्धर्मि तृतीयया च तेषां करणत्वप्रतीतेः स्वाराज्यरूपफलस्यावगमात् भावनायाश्च प्रत्ययेनावगतेः यजतिर्यागायागसमुदा-
यानुवाद इति सर्वे फलप्रयुक्ता इति चेत् । कर्मणां यागरूपाणां राजसूये प्रधानता भावनाकरणं धात्वर्थः नाम च तद्विशेषणमिति द्वितीयाये
स्थितत्वात् तत्रामकयागानां फलार्थतया ऽयागानां तदंगत्वं १ अभिषेचनीयानन्तरम्नातानां अपि विदेवनाद्यभिषेकान्ताः तदीयमाहेन्द्रस्तोत्रकाले
माहेन्द्रस्तोत्रं प्रत्यभिषिञ्चतीति वचनेनापकृष्टाः तदीयप्राकृतांगसंदंशतया वा तत्प्रकरणेनाभिषेचनीयार्था इति चेत् । सर्वस्मिन्राजसूये
गमभिषेकावधिक्रिया । वहिर्विधानकालेप्रकरणानुद्भूतसंनिधिमात्रबाधेन कृत्स्नराजसूयांगत्वमुक्तमेव यात्यं २ तत्रैव सोमं चरुं बभ्रु-
दक्षिणेति विधायपुनः श्रुतं पुरस्तादुपसदां सौम्येन प्रचरतीति तत्र सामान्यवचनेन प्रकरणात् सापेक्षेण फलवियोगाद्दस्मुपसदंगत्वं सौम्य-
स्य तादर्थ्यप्रसक्तेरिति चेत् । तस्मिन्नभवेत्सौम्यस्य चरोरुपसदंगता । पुरस्तादित्युपात्तकालस्य अवश्यविधेयतयाऽनुसन्निविधावनेकविधप्रस-
क्तेः नांगत्वविधानमिति कालार्थ एव संयोगः ॥ ३ ॥ आमनहोमाः सांग्रहण्या यजेत ग्रामकाम इति प्रकृतस्य श्रुताः सांग्रहणीफलप्रदानुषंगेणातदी-
यार्थवादादिकेन वा फलार्थाः । इष्टेः प्राकृतांगनिराकांक्षत्वादिति चेत् । अंगमामनहोमास्तुः सहशब्दाम्नातस्यानन्यगतिकतया कश्चिदनुषंगो- राम •
पि इष्टपरिधिमंत्रस्य चेतत्त्वेन तद्योगात् प्राकृतविधिप्रमाणेनांगत्वसंभवाच्च । प्राकृतांगसंदंशविहितस्य प्रकरणोन्नीतेश्च अर्थवादस्य फलार्थता ६१

त्वर्याच्च ४ ज्योतिष्टोमे यं वा अध्वर्युर्यजमानस्य देवतामंतरितस्तस्या आवृश्च्येते नेशाजापत्यं दधिग्रहं गृह्णीयादित्युक्त्वा पुनः श्रूयते ज्योतिष्टोमे वा एष ग्र
हाणां यत्स्येष्ठग्रस्त्यत इति तत्र देवतां तपेर निमित्ते ज्योतिष्टोमे न च श्रुतत्वात् दधिग्रहो नित्यो नैमित्तिकश्च ज्योतिष्टोमे न च श्रुतत्वात् दधिग्रहो नित्यो नै
मित्तिकश्च ज्योतिष्टोमे प्रशस्तत्वं सर्वेषः प्रथमग्राह्यत्वं वा नानित्यो भवेदिति चेत् नित्य एव दधिग्रहः एवकारो नैमित्तिकत्वव्युदासाय यदि शब्दाद्य
भावेनांतरयस्य निमित्तत्वाप्रतीत्याऽर्थवादत्वात् उत्कप्रशस्ता नित्यत्वाद्दधिग्रहं गृह्णीयात् सप्तुकामस्येत्यपि वचनात्काम्यत्वमपि ५ अग्नौ श्रुतं यो वै सं
वत्सरं मुख्यमभृत्वाग्निं चिनुते यथा सामि गर्भो विपद्यते तादृगेव तदार्तिमार्छेत् वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेदिति अत्रापि संवत्सराभरव
णास्य स्तुतिमात्रत्वाद्दिष्टिर्नित्येति चेत् यो वै संवत्सरमिति क्रियाया नैमित्तिकी भवेत् कर्तृसमभिव्याहृतयच्छब्दस्य निमित्तबोधकत्वान्नैमित्तिकीष्टिः
६ योऽग्निं चित्वा न प्रतितिष्ठति पंच पूर्वाश्चितयो भवंत्यथ षष्ठीं चितिं चिनुते प्रतिष्ठित्या इति अत्र षष्ठी चितिर्नित्या अन्यथा पूरणार्थप्रत्ययस्यैकस्मा
मसंभवादिति चेत् तथा षष्ठी चितिः नैमित्तिकी षष्ठी कर्तृवाचियच्छब्दोक्ताप्रतिष्ठितां निमित्ते विधानात् तत्र संपन्नत्वं पूर्वविहितचित्यामनक्रियापेक्ष
याप्युपपन्नः नित्याः पंच चितयः पूर्वाः इयमेकैव मित्रा निमित्ते विधीयते ७ अमावास्यायामपराह्णे पिंडपितृयज्ञेन चरंतीत्यनारभ्याधीतः पितृयज्ञो
मावास्याशब्दाभिधेयदर्शांगं वा स्यात् कालमात्रोपपितस्य फलकल्पनापरिहाराय पृथक्कर्म वा चिन्नेव मनुरपि दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्म
इत्यंगत्वमाह अनाहिताग्नेस्तु पुरुषार्थ इति चेत् दर्शे पितृयज्ञस्यानंगताऽकाले शक्त्युयोगात् कर्मणि लाक्षणिको मावास्याशब्दः न चेह लाक्ष

६२ 62

त्तिकग्रहणं युक्तं। अपराह्णशब्दसामानाधिकरण्यादपि कालपरत्वमिति संनं गं पित्यपन्नः वचनं तु मासिश्राद्धं दर्श एवाहिताग्निना कर्त्तव्यमिति से
वं पा। ८ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयपशुमुपाकरोतीति प्रकृतिर्गामर्शनानातो द्वितीया समाम्नानात्सा पश्वन
पक्रमणार्था पश्वर्ग्या दृष्टार्थत्वात् न यूपार्था तत्राट्टष्टार्थता पातात् तथा च त्रिवृद्युक्तमाग्नेयमुपाकरोतीत्यस्य वपः त्रिवृत्सदेतत्तीया यूपपदे द्वितीया
च एषा सोपयोरशौ पक्रमणाय वेष्टनमर्थक्षिद्धमनुवदतीति सर्वमेव दृष्टार्थमिति चेत्। रशनासवनीयस्य यूपसंस्काररूपिणी द्वितीया तत्ती
याभ्यां स्पष्टं यूपार्थत्वावगमात् न दर्थत्वेपि मध्यवंधनस्यादृष्टार्थतया दृष्टार्थत्वात् यूपार्थैव रशना ९ यूपस्य स्वरुमिति तादर्थ्यषष्ठ्या यूपार्थः
स्वरुरिति चेत्। स्वरोः पश्वंजनार्थत्वान्नैव यूपार्थतामता। स्वरुणा पशुमनक्तीति पश्वंजनार्थत्वस्य स्फुटत्वात् यूपस्येति यूपादुत्पादनं तु इति स्वरौ
क्त एवार्थः १० दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्राधारादिसमिष्टियजुरंताः यावंतो यागास्ते सर्वे यजिनोपादाय व्याख्यातेन फले विधीयंते
नामपदं च विद्वद्वाक्याभ्यां समुदायद्वयकरणोपि नाख्यातमवच्छेतुमलं तत्सरंतंत्रत्वाद्राजसूयनामवत् तथा चमु वंतप्रतिरूपकमव्ययं नामस
र्वयागेषु सामानाधिकरण्याद्धर्तनं इति चेत्। आग्नेयमिष्ठोयागानां संस्थात्वकालयोगिनां। प्रातिपदिकस्यकालयुक्तेषु बहुप्रसिद्धेः द्विवच राम०
नस्यापि विद्वद्वाक्यत्वविहितार्थतापात्रविशिष्टार्थत्वात् राजसूयवेलक्षण्यापनाम पदमाख्यातमवच्छिद्य स्वसात्करोतीति तन्नामकयागानामेव फ ६२
लसंबंधः अग्नेर्यांकरणान्तदंगत्वं ११ दीक्षणीयादीष्टि पशुसोमयागाश्च कृत्स्नज्योतिष्टोमेनास्वर्गकामो यजेतेति श्रुतं तत्र संनिधानाविशे

षात्सर्वयागानां फलेन संबंधः। नामपदमपि न कुत्रचिद्यागे प्रसिद्धं त्रिवृत्पंचदशः सप्तदश एकविंश एतानि वा चत्वानि ज्योतींषि यस्य तस्य स्तोमा
दित्यस्यार्थवादत्वात् यान स्तोमेषु ज्योतिः शब्दाभिधेयत्वप्रत्वं। तथा त्वेवा सर्वयागानां फलसंबंधे न शब्दान्वयात् स्तोमपरिच्छिन्नप्रतीतमंत्रसाध्यस्तो
त्राणि सर्वयागांगानीति तद्द्वारा स्तोमानामपि सर्वयागसंबंधात्सर्वेषां ज्योतिष्टोमनामत्तापत्तेः। ग्रहं वा गृहीत्वा चमसं वा चोन्नीय स्तोत्रमुपाकरोतीत्य
त्रापि स्तोत्रग्रहणयोः क्रत्वर्थयोः कालार्थः संयोग इति न तद्योगेनापि कस्यचिद्यागस्य विशिष्टस्तोत्रसंबंध इति नामाख्यातयोः सर्वयागविषयता
त्सर्वैः फलार्थ इति चेन्न। सोमयागस्यैवाभ्यवेतज्ज्योतिष्टोमे प्रधानता। यद्यपि नामप्रवृत्तिवेलायां सर्वयागानां फलासंबंधात् न कस्यापि प्रकरणमुद्भू
तमिति न कस्यापि स्तोत्रद्वारा स्तोमसंबंधः तथापि सोमयागांगग्रहणस्य स्तोत्रोपाकरणस्य च कालार्थेपि संयोगे स्तोत्रोपाकरणसमानकर्तृकग्र
हणांगवत्वस्वरूपसंबंधात् तन्नामकत्वं सोमयागानामेवेति तेषामेव फलं अन्ये त्वफलास्तदंगानीति॥१४॥ ॥इति लघुकार्त्तिकटीकायां च
तुर्थाध्यायस्य चतुर्थः पादः॥ ॥अध्यायश्च समाप्तः॥ ॥१४॥ एवं प्रयोज्यप्रयोजकविचारे कृते प्रयोज्यपदार्थानां श्रुत्यर्थपाठप्रवृत्तिस्थानमुख्य
क्रमैः क्रमो निरूप्यते। ननु प्रयोगप्राशुभावापेक्षिक एव क्रमः पदार्थेषु न वैदिकः। तस्य विलंबितप्रतीतिकत्वात् इति चेन्न। श्रुतिलक्षणादेव पदार्था
नां नियतः क्रमः। वेदप्रमाणक एक क्रमस्यानंततत्प्रमाणोपस्थितत्वात् १ अव्यापारात्मकः क्रमो दध्यादिवत्स्वतो विधेयः नापि व्यापारविशेष
णात्तयैकस्य क्रमानाश्रयत्वात् तत्समुदायस्याविधेयत्वादिति चेन्न। विशेषणातयार्थानां क्रमस्य विधिमर्हति। न संधानस्यनाप्यैकैकस्य क्रमः

६३ अनेकानि परस्परं मिलितानि संयोगद्वित्वादिवत्क्रत्वाद्युपस्थापितक्रमवंति क्रमाणि प्रयोगविधिना विधीयंते २ सत्रात्मकद्वादशाहे ध्वर्युर्गृ
हपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारं ततं प्रतिप्रस्थाता दीक्षयतीत्याद्या प्रथमं ब्रह्मचार्याचार्यप्रेषित इत्यतः क्तः तत्र धात्वर्थ
63 विधिलिप्सया दीक्षैव विधेया क्रमस्तु पाठप्राप्तोनुवाद इति चेत् । स्वाक्त्वा दीक्षयित्वेति क्रमश्चैव विधीयते । ऋद्धिकामाः सत्रमासीरन्नुपेयजमाना
स्त ऋत्विज इति वचनात् सर्वेषां यजमानत्वावगमात् चोदकत एव तेषां दीक्षाप्राप्तेः धर्मादिनियमस्यापि तत एव इतरसम्पत्तेर्वा पत्नी विशेषः
स्यादिति न्याया यात्रा प्राप्तेः धर्मादिषु चाध्वर्यो स्वित्स्वति स्वेति मंत्रलिंगविरोधात् न पूतः पावय इति प्रतिधात्राप्राप्तेः क्त्वा ततः क्त्वस्मिहितः क्रम एव
तेन तेन वाक्येन विधीयते ३ अग्निहोत्रं जुहोतिय वागूं पचतीत्यत्र क्रमप्रमाणाभावात् पाकहोमयोरनियतः क्रम इति चेत् । अग्निहोत्रयवाग्वा द्रा
वर्थात्सि ध्यत्क्रमो मतः । पाकस्यक्रतिलिंगात्मनोपवाग्वर्थत्वावगमात् तस्याश्रपि होमद्रव्यत्वात् पक्वैव तपा होमः ४ प्रयाजानुमंत्रणा मंत्राः शाखा
भेदेन क्रताः वसंतमृतूनां प्रीणामीत्यादयः क्वचित् क्वचिदेकोममेका तस्येत्यादयः तयोर्द्वयार्थत्वात्समुच्चये सति प्रथमप्रयाजानुमंत्रणा प्रवृत्तिक्र
मात्क्रम इति चेत् सर्वेषां क्रमसमानानामभावेऽनियतः क्रमः । भिन्नशाखागतयोः परस्परप्रत्यासत्तेरविधानादनियम एव ५ समिधो यजतीत्यादिक्र रामः
मेणाम्नाताः न तत्क्रमेणा कर्तव्यास्तत्क्रमप्रमाणयोरभावात् पाठस्यापि प्रमाणत्वादिति चेत् । पाठक्रमाद्विधीनां स्यात्समिद्यागादिषु क्रमः । क्रम पठितगंध
पुष्पादिषु तत्तथैवानुष्ठानदर्शनादनुष्ठानकालापेक्षितस्मृतीरध्ययनविधिविहितनियतक्रमपठिता विधयः क्रमेण कुर्वंतीति तस्मात्क्रमात्स्मृति ६३

क्रमेतत्क्रमादनुष्ठानक्रमः। यद्यप्यनुष्ठानापेक्षस्य स्वैकप्रयोजनपाठ्यापाठक्रमादेव नतुपपन्नौ विधानैकप्रयोजनविधिपाठक्रम्येतादृशणीयः न
चदेवतामात्रस्मारकमंत्रस्य यागस्य स्वसामर्थ्यशंकनीयं। मंत्रस्य विरोध इत्यत्रापि तदनापत्तेः यदिच देवतास्य तिद्धाप्रतत्संबंधियागस्य रकत्वंत
त्र। तदत्रापि तुल्यं तथापि यत्र क्रमविहितयागेषु विशकलितपठितमंत्राणां लिंगवाक्यादिना विनियोगः तादृग्विधिपाठक्रमात् उदाहार्यः।६॥ सप्त
दश प्राजापत्यानिति विहितप्राजापत्येषूपाकरणादयः संनिपातितः प्रतिपशुभेदेन पदार्थानुसमयरूपेण कर्तव्याः तत्रोपाकरणं कुतश्चिदारभ्य
कुतश्चित्समाप्यं एवं नियोजनादावप्यनियमः नियामकस्य साधकभावात् प्राथमिकपदार्थप्रवृत्तेः पौरुषेयत्वादिति चेत्। प्राजापत्यपदार्थेषु सः
प्रवृत्तिक्रमाद्भवेत् ताविष्णुदेवी कृत्वा प्राजापत्येभ्यश्चरंतीति वचनावगतपश्वंतस्साहित्यबलात् सर्वैपदार्थानि मिथः प्रत्यासन्नाः कार्याः षोडशाभिर्व्यवधा
नेन विनाकरणाशक्तेः स्विकव्यवधानवारणाय प्रवृत्त्या नियमः ७ सायस्के सद्यपशूनालभतइति श्रुतेसवनीयस्थाने साहित्यं प्रधानप्रत्यासत्तेरिति
स्थितेउपाकरणादिष्वनियमाग्नीषोमीयपशावप्यं वा प्रवृत्तौ दृष्टेरिति चेत्। सायस्के सवनीयस्थानेन प्रथमं क्रियात्राश्विनग्रहग्रहणोन सवनी
उपस्थापितः इतरयोस्त्वग्नीषोमीयप्रणयनावभृथावुपस्थापको नात्र स्नः साहित्यवचनात्सवनीयानंतरमुपाकर्तव्येतयोरनियमः क्रमस्याप्रवृत्ति
दृष्टाग्नीषोमीयपशावप्यं वा ८ सारस्वतोभवत एतद्वै दैव्यं मिथुनं यत्सरस्वतीसरस्वांश्च सत्र पाठ्यपाठक्रमात् स्त्रीदेवत्ययागः प्रथमः पुंदेवत्यः पश्चात् त
त्र चोदकप्राप्तनिर्वापादावनियम इति चेन्न। सारस्वतेपदार्थानां भवेन्मुख्यक्रमात्क्रमः। अंगप्रधानयोरवर्जनीयवर्त्यवधिकव्यवधिवारणाय मुख्यक्रमाद्ग

६४ क्रमः अत्र यद्यपि याज्यानुवाक्याप्रवृत्तिक्रमात् तस्यास्तत्सत्यनुग्रहाविशेषेऽपि पूर्वेषामपि निर्वापादीनां क्रमः सिध्यतीति नेदमसंकीर्णोदाहरणं तथापि द
र्शे द्व्यंशः पूर्वंधर्माः शाखाहरणादयः प्रवृत्ताः तत्राग्नेयस्य निर्वापादयः । याज्यानुवाक्ययोस्तु विपरीता प्रवृत्तिः पाठवशात् तत्र प्रवृत्तेरैकरू
64 प्याभावात् प्रयाजशेषेणाहविरभिधारणेऽनियमप्राप्तौ मुख्यक्रमात् प्रथममाग्नेयस्येति सिध्यति ९ दर्शपूर्णमासयोराग्नेयानन्तरमाज्यहवि
रुपांशुयाजः ततोऽग्नीषोमीयः पुरोडाशहविः तत्र मुख्यक्रमाच्चरमपठिता अप्याज्यनिर्वापादयोऽग्नीषोमीयनिर्वापादिभ्यः पूर्वं कार्या इति चेत् । क्र
मो मुख्यक्रमात् पाठक्रमो च हि बलवान् अतः । मुख्यक्रमाधिगमपूर्वकत्वादंगेषु तदधीनक्रमस्य विलंबितप्रतीतिकत्वं पाठजस्त्वन्यानपेक्षः क्रम इति स
एव कार्यः ॥ १० दर्शादावग्नीषोमीयब्राह्मणात् पूर्वं पश्चादाग्नेयस्य मंत्रयोस्तु होत्रे विपरीतक्रमः तत्र विधिक्रमतत्स्यात्तिवेलायामवगतो बलवानुत
त्पत्त्यनंतरं मंत्रविनियोगमपेक्ष्य पश्चात् मंत्राधीनः क्रमः प्रधाने बुबुध्यमानो दुर्बल इति चेत् । विधिपाठक्रमादेवं मंत्रपाठक्रमो बली । स्वत्पत्त्यप्र
योजनमंत्रक्रमादेव प्रधानक्रमः तदभावे विधिक्रमोऽपि नियामक इत्युक्तं ११ आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सरस्वत्याज्यभागा
स्यात् बार्हस्पत्यश्चरुरित्यत्र प्रयोगवचनावगतांगप्रधानप्रत्यासत्त्यनुग्रहाय मुख्यक्रमेणाज्यधर्माः पुरः कार्या बार्हस्पत्यौषधधर्माः पश्चात् उप ग्र.म.
देशात्मकप्रयोगवचनेन चोदकबाधादिति चेत् । वैकृतद्रव्यधर्माणां चोदकाधिगततः क्रमः । चोदकश्च पुनरेककालं प्रयोगविधिः कल्प्याः पदार्था
स्तु प्राप्यमाणाः क्रमविशिष्टा एव प्राप्यंत इति नेराकांक्ष्यात् न तदुपजीविकल्प्यप्रयोगवचनाश्रयः क्रमो ग्राह्यः १२ चातुर्मास्येषु साकमेधास्य ६४

पूर्वोक्तैर्न्नीयन्ते अग्नये नीकवते पुरोडाशमष्टाकपालं प्रातर्निर्वपेत् मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्व्वासां दुग्धे सायं चरु
मिति तत्र प्रकृतिप्राप्तस्याहःकालत्वाबाधायायतनेषु प्रातरादिषूपक्रम्याश्वस्तनेषु प्रातरादिषु समापनीयाः पदस्थेऽस्त्वत्र तु सांगस्यापवर्गका
लत्वं प्रत्यक्षश्रुतं प्रातरादेशिकस्याहःकालत्वविरुद्धमिस्यति दिष्टबाधः नेह तथा विरोधाभावादिति चेत् प्रातर्मध्यंदिने सायमेकस्यैवाह्न इष्ट
व्यः। एकस्यैवाह्नः प्रातरादौ विहितः। चिकीर्षितप्रयोगार्थोपात्तप्रातरादेर्विशेषात्तस्य दीर्घत्वं नैकदेशार्थत्वमिस्यैकस्मिन्प्रातरादौ तु यदिष्टस्य
नातिदिष्टस्याहःकालता १३ अग्नीषोमीयपशौ प्रकृतितो हविरासादनकालप्राप्तप्रयाजानामपकर्षः श्रुतः तिष्ठंतं पशुं प्रयजंतीति तथा सवनीये
नूयाजानामुत्कर्षः आग्निमारुतादूर्ध्वमनूयाजैश्चरंतीति तत्र श्रुतमात्रस्यैवोत्कर्षोपकर्षस्य नाधिकस्य प्रमाणाकत्वादिति चेत्। स्यातामुत्कर्षाप
कर्षौ तदादिकतदंतयोः क्रमविशिष्टत्वेन चोदकप्राप्तानां क्रमबाधे वैगुण्यापत्तेस्तदाद्युत्कर्षः तदंतापकर्षश्च १४ प्रातरनुवाकत्रैषं होत्रे दत्ता
ततः प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेष्यतीति विधायानंतरं प्रचरणीहोमाद्याः सौमिका विहिताः तत्र प्रैषवशान्निर्वापस्तदैव कार्यः। तदनंत
रमेव सौमिकाः प्रचरणीहोमादयो ग्रीविहरवर्हिस्तृणीहि पुरोडाशानलंकुर्विति प्रैषाद्धस्तनाः कार्याः व्रीहिप्रोक्षणादयोऽलंकरणांता वा निर्वापप्रैषव्यव
हितसौमिकोपरध्यापकाभावात् निर्वापस्यान्यकर्तृकस्याध्वर्युकर्तृकप्रोक्षणाद्यनुपस्थापकत्वादिति चेत्। सवनीयाः सौमिकेभ्यः प्रागेव निर्वापबोधिताः।
निर्व्वापे द्वयोरपि प्रयोजककर्तृत्वात्तदुपस्थापितप्रोक्षणानंतरं प्रचरणादयः १५ ज्योतिष्टोमे अग्नीषोमीयप्रणयनात्स्वरतः पशुधर्मा यूपच्छेदाद्य आम्ना

ताः दीक्षा सुत्यपंक्तिं न त्रीत्यनेनापकृष्यमाणाः प्राचोऽप्यपकर्षेयुरिति चेत् । यूपकर्मापकर्षेऽस्मान्नप्राचामपकर्षणम् । एकप्रयोगवचनपरिगृहीतानां प
रस्परक्रमोऽगमिति तद्विलोपायापकर्षः स्यात् न ह तदस्ति प्रशायनीत्यस्य सौमिकत्वात् ततः कृतमात्रापकर्षः १६ सवनीयपशुतंत्रे सवनीयपशुरोडाशेषु
प्रस्तूयत इति वक्ष्यते तत्राग्निमारुतादूर्ध्वमनूयाजेषु ह्रियमाणेषु तत्स्यामाविनोः पिष्टलेपफलीकरणहोमयोरप्युत्कर्ष इति चेत् । अनूयाजोत्क
र्षे तौ पिनोत्कृष्येते दक्षिणाग्निके । अत्रापि भिन्नप्रयोगवचनपरिगृहीतयोः क्रमस्यानंगत्वात् न पिष्टलेपहोमाद्युत्कर्षः । १७ दर्शे सोहविरधि
वासनोत्तरमाम्नातावेदिः पूर्वं परमावास्यायां वेदं कृत्वा वेदिं करोतीति वचनेनापकृष्यमाणा पाठतः स्थानक्रमाबाधायप्राचोऽप्यपकर्षेदिति चे
त् । दर्शे वेद्यपकर्षे पिनतप्राचामपकर्षणं । पाठोपस्थितस्य प्रकरणादुभयार्थत्वात् सर्वं त्वाम्नायुपस्थितस्यामावास्यायां वा केन विशिष्यविनि
योगात् क्रमस्तृतीये पूर्वमपकृष्यमाणा वेदिः नप्राचामपकर्षणापालं पाठोपस्थापकक्रमस्यापोऽर्थमास्यां निवेशः । १८ मरुद्भ्यः सांतपतेभ्योम
ध्यंदिने चरुमिति क्रतासांतपनीयादेवात्मानुयाजप्रतिबलादुत्कृष्यमाणाग्निहोत्रमुत्कर्षेत्क्रमस्यानंगत्वेऽप्येककालपतितयोर्युगपदनुष्ठा
नायोगात् वैपरीत्ये त्वग्निहोत्रस्य मंत्रवत्त्वणायनवाधादिति चेत् । उत्कर्षेणाग्निहोत्रस्य भवेत्सांतपनीया । अनुपादेयस्य निमित्तविशेषणकालस्य
वाधायोगात् उपादेयांगस्य मंत्रस्यैवैकस्येप्यग्निहोत्रकृतैव सांतपनीयास्यात् । १९ तं परीत्य मुक्थ्येभ्यो निर्गृह्णातिषोडशिनमिति षोडशिनं ग्रहकृत्य
कृतं तत्रोक्थ्यादीनां दैवाडुत्कर्षे षोडशिनोत्कृष्टव्यः । अन्यथाग्रहं वा गृहीत्वेति वचनात् न तस्तोत्रमप्युत्कृष्येत तथा च समयाविभिन्ने सूर्ये षोड

शिन्नस्तोत्रमुपाकरोतीति श्रूतस्तोत्रकालोनुपादेयो वाध्येत उक्थ्यपरभावस्तत्क्रमसमात्रे वाध्यतामिति चेन्न।उक्थ्ये नस्यात् षोडशिन उत्कर्षे स्तस्य
क्रयाक्रमोपितस्य रश्मिवः प्रधानयागांगं कालस्तत्तदंगस्तोत्रांगं तथा चांगगुणविरोधन्यायात्कालस्य वाधो न क्रमस्येत्युत्कर्षः २०॥ ॥इ
ति श्रीलघुगार्ग्निकारिकायां पंचमस्याध्यायस्य प्रथमः पादः॥ ॥वाजपेये सप्तदश प्राजापत्याः सहकार्याः वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीत्युपादे
यपशुमाहित्यस्य विवक्षितत्वात् तत्रादुपकारकं तंत्रं उपाकरणादीनि द्रव्यसंस्काराः प्रतिकर्मावसापि चोदके व्यचेततया प्राप्तत्वात्सा
हित्यविधायि प्रयोगवचनाच्चैकैकस्मिन्कांडतः समाप्यानि स्यात् उपकांग विषयं साहित्यवचनमिति चेत्॥सप्तदशार्थानुसमयः प्राजापत्यपशुत्वजे
।चोदकस्यानुमानिकत्वात्प्रयोगवचनस्य चक्लृप्तत्वात् न प्रत्यक्षवचनसंकोचकत्वमिति एकैकेनानुसमय उपाकरणादीनां १ नन्वेवमश्व
प्रतिग्रहेष्टावपि पुरोडाशाभिश्रयणादीनामाग्नेयादिष्विव पदार्थानुसमयः स्यादिति चेत्।सहस्त्रयश्वसनेवकांडानुसमयो भवेत्।सहस्त्रा
यश्वदाने निमित्ते पोडशीका दीवानुणाचतुष्कपालेषोत्तावस्तु पुरोडाशेष्वभिश्रयणीयेष्वाधानाम सभीभावस्यादित्यसंभवतां कांडानुसमयः
३ दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः पदार्थानुसमये स्थिते एकैकेन मुष्टिनानुसमेयः प्रतिमुष्टीयत्नादर्शनादिति चेत्।एकैकेतानु
समयो मुष्ट्यादिषु न युज्यते।पदार्थीनामेकविधिविहितमंगं चतुरो मुष्टीन्निर्वपतीति चतुर्मुष्टिनिर्वापविधानात् तेनैवानुसमयः एवमाग्नेयकपा
लान्युपधायान्येषामुपधानं एवमवदानांजनयोरपि॥४॥ द्विहविषोवयतीत्येकविधिविहितद्व्यवदानमेकस्य कृत्वाऽन्यत्वेवाप रस्यकर्तव्यमिति चे

२५

६६ 66 नाज्यावदानं प्रदानांगं । चतुरवत्तं जुहोतीति विध्यर्थप्राप्तावदानमुद्दिश्य तद्विशेषो द्वित्वमिति नियममात्रं विधीयते द्वित्वविशिष्टावदानविधाने पि द्रव्यार्थत्वा
पत्तेर्भावयत्वेन विधानमिति प्रदानांगत्वेनानुसमयः ४ अग्नीषोमीये यूपधर्माः अंजनोच्छ्रयणादयो यूपैकादशिन्यां देवोदकेन प्राप्ताः प्रतियूपमे
कैकशः कार्याः अंजनादिपरिव्याणांतानवसर्गवचनस्य प्रकृतावार्थिकत्वेनातिदेशादिति चेन्न । अन्यापरिव्याणमंजनं । नित्यवदाम्नानेर्वचनार्थव
त्वाय यजमानानवसर्गविध्युक्तेनेव परिव्याणांतेनानुसमयः ५ अग्नीषोमीयपशावदानानां तदंगप्रदानप्राप्तौ वचनं देवतान्यवदायनताच ।
त्स्वेव होतव्यं सौविष्टकृतान्यवघ निसौविष्टकृतान्यवदायनतावत्स्वेव होतव्यमेडान्यवद्यतीति तदेकदेवत्येषु पशुगणेष्वेकस्य पशोः देवतसौविष्ट
कृतेडान्यवदाय पश्चात्पितरथा कार्यं अन्यथा तेषां नैरंतर्यबाधकचोदकबाधापत्तेरिति चेन्न । प्राजापत्यावदानानां नानाकांडानुसमीयतयदार्था मिथः
संश्लिष्टाः कर्तव्या इति प्रकृतावर्थः पश्वेकत्वान्नेषामानंतर्यमार्थिकं अत्र तु वाचनिकं साहित्यं स्यैनानावीजाइष्टयः अग्नये गृहपतये पुरोडाशमष्टाक
पालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमित्यादय आम्नाताः । तत्र कृष्णाजिनास्तरणोलूखलाधिवर्तनबीजावापावघा
तप्रावयनविवेचनफलीकरणानि पृथक्समर्थत्वात् पृथगनुसमेयानि उलूखलमुसलभेदेन विना तदनुपपत्तेः तद्भेद इति चेन्न । नानावीजे
ष्वप्युलूखलं नैव भिद्यते तंडुलभावनावयवत्वेन विधानात्प्रष्टकादार्थत्वं तेषामिति कृष्णाजिनास्तरणादिफलीकरणांतेनानुसमयः अतो रा०म०
नोलूखलादिभेदः ७ दर्शादावष्टाचुप्रभृतिष्ट स्नातीति प्रयाजानूणामार्थमेकस्मामुपभृति चतुर्गृहीतद्रव्यं गृहद्वहीतं तत्रयेव यशोप्रामंतत्रेवा ६६

नूयाजेषु पृषदाज्येनानूयाजान्यजतीति द्रव्यविकारः कृतः प्रयाजानामविकृतमेव तत्रानूयाजोद्देशेन पृषदाज्ये विचित्रत्वं विधीयमानं तत्रासंभवात्
तदंगभूताज्यस्य वत् इति तत्रोभयोरसंकराय पाठकल्प्यक्रमं बाधित्वा पदार्थभूतोपभृदेकत्वाबाधाय प्रयाजेषु कृतेषु तत्रैव पृषदाज्यग्रहणमिति चे
न्ताः पृषदाज्ये पात्रभेदः पात्रैकत्वक्रमयोर्ग्रहणांगत्वात् ज्ञापकप्रमाणस्य चोदकस्यैकात्म्य बाध्यबाधकभाव विनिगमना विरहात् प्रयाजाज्यग्रहोप
स्थापितस्यास्यागायोपभृदंतरमुत्साद्यं ८ अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदिति नक्षत्रेष्टिं विधायानंतरं सोत्र प्रधानानंतरदे
शे जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्याद्युपहोमा विहिताः तासामिष्टिमाम्नातिदेशात्तस्य देशाः शामाः तत्र प्रत्यक्षपठितोपहोमानंतरं मातिदे
शिकानामिष्टाः कार्या इति चेत् ॥ स्यादंते वैकृताहुतिः । कृतोपकारप्राकृतातिदेशावाक्यस्य प्रधानविधिवाक्यशेषत्वतया नदेकवाक्यतापन्नोत्स
न्निविधे विहिताः प्राकृताः वाक्यांतरविहितोपहोमात्पूर्वं विहिताः प्रथममनुष्ठेयाः अन्यतरकांक्षया संनिधिना विनियुक्ताः कल्प्योपकाराहो
माः पश्चात् ९ राजसूये भिषेचनीयाख्ये सोमयागविध्यनंतरमक्षैर्दीव्यति राजन्यं जिनाति शौनःशेपमाख्यापयति राजानमभिषिंचतीति विदेव
नादयो विहिताः तत्राभिषेको माहेंद्रस्तोत्रं प्रत्यभिषिच्यत इत्यभिषेचनीयप्राकृतांगमध्येऽपकृष्टः न प्राचोऽपकर्षतिपूर्वेषु उपकृष्यमाणो वे
दिदेवाभिवासनादीन् अस्माभवत्याणाम कृत्स्नक्रमत्वादिति चेत् । देवनाद्यपकर्षणादभिषेकापकर्षणे । अकृत्स्नक्रमत्वेपि प्रत्यक्षपाठादत्रैवच
तुर्णां क्रमोवगतः प्राकृतांगपश्चाद्भावस्य विदेवनादीनामानुमानिकत्व इति प्रत्यक्षावगतक्रमाबाधाय तदंतापकर्षः १० अग्नीषोमीये सावित्रहोमोरवा

६७ संमरणीयप्राकृतपदार्थाविधायपश्चाद्दीक्षणीयादयः प्राकृताश्चप्राकृतगुणाविशिष्टाः कृताः तत्र कृतोपकाराद्दीक्षणीयादीन्कृत्वा अकृ-
तोपकाराःसावित्रहोमादयउपहोमवत्पश्चात्कार्यादीक्षणीयायाःपश्चात्साद्गुण्यविध्यर्थोनुवाद इति न पश्चादनुष्ठानंप्रापयतीति चेत्।पू-
६७ र्वसावित्रहोमादिदीक्षणीयेष्टितोभवेत्।गुणार्थमपिपश्चात्त्वस्मत्पाठोगुणग्रहणोनोऽपश्चादेवानुष्ठानंगमयतिप्राकृतपाठस्तु चोदकात् अतः
सावित्रहोमाद्यनंतरंदीक्षणीयादयः कार्याः ११ तत्रैवदीक्षणीयायनंतरं रुक्मप्रतिमोचनमाम्नायाम्नातं प्रत्यक्षपाठादीक्षितसंस्कारादिभ्यः पूर्वं कार्य-
मितिचेत्।स्याद्रुक्मप्रतिमोकादिपश्चाद्दीक्षितसंस्कृतेःदीक्षणीयादिभिःसहप्रवृत्तितःकृतक्रमकादीक्षितसंस्कारादयोऽनिर्दिष्टास्तद्बाधा-
रंल यदीक्षणीयानंतरएवकार्याःरुक्मप्रतिमोचनादिकं त्ववश्यविधेयमितिचेत्किंचिद्धितेनक्रमंगमयतिसावित्रहोमादेस्तुप्राकृतांगपूर्वपाठात्
पूर्वक्रिया १२।। ।।इतिपंचमस्यद्वितीयःपादः।। ।।अग्नीषोमीयेएकादशप्रयाजान्यजतीति अग्नेः षडुपसद इति प्राकृतानांप्रयाजादीनां
संख्याविवृद्धिःकृताततश्चप्रयाजाद्युद्देशेन विधीयमानासंख्याउद्देश्यपसाहित्याविवक्षणात्प्रत्येकंभवतीतिचेत्।प्रयाजेकादशत्वादिसर्वसंपा-
द्यमिष्यते।एकस्यवापंचानांवादशत्वान्वयायोग्यत्वात्तंत्राभिहिताः ते तथैव स्वप्रयोगं लक्षिताः तदन्नैकादशत्वेन स्वप्रयोगाद्वारोपकृताभवं- २म०
तीतिसर्वसंपाद्यास्यात् १षडुपसदइत्यत्रैकैकंद्विरभ्यसनीयं दंडकलितवत्।त्रिरनुवाकःपठ्यतामित्यादौतथादृष्टेरितिचेत्।स्वस्वस्थानावि- ६७
वृद्ध्यैवषट्त्वायुपसदांभवेत्। ततीयांकृत्वापुनःप्रथमायांक्रियमाणायांप्राकृतक्रमबाधस्यात् अतःस्वस्वस्थानेद्विर्द्विरभ्यसनीयाः २ एकविं-

शति मतु ब्रूयादिति सामिधेनीविवृद्धिक्रतावागमे कर्तव्ये आगम्यमानर्चामंते वा समिध्यमनवतीं समिद्धवतीं चांतराला निवेशः इयं वै समिध्यमा
नवती असौ समिद्धवती यदंतरा तद्धाय्या इति धाय्यानां द्यावापृथिवीत्वेन स्तुतयोर्मध्ये आकाशत्वेन संस्तवस्तन्मध्यविधिमासां गमयतीति चेत्नासा
मिधेनीषु धाय्यानामंत एव निवेशनं । नधीयमानत्वं धाय्यानां त्वं स्तोत्राय यथार्थमागम्यमानेऽतिप्रसक्तेः पृथुपाजवसो धाय्येत्यादिवैदिकता एव तच्छन्दवा
आः ता एव तयोर्मध्ये अन्यासां गंतवीते निविशते २ ज्योतिष्टोमे बहिष्पवमाने त्रयस्तृचाः स्तोत्रीयो अनुरूपः पर्यास इति विवृद्धस्तोमकक्रतुषु भागाः त
त्रागमेन संख्यापूरणं चक्ष्यते तत्रागमयमानानां प्राक्पर्यासान्निवेशः द्वादशाहे षाडहिके द्वितीयेऽहनि विवृद्धस्तोमके षोडशतोत्रत्वे पठिता तत आ
गतको ष्टवशा वत्सः पठिताः न तः पर्यासाः तत्सामान्यादन्यत्राप्येवं अन्तर्वा चिपर्यासस्य समाप्त्यानात्वेति चेत् स्तोमवृद्धौ तथा गंतो इत एव निवेशनां ने
तादृगनुमानं मण्ड्वार्थं निर्णयायालं तस्मात्प्राप्रकृतावेव अतीतेनुवादएयताइतिन्यायादागंतूनामंत एव निवेशः द्वादशाहविकारेष्वपिह
षएव तस्य एव तत्र अन्येषां गंतवीते ४ विवृद्धस्तोमकक्रतौ माध्यंदिनार्भवपवमानयोः साम्नां मध्ये कर्तव्ये आगम्यमानानामंत्यत्वे चेआगंतुत्वान्निवेश
इति चेत् । साम्नामागम्यमानानां गायत्र्यादिषु वेशनं । त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्र ह्येवावपंत्यत एवोद्वपंतीत्यता एषाधीतेन
सर्वया गार्ध्यानपवमानगतगायत्र्याद्यतिरिक्ते आनायोद्ध यद्योः परिसंख्यानत्वान्नास्त्वेव निवेशः ५ अंशुं गृह्णाति अदाभ्यं गृह्णाति चित्रिणी रूपदधाती
त्याघनारभ्यस्कृतं ग्रहेष्टकं सवनरिकतिशेषः तयोस्तेन तेन यथायोगं निवर्त्तनमस्पष्टत्वे अतः प्रतिसवनं प्रतिचयनं च कार्यमिति चेत् । औपानुवाक्कत

६८ ग्निशेषोऽस्मादिग्रहेष्वकं। तेन निरीयत् तृतीयकांडस्योपानुवाक्यकांडमिति याज्ञिकप्रसिद्धिः तत्र विहितमोपानुवाक्यसंस्थादिग्रहेष्वकं कृतत्वमर्थकृतोः
फलवत्वादन्ये अफलवदुपकारकत्वादिष्टकाभिरग्निमिति वाक्यादपि तदर्थत्वं॥६॥ चित्रिण्यादीनां पंचमचित्यंते उपधाने प्राकरणिकीनां क्रमप्र
कर्मा वाधायया कांचिद्ब्राह्मणावतीमिष्टकामभिजानीयात् तां मध्यमायां वितावुपदध्यादिति मध्यमायां प्राप्तस्यानुवादः सर्वासां ब्राह्मणावत्वेन
68 तत्रैव सर्वोपधानायोगादिति चेत्। इष्टकमध्यमचितौ प्रत्यक्षब्राह्मणोदिताः। अग्निरूर्ध्वं जानातेः प्रत्यक्षवाचित्वात् तत्प्रत्यक्षब्राह्मणविहितामप
ध्यमायां। लिंगादिकल्पितवचनविहितास्वन्यासूपधेयाः ७ मध्यमायामपि चितौ प्राकरणिकीनामनंतरं चित्रिण्यादीनां निवेशात्र अवायाप
पदेवास्योनंयच्छिद्रं तदन्येन पूरयति लोकंपृणाच्छिद्रं पृणेति मंत्रविधिः नेष्टकाविधिः अतश्चित्यंतरे सावकाशं लोकंपृणायाः पूर्वकं त्वमिति २
चेत्। पूर्वं लोकंपृणायास्तत्र मध्यमायामपि तिमाः। अविशेषश्रुतवच्च न स्वन्यायमात्रेण संकोचायोगात् प्राक् लोकंपृणायाश्चित्रिण्यादयः।८॥
आधानानंतरं पवमानहवींषि द्वादशसु रात्रीष्वनुनिर्वपेदित्यत्र लक्षणानि तन्मध्ये अग्निहोत्रादीन्याहवनीयस्य सिद्धत्वात्कर्तव्यानि पवमानेष्टयस्तु
सिद्धस्य संस्कारका इति चेत्। अग्निहोत्रादिकर्माणि पवमानेष्ट्यनंतरं। पवमानहविषां भाष्यमतेः अर्थत्वात् वार्तिकमते आधानांगत्वात् पूर्वमप्र १॥०
निष्पन्ने इष्टानंतरमग्निहोत्रादीनि उभयजन्यसंस्कारसमुदायस्याहवनीयशब्दार्थत्वात् ९ तस्मादग्निचिद्वर्षति न धावेदित्याद्यग्निचिद्व्रतानि चयन ६८
निर्वृत्तौ निमित्तसंपन्ने दाहितास्निव्रतवत् अतोः पूर्वं भवंतीति चेत्। अग्निव्रतानि कृतं ते। अग्निकर्मिकाचयनकरणिकाभावनानिमित्तं कृतरूपका

रविशिष्टत्वेन चाग्नेर्भाव्यता उपकारस्य क्रत्वर्थाहवनीयाधारत्वं स्वाकृतुन निर्वृत्तः तद निवृत्तौ फलापवर्गिणी भावनापि न निवृत्तेति न तत्त्वं तत ए
व व्रतानि दृष्टांतेत्वग्निसंस्कारस्य निमित्तत्वाद्युक्तं तदनंतरं प्रवर्तनं व्रतस्य १० आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति तथा दं
डेन दीक्षयतीत्यादिच श्रुतं सर्वं चादृष्टार्थं समुच्चितं स तद्दीक्षितत्वोत्पादकमिति सर्वांते दीक्षितो न जुहोतीत्यादीति व्रतानीति चेत्। इष्यंते दीक्षि
तव्रतं। क्रियार्थक्रियोपदेशत्वद्विधानाद्यमनियमादिव्रतार्थक्रियाद्वारेवाव्यापारात्मकदंडादयस्तु तत्संस्कारव्यंजकाः तद्व्यंजनप्रयोजनं भृति
वननेदानुः प्रवृत्तिः अत इष्यंते दृष्टं हनाम्नातीत्यादिव्रतानि ११ काम्यनैमित्तिकेष्टयः सौर्यायाः क्रमपठिताः प्रयाजादिवत्क्रमेण कर्तव्या इति चेत्
। काम्यनैमित्तिकेष्टीनां न पाठक्रमतः क्रमः एकप्रयोगवचनपरिगृहीतानीक्रमापेक्षिणां पाठः क्रमनियमाय भवेत् न चेह भिन्नफलानां भिन्ननि
मित्तानां च तथात्वमित्यनियमः १२ कश्चित्प्रयोगवचनभेदेपि वाचनिकः क्रमो भवति एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः तस्मादेतेनेष्ट्वा
थान्येन यजेतेति तत्र चतुःसंस्थो ज्योतिष्टोम एतच्छब्दार्थः यज्ज्योतिष्टोम इत्यस्या विशेषादिति चेत्। अग्निष्टोमस्य निर्देशोप एतेनेत्यसोमतः। अ
ग्निष्टोमस्य नित्यत्वादन्यासां काम्यत्वेन विकृतितया प्रकरणाम्नातत्वात् एतेनेति यागस्य करणत्वप्रतीत्या तत्र संस्थानामेवकारणत्वेन यागस्याप्र
यत्नपाककरणत्वायोगाच्चाग्निष्टोमसंस्थस्यैवैतच्छब्दपरामर्शः १३ अथान्येनेति संस्थानामेव ग्रहणं तत्रैवाप्रयत्नेन यागानुवृत्तेः संनिधानादिति
चेत्॥ संस्थांतरगवादीनामथान्येनेत्ययं क्रमः। अग्निष्टोमसंस्थाकाम्यसोमयागमात्रपरा यशब्दस्वारस्यात् तदन्यमात्राणां संस्थांतरैकाहाहीनसत्रा

६९ णामग्निष्टोमोन्तःकालतानोच्यते १४ अन्यशाष्टेन सर्वस्यायाहक्तः सर्वग्रहणसक्तौ वाकाशे वेत्तायो वै त्रिवृद्दन्यं पञ्चक्रतुमापद्यते सत्तं दीपयतीत्या
दिना एकस्तोमानां त्रिवृदग्निष्टोमः पंचदश उक्थ्यः सप्तदश उक्थ्यः एकविंशः षोडशी स्तोत्राणां निर्देशादिति चेत् । न चायमेकस्तोमानां निर्देशः सर्वशो
यतः । निर्दिष्टादिसंबंधमात्रे णावाक्यशेषोपपत्तेर्नो विशेषप्रवृत्तावस्य कृतिसंकोच इति ॥ इति पंचमस्य तृतीयः पादः ॥ ॥ ऐंद्रवायवं मैत्रावरुणा
69 माश्विनमिति पठित्वा आश्विनो दशमो गृह्यत इति श्रुतं अग्निहोत्रं जुहोति यवागूं पचतीति च तत्र अश्रुत्यर्थ पाठानामविधिषत्वात् पूर्वं वा पश्चाद्वा वि
कल्पेनानुष्ठेयमिति चेत् । पाठश्रुतेरर्थतत्त्वदुर्बलः क्रमसाधने । श्रुतिविहितेपाठान्न तत्कल्पनायोगात् द्रव्यप्रयोजनविरोधे च पाठगुणोदरणात्तद
ग्रामस्थानएवाश्विनग्रहः पठ्यते वतया होमः १ दर्शादौ शाखाच्छेदादयः सान्नाय्यधर्माः प्रथमं प्रवर्तन्ते प्रदानं त्वाग्नेयस्य पूर्वं पश्चात्सान्नाय्यस्य तत्रास्ति
ष्टहृदयवदानादिकं प्रवृत्तिमुख्यक्रमयोरनुरोधादनियतमेकार्यमिति चेत् । प्रवृत्तिक्रमतो मुख्यक्रमस्त्व बलवान्भवेत् । मुख्यक्रमादेव वचनात्सर्वेषु
क्रियमाणानां केषांचिदेव स्वप्रधानात्तविप्रकर्षो नान्येषां प्रवृत्तिक्रमे तु सर्वस्य विप्रकर्ष इति स दुर्बलः २ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति
ष्टिपूर्वकत्वं सोमेश्रुतं सोमपूर्वकत्वमिष्टेरनुमितमिति न तथानुष्ठानमिति चेत् । आधानं प्रत्येष्टिपूर्वत्वं सोमपूर्वत्वमप्युभो । आधानाव्यवहितोत्तरत्वं राम०
सोमेन पश्येमावास्यायां नाद्धीतेति वचनात्सोमे श्रुतं आनंतर्यमात्रं सोमस्य मि त्यत तथा विनाप्यस्माद्वचनात्सिध्यतीति वचनार्थवत्तापाद्यव्यवहितत्व ६९
मर्थः तदिष्टिपूर्वकत्वे सोमस्य न घटत इत्यर्थात्सोमानंतर्यमिष्टेः । ननु वाचनिकमित्याधानस्य सोमादिष्ट्याव्यवहितं पूर्वमनुष्ठानं अत्र क्रियार्थ

क्रियोपपदविहितल्युडन्तश्रवणात्सोमांगत्वमाधानस्येतिनयुक्तं अग्निहोत्रादेस्तदुपकारकत्वमात्रेणालक्षणयाप्युपपत्तेः दर्शपूर्णमासाभ्या
मिष्ट्वेत्यत्र प्रयोगभेदेऽतत्रिवृत्पितककैर्नकामावादाश्रयेकालक्षकत्काप्रत्ययवत् २ आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमीयो भवति
यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत् तर्हि स उभयदेवतो भवतीति वचनेन पौर्णमासीमात्रोत्कर्षप्रतीतावपि केवलामावास्याप्रयोगाद
सोमयाजिनः फलानुदयात् पौर्णमास्युपक्रमता चेत्सोः हत्त्वोत्कर्षपर्यवसानात् विप्रस्य सोमपूर्वत्वमेवाधानस्य अन्यथोक्तकल्पद्वयं न चैतत्
न्नामकं तद्धर्मकं वा कर्मान्तरं विधीयत इति युक्तं नाम्नोनानार्थत्वधर्मलक्षणार्थत्वयोः विशिष्टविधिगौरवस्य चायुक्तत्वात् यद्वा पौर्णमासं हवि रि
त्येकदेशश्रुत्या तावन्मात्रोत्कर्षः न चान्यस्य निष्फलत्वं असोमयाजिनो वचनबलात्तदुपक्रमतस्य तावन्मात्रस्य फलस्य च कल्पनादिति चेत् । ब्राह्म
णस्याप्युभौ कल्पौ हविरेकं हि श्रूयते । न हत्त्व पौर्णमास्युत्कर्षः अदो हविरित्यग्नीषोमीययागोत्कर्षश्रुतेः तेः तन्मात्रविधुरदर्शपूर्णमासयोर्वि
प्रस्याप्यधिकार इत्यन्यथोदितवाद्वावेवकल्पौ ४ सोमेन यक्ष्यमाणोऽग्निमादधीत नर्तून्पृच्छेन्न नक्षत्रमित्यत्र श्रुतत्रैतत्तुतरत्रातिक्रमश्चाधानस्य तत्स्व
करणादिति चेत् । श्लाघनादरवचः सोमार्थं परिगृह्यते । तस्मामेवशास्त्रायां यदहरेवैनं यज्ञ उपनमेत् तदग्नीनादधीत सादिनाद्याधानकालानादर
सोक्तत्वात् सोमकालवाधाय ५ अग्नीषोमीयपुरोडाशवदुपांशुयाजस्यापि तदेवस्त्वादुत्कर्षइति चेत् । ब्राह्मणस्य पुरोडाशमात्रमुत्कर्षमृच्छ
ति ॥ अग्नीषोमीयानहेय्यप्यं विष्णुप्रजापतिं वोपादायोपांशुयाजं करिष्यतीत्यनुत्कर्षः ॥ ६ ॥ सोर्यादिविकृतयः चतुर्दशामुपक्रम्यपर्वणिसमा

१० प्यत इति प्रकृतिवद्ग्रहकालाः यइत्येति वचनं पौर्णमास्यां पौर्णमास्येत्यादिवदेकदेशपरं न च तत्र पूर्वेद्युरत्वादितो भवति उत्तरस्म इत्युपजनतीतिव
चनमस्तीति वाच्यं तस्येहाप्यतिदेशादिति चेत्॥ सायो विकृतयः । तत्तीयास्कृतान्तत्कारणाकभावनापोक्षतकालस्यनातिदेशात्संकोच इति पौ
र्णमासीविकाराश्च मावास्याविकाराश्च प्राकृतकालव्यवस्थावादरेणा पौर्णमास्याममावास्यायां वाकृतत्वाः प्रयोक्तव्याः ७ नासोमयाजी सन्नये
त् आग्नेयो वै ब्राह्मणः इत्याम्नासान्नाय्याग्नीषोमीययोः सोमोत्तरकालत्वश्रुतेः तद्विकृतीनामपि श्रातिदेशिककालानुरोधात् सोमोत्तरकालत्वमि
त्याह ॥ सोमादूर्ध्वं सान्नाय्यविकृतयः ॥ उपलक्षणं चेतत् ॥ अग्नीषोमीयविकृतया इत्यपि द्रष्टव्यं वचनतोत्यात् ८ प्रकृतिवत्सोमविकाराणामपि प्रा
गिष्टेरूर्ध्वं च संभव इति चेत् । तथा सोमविकाराणामूर्ध्वमिष्ट्योरनुष्ठितिः । सोमस्येष्टेः प्रागनुष्ठानेन वाचनिकं किंत्वाधानानन्तर्यवद्विहितोत्तरं त्ववचनादा
र्थिकं न चार्थिकं चोदकः प्रतिदिशेत् किं चैषवाचप्रथम इति वचनादग्निष्टोमोत्तरकालत्वं विकृतीनां न चेत्तादृशमाधानानन्तर्यं आधानोत्तरकाल
स्यैकः प्रत्यक्षवचनात्प्रकृतस्य वाक्यान्न विकृतेः संभवतीति इष्यानन्तर्यमेव प्राकृतं विकृतिष्वतिदिश्यत इति सोमविकाराः सर्व इष्ट्यनन्तरं सोमक्र
त्वापश्चात्कार्या इति ॥ अत्र केचित् आश्वलायनेन प्रागपि सोमेनेके इति सूत्रणात् इष्टेः पूर्वकालः सोमांगं इष्टेः प्रागपि सोमेनेत्येक आचार्या इति
सूत्रार्थः तथा च सोमविकारेष्वपि इष्टिपूर्वकालस्यातिदेशादाधानानन्तरं वा धानेनाग्निष्टोमं कृत्वा ऽकृत्वे विस्मा इमं सोमविकाराम् अवं तीत्यावक्ष्ये रम.
ते । अत्र विरोधाधिकवार्त्तिकोक्तसायेन नानुष्ठानलक्षणामप्रमाणं स्यादिति द्रष्टव्यम् ॥ ॥ इति लघुवार्त्तिकटीकायां पंचमस्य चतुर्थः पादः १०

समाप्तश्चाध्यायः॥ ॥दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत पशुकाम इत्यादौ धात्वर्थ एव पदस्थस्वप्रत्ययोपात्तभावनाभाव्यः न स्वर्गः भिन्नपदोपात्तत्वा
त्तस्य च चंदनाद्यात्मकः सिद्धः साध्ययागभावनायां करणं। स्वर्गकामनावा समुद्गमनो ध्यानवत् यागं गमिति चेत्। संबध्यंते फलत्वेन स्वर्गाद्याः का
मनाविताः॥ पदस्थस्य पेस्यासमानप्रत्ययस्थितिवल्लीपत्तान्नया विधिप्रयुक्ता भावनागम्यमाना नाप्रतूपार्थभाव्यं स्वीकरोतीति भिन्नपदोपात्तोपि
प्रीतिरूप स्वर्गो भाव्यत्वेन संबध्यते काम्यमनत्वादपि। फल एव कामनाख्यारस्यात्। तथा च फलवत्वात्कर्मणां तत्स्वामित्वरूपाधिकारिलाभादधिका
रलक्षणमारख्यं १ स्वर्गकामवाक्ये न तत्कामनावतां सर्वेषां अधिकारप्रतीतेस्तस्य प्रधानवाक्यतया बलवत्तो अंगवाक्यैः संकोचायोगात् ततदनुरो
धेनांधादेवाप्यावेक्षणादिरहितमेव फलाय भवतीति तिरश्चामपि चतुर्दश्यपुपवासादेः सारमेयादिष्वपि सिद्धेरधिकार इति चेत्। मूकदेवतिरश्चां तु नास्तिक
र्मस्वधिक्रिया। अंगानि न पुरुषं प्रति विधीयंते अंगत्वविरोधात् किं तु क्रतुं प्रति। प्रधानवाक्यैकवाक्यतादर्शवाक्यानां ततः तावदंगोपसंहारसमर्थप्रत्ये
वतद्धि धेर्न्याधादेः क्रतुविधिरिति न तेषामधिकारः तिरश्चांद्रव्याद्यभावात् न प्रधानेपि सामर्थ्ये देवानां तु यजनीयदेवांतराभावात् अप्ययभावाद्द्वियहाभा
वाच्चानधिकारः २ स्वर्गकाम इत्यत्र लिंगस्य प्रातिपदिकार्थतया ग्रहत्ववद्विवक्षितत्वाद्विवक्षितलिंगस्य पुंस एवाधिकारः भार्यापुत्रश्च दासश्च त्रय
एवाधना स्मृता इति वचनाद्द्रव्यत्वाद्यनधिकारस्त्रिया इति चेत्। स्त्रीपुंसयोरधिकृतिः। प्रकृत्यर्थोपि लिंगमुद्देश्यविशेषणत्वाद् ग्रहैकत्ववद
विवक्षितं न च प्रकृत्यर्थत्वं विभक्तिविकाराणां टावादीनां चावयव्यतिरेकाभ्यां तद्बोधकत्वादतः स्त्रिया अप्यधिकारः कर्त्रेनादि अर्जनसंभवात्

२१ पुत्राभावेदुहितेत्यादिवचनाद्धर्मेचार्थेचनातिचरितव्यापाणिग्रहणात्तुसहत्वंकर्मसुतथापरिग्रहेषुश्चेत्यादिस्मृत्यन्तराद्व्यत्वंयेयज्ञपत्नीमिति
लिंगाच्चभार्यापुत्रश्चेत्यादित्वस्यातेऽपशं ३ आख्यातोपात्तसंख्याया उपादेयकर्तृविशेषणत्वेनयाविवक्षितत्वात् स्त्रीपुंसयोःपृथक्प्रयोगइतिचेन्न
सहैवस्यान्नयोक्तसाविभागनिषेधेनसंसृष्टद्रव्यत्वादितरेतरप्रयोगेइतरेतरकर्तृकार्यानेकशाखाचारंभनःदिलोपापत्तेः पत्नीयजमानशब्दयोः
७। स्वामिवाचितयात्रत्तियदन्यतरस्यापिपरिक्रयासंपाद्यत्वात्कर्तृत्वस्यचदंपत्योर्व्यासक्तत्वेनाग्नीषोमौदेवतेशिवत्सहप्रयोगोपपत्तेःसंसहैवाधि-
कृतिस्तयोः ४ आधानंप्रकृत्यक्षौमेवसानावग्निमादधीयातामितिश्रूयतेतत्राधीयातामितिकर्तृकारकद्वयश्रवणेनपूर्वाधिकरणवत् दंपत्योःक-
र्तृकारकत्वाकर्मासक्तत्वात् द्वौपुमांसौस्त्रियौवाएकैकोगम्यतेउत्पत्तिवाक्यत्वाधानमात्रविधिपरत्वेनोपादेयकर्तृविशेषणत्वात्याकर्तृत्वमपिविदधाति
विधिगौरवप्रसंगात् तथाचोत्पन्नाचप्राप्तंकारकद्वयंसमानप्रत्ययश्रुत्युपात्तधात्वर्थेविधीयतेक्षौमवसनत्वसंबंधविधावस्यैतंवाक्यस्यात् नचक्षौ
मस्यापिविधानाद्वाक्यभेदःदुक्षुशब्दइत्यवयवयोगान्मालिप्यवत्यागोपपाद्याततस्याबातस्यानुवादत्वात् तस्मात्कारकद्वयविधिरितिचेत्क्षौमे
वसानौस्त्रीपुंसावुत्पत्तिवाक्येएकत्वाविवक्षाकारणाभावादुत्पत्तिशिष्टतद्विरोधेनद्वित्वविधिःक्षौमशब्दस्यह्रढयाजातिविशेषवाचीसंनिधिवशा दांम.
त्परिस्पष्टार्थःस्यात्क्षौमवसनपाद्यानर्थक्यंचद्विवचनंत्वग्नीषोमौदेवतेइतिचरुविधानद्वित्वपरंतस्माद्यथाप्राप्तवसनेक्षौमसंबंधोविधीयतइ-
त्येकएवपुमान्सस्त्रीकआधानंकुर्वीत ५ दंपत्योःसहप्रयोगेऽपितेपत्न्यवेक्षितमित्यादिविहितंतत्येकार्यंयजमानोवारभतइत्यादितुउपादेयजमान २१

स्य वि वृक्षिन लिंगत्वन्ने नैव फलिसंस्कारात्क्तद्वयोः फलित्वादवर्ने नैयानि तु परार्थान्युपस्थानानुमंत्रणादीनि याजमानसमाख्यानानि तत्कर्तृकाणि ना
न्यन्यतरेणाकार्याणि आवं ताहशपुल्लिंगाद्दानदिनोस्यनेकल्पत्वादितिचेत्। पावतुक्मादिकं स्त्रियः। आदिपदात्फलिसंस्कारग्रहः स्त्रीणामाहत्याध्ययनाभि
भावाद् विदुषीसंपन्नविद्यपुरुषसत्वे न विदुषी कार्या तस्मात्पुमानेव कुर्यात् ६ स्वर्गकामो यजेतेत्यादि। विशेषेण चातुर्वर्ण्यमधिकरोतीति स्वाध्यायोध्य
नेकृत्वंगार्थज्ञानजनकं सतत्क्रत्वंगं प्रयाजादिवत्क्रतुविधेरेव प्रयुज्यते चतुर्थस्योपनयनविध्यभावान्नैविनैव अधीतविद्यात्वाद्याकर्मणाप्यधिक्रिय
ते अग्नेत्रयस्तूपनयनपूर्वकमधीतसाधिक्रियंते यद्यपि च अस्त्यस्य अभावात् अध्ययनं क्रत्वंगं किं त्वाधानमिवाग्न्यर्थं विद्यार्थं तथापि स्मृतकादिनाधीत्यवि
द्यास्य तुर्थोधिक्रियते अध्ययनस्य क्रत्वंगं तथा अवैगुण्यादितिचेत्। त्रयाणामेव वर्णानां भवेद्यागेष्वधिक्रिया अध्ययनस्यानंगत्वेपि तज्ज्ञार्थत्वान्नस्य क्रत्व
र्थित्वादन्यतो लब्धविद्यास्त्रैवर्णिकानेव प्राप्य चरितार्थः। क्रतुविधिर्न शूद्रस्य तामाक्षिपति अनग्नित्वाच्चानधिकारः विध्यधीनग्रहणमंत्राभावाच्च तस्मा
च्छूद्रो यजेतेनवचक्रम इत्यादिप्रतिषेधाच्चानधिकारी चतुर्थः ७ सिद्धविद्यस्त्रैवर्णिकाधिकारिवत्सिद्धद्रव्याधिकारकं प्राप्तेनाद्रव्यस्य तदाक्षिपेदितिचेत्।
अधिकारी भवेद्द्रव्यहीनस्तत्समुपार्जनात्। प्रसक्तविधिलब्धविद्यास्त्रैवात्र ताहशामभावात्स्वार्थभोजनादिवत्ः क्रतुरपि तदाक्षिपेदित्स धनं तदर्जनं का
रयदधिकुर्यात् ८ अंतरंगांगहीनस्य नाधिकार इत्याशंक्य प्रतिसमाधेयत्वेन दाक्षिण्याधिकुर्यादित्याह। अंगहीनोपि तस्यैव समाधानेधिकारवान् ९
एतस्यापवादमाह। यस्याप्रतिसमाधेयं तत्र तस्यास्याधिक्रिया तदंगहानमप्रतिसमाधेयं चेत्तत्काम्येष्वधिक्रियते कृताधानो नित्येष्वधिक्रियते १०

१२ दर्शपूर्णमासयोरार्षेयं वृणीत इत्युक्तोऽच्यते एकं वृणीते द्वौ वृणीते त्रीणि वृणीते न चतुरो वृणीते न पंचातिवृणीत इति तत्राद्येन वरणविधिः न चतुरो
न पंचातीति निषेधः तथा चैकद्वित्रिपंचार्षेयाणां प्राप्तानामनुवादः सामान्यस्यैकद्वित्रिपंचभिरुपसंहाराद्वा चतुर्णामप्यधिकार इति चेन्न । स्याद्वा
न मत्रार्षेयस्य आद्ये प्रतिषेधद्वयाश्रयणान्नित्यस्य पाक्षिकत्वं च स्यात् द्वितीये विधित्रयं निषेधस्तु पार्थवानाकल्प्यान पंचातीत्यनुवादः सामर्थ्यात्पं
चानामपि वरणविधिः कल्प्यः नित्यस्य पाक्षिकत्वं च नित्यविधिश्च वरणविधौ सर्वस्यैवानुवाद इति त्रादृग्वरणोपसंहारसमर्थानामेवाधिकार इ
ति नैकद्व्यार्षेययोरधिकारः मन्त्रवत्त्वसेन्तु सर्वेषामेवाधिकारः ११ वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिविधा पवर्गासुस्थकास्त्रादधीतेति श्रुतं तत्र
लक्ष्यविद्यानां त्रयाणामेव रथकारणा निमित्तेन वर्णविधिः न संकरस्य विशिष्टाधानविधिर्गौरवादविद्वत्त्वाच्चेति चेत् । रथकारो न योगिकः । रूढिप्राबल्या
द्विदुषोऽपि विशिष्टाधानविधिप्रतीतेः अन्यथार्णत्वादेवानो इत्यादिमंत्रवर्णाच्च अनुलोमवत्तत्पर्याय रथकारस्यैवाधिकारः १२ रौद्रं वास्तुमयं चरु
न्निर्वपेदेतया निषादस्थपतिं याजयेदिति श्रुतं तत्र षष्ठीसमासाश्रयणेन सिद्ध्यैर्विद्यैत्रवर्णिकाधिकारोऽस्तीति चेन्न । निषाद एव स्थपतिस्तु रौद्रेऽधिका
रवान् । षष्ठीतत्पुरुषे निषादपदे निषादनिरूपितसंबंधवति लक्षणापत्तेः कर्मधारये एवञ्च स्वार्थलाभात् तद्वत्स्वान्नये रविद्यस्य च जातिविशेषस्या पृ०
धिकारः १३ इति लघुवार्त्तिकटीकायां षष्ठस्य प्रथमः पादः ॥ ॥ अनेककर्तृके सत्रिकामाः सत्रमासीरन्नित्यादिश्रवणात्तोपान्नकर्तृबहुत्वस्य विवक्षि १२
तत्वात् संहतानां कर्तृत्वप्रतीतेरेकैकेन च कृतेऽपरस्य तदयोगात् बहूनां प्रत्येकं कर्तृत्वानुपपत्तेः परिहारः कर्तृत्वं न स्यादेव च भोक्तृत्वमिति फलाव

यवकामिनामधिकार इति चेत् । सत्राधिकारिणां तु तत्रैकैकस्य फलं भवेत् । उद्देश्यफलकामनाविहितत्वाविवक्षणात् सह स्वप्रयोक्तॄणां प्रत्येकं फल
मिति षाष्ठत्वादभ्युपगमेप्यसंज्ञातकर्तृगामित्वाभावादाख्यातैकवचनश्रुत्या कर्त्रेकत्वप्रतीतेश्च यिविको इह नादि षिवसर्वकर्तॄणां प्र
गपदेव पदार्थे च वपादेकेन हुतं इतस्याभावादन्यथा षिष्टानवकुत्वलक्षणापत्तेः प्रत्येकमेव कर्तॄणां प्रत्येकं कृत्स्नं फलमिति इह तत्र फलकामि
नामेवाधिकारः १ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादावुद्देश्यगतैकत्वस्य लिंगवद्विवक्षितत्वादेको द्वौ बहवो वा यजेरन्नित्याख्यातार्थभा
वनाक्षिप्तोपादेयकर्तृविशेषणसंख्याविवक्षितेति प्रयुक्तं यागेन स्वर्गं भावयेदिति यजेतेत्यस्यार्थः तत्स्वर्गं कुर्यादिति अन्यकृतस्यान्येनापि प्राप्त्यपाता तत्र
थापि वा फलक्रियायागप्राप्तेः करणोपरागमात्रस्यैव तत्र विधाने भावनायां वा प्रतिपत्त्यपार्थसंख्यायां वैरूप्यापातात् विध्यनुपपत्तेः यागानुरक्तत्वेना
प्राप्तत्वेपि तस्याः ध्यनुरक्तत्वेन होमस्यैव प्राप्त्या प्रविवेके न कारणमात्रे विधिपर्यवसानादिति चेत् ॥ एकोधिकारी दर्शादौ । न तावत् स्वर्गप्राप्तिः प्रत्य
यार्थः किंतु स्वर्गं कुर्यादिति क्रियैव आत्मनेपदविधिर्यां परप्राप्तिकारणतत्संचयपक्षद्वायनुपदत्तविधिशक्तिकेन प्रत्ययेनानेकविशेषणविशिष्टा वि
धीयत इति तद्विशेषणसंख्याविधेयविशेषणतादिवक्षिता फलं हि कामयमानस्तदुपायाय परिशिष्टोऽस्त्वं तत्सप्तदशसो रूद्दासीनो विशिष्टक्रियां फलाय वि ना
धीयमानां शास्त्रप्रामाण्यादवगत्य प्रवर्तते फलक्रियाप्राप्तौ विशिष्टविधिनाकोष्ठु विशेषणापरत्वाद्विधेः प्रतिविधेयं विध्यावृत्तिः स्यादिति अप्राप्त
क्रियैव विशिष्टा विधेया प्राप्तायामपि तस्यां सैव विशिष्टा विधीयत इत्युक्तमाघाराग्निहोत्राधिकरणे किंतु तत्प्राप्तायां तस्यामुपादेयकर्त्रैकत्वस्य

३१

१३ 73 विवक्षितत्वादेक एवाधिकारी २ सौर्यादिकाम्यकर्मफलप्राप्तौ तदिच्छानिवृत्तौ वारब्धमपि न समापयेत् वैयर्थ्यात् न च शिष्टविगर्हणा वारणा
य समाने तस्य भ्रांतिमूलत्वादिति चेत् समाप्यारंभमपुरुक्रिया। शिष्टाचारप्रामाण्यस्यापि तत्वान्नेति। यदेवताभ्यो वा एष आवृश्चते यो यक्ष्य इ
त्युक्त्वा न यजते त्रैधातवीये न यजेत तत देवताभ्य आवृश्च्यत इति प्रायश्चित्तश्रवणादतः समापनीयमारब्धं अग्न्याहरथादि दृष्टार्थमपि काम्यं देवताभ्य
य्यापादत्वादवश्यसमापनीयमिति चेत् गोदोहादिन समाप्यं स्यात् स्कृ लेछायगमे सति। गृहस्थितुस्तत्रकान्नं गृहादौ देवताप्याप न स्य पुरुषार्थत्वात्
भ तत्कर्म देवतासंबंधीति न समाप्यं ४ न कलंजं भक्षयेदित्यादौ न चाप्यातयोः संबंधेन नप्रतिषेधः व्यवहितत्वापपत्तेः किं तु नञ्धात्वर्थयोः संबं
धेन विधियोग्य विशेषितसंकल्पलक्षणस्य च स्वर्गाय प्रसयेन विधीयते तथा चाव्यवहितान्वयो धात्वर्थविधानं च एवं च फलार्थिना वर्जनीयं अ
न्यस्य याथाकाम्यमिति चेत् भक्षणालपनादीनां फलायत्तनिषिध्यते विना कारणं संनिधिलोभे न प्रत्यक्षकृतिसाध्यायोगात् परिशिष्टस्य
नस्य तत्रान्वयेव्यवधानं शंकायोगात् नञ्समभिव्याहृतत्वाङ्प्रेरणाविरोधि निवर्तनानिवृत्तिफलाप्रतिपाद्यमाना निवृत्तिविषयस्य बलवदनिष्ट
जनकत्वेन विनानुपपत्त्या धात्वर्थस्य तत्साधनतां कल्पयतीति सर्वेषां नित्यमेव वर्ज्यमेवं जातीयकं ५ स्नातो नियमागृहे स्वःप्रास्यमुखो भुंजीया राम०
उदङ्मुखो मूत्रं कुर्याद् दयोदित्यादयो ज्ञानग्निविद्यासाध्यताज्ञातो यदा शक्नुयात् तदा सम्यक् स्यादिति चेत् आरभ्ये चोपनयनादमिवादादयस्य तान्। १३
उपनयनादिर्नियमइति स्मृते स्त्रदारस्य स्पृश्या। यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यादौ निमित्तनैमित्तिकस्य

प्रत्यवायमपरिहाराया वश्यकर्तव्यत्वादंगभूतस्तायंकालादिपरित्यागेन स्नातस्येन कुर्यादिति चेत्। अग्निहोत्रादिकं कार्यं प्रदोषादिषु जीवता।
पे उपादेयप्रयोगविध्यनुष्ठाप्यो कालविधिर्याग्याद्यतिरिक्तो यथा शक्त्युपबंधः अत्र तु प्राप्ते काले विदुषाग्निमतां च यावज्जीवं कुर्यादिति विधानादंगस्या
पि कालस्यार्थ निमित्त विशेषणत्वमिति तत्कालजीवी कुर्यात् ७ कालशास्त्रात्रिमित्त संकोचे एकस्मिन्सायंप्रातः अथ एकस्मिन्द्वे पौर्णमास्यां
चानुष्ठानान्नैकाद्यस्त्वचारितार्थ्यान्नावर्त्तनीतिचेत्। तच्च प्रतिप्रदोषादिकालमावर्त्तते सदा। कालशास्त्रादन्यकालीन जीवनस्य निमित्तत्वाभा
वे पितृकालीनजीवनाद्यन्नो नदाद्यन्ते ऽवर्जनीयत्वात्पुनः पुनः कार्यता ८ प्रत्याहृत्ति निमित्त फलजनकानां निमित्ताहृत्त्या अहृत्ता वपि कर्मी गर्भे
हृत्तादि निमित्त होमादौ सकृत्त्वं तेनापि कृतत्वप्रकारसिद्धेर्न भेदनाद्यन्नावाहृत्ति गुणकहोमयुक्त एव क्रतु सगुणाद्यस्य वगन्ते सदा हृत्तावाहृत्ति स्व
न्न होमादीनां ९ गुर्वनुगमनादीनामाचरणप्रमाणकानां न गमनाद्यत्तावाहृत्ति नियमः दृष्टार्थत्वेन गुरुशुश्रूषादित्वादिति चेत्। अभिवादायपि
नथैवावर्त्तत निमित्त ततः दृष्टार्थत्वे विशास्त्रान्नियमादृष्टाभ्युपगमान्न हृत्तेन निमित्ताहृत्तावाहृत्तिः १० सोमेन यजेत स्वाध्यायमधीयीत प्रजा
मुत्पादयेदिति श्रुतं सोमविधायजनं न नित्यं ज्योतिष्टोमवाक्ये न सोमयागस्य फले विधानात् वसंतवाक्यस्य कालविधिपरत्वाद्वियाद्यजपो विश्व
जिद्वत्त्वगोपलतात्समनमेत्र ब्रह्मवर्चसकामः स्वाध्यायनां गोपनयनफलानामध्ययनेोपसंहाराश्चेति चेत्। सोमविधायजनं नित्यं। वसंते वसं
न्त इतिवीप्सया वसंतस्य निमित्तत्वावगमान्निमित्ताहृत्तावाहृत्तिर्ज्योतिष्टोमस्याङ्गत्वबोधकं त्वा न भवतां वसंते ज्योतिषा यजेतेति कस्यां चिद्धारवायां

१८ प्रकारेणोच्यते स्वाध्यायनमप्यक्षरग्रहणद्वारा अनुष्ठानोपयोग्यर्थज्ञानार्थमावश्यकं सम्पन्नमिति स्वाध्यायनांगोपनयनाश्रितस्याष्टवर्षगुणकालं अ
नुसाध्य तथात्मजानि तिनिंदाश्रवणात्सजोसादनमपि नित्यं जायमानो वा द्विऋणवान्वादपि विहितमपि नित्यं ननु तद्वाक्ये ज्ञानग्रहणानंतम्पत्ये
७५ वाव स्यैकत्वं गम्यते नाम्येव प्रतीयत आह। तन्नयाणामपीति च। तत्सोमविद्याप्रजं विधौ विशेषाश्रवणादर्थवादगतज्ञानग्रहणमुपलक्षणं
॥११॥ ॥इति षष्ठस्य द्वितीयस्य खण्डः॥ ॥यावज्जीवादिनैमित्तिकविधिविहितेषु सर्वांगोपसंहारसमर्थ एवाधिक्रियते अंगानां समुच्चित्य क
र्त्तृभावेन संग्रहस्यैकादशे वक्ष्यमाणत्वात् अन्यथा अफलत्वापत्तात् अतो हीनो नाधिक्रियत इति चेत्। नित्यं कार्यं यथाशक्ति। यावज्जीवं द
जीवनेष्यानुसंबंधविहितेन णमुल्प्रत्ययेन संबंधात् ताभ्यां वा यागानुरक्तभावनां प्रतिनिमित्तत्वेन गम्यते दर्शपौर्णमासयागाद्विशेषितस्य यजिःका
लयोगिनामाग्नेयादीनामेव वाचकोऽगानामिति चतुर्थ्यां स्थितं निमित्तं वा वश्यं नैमित्तिकं प्रयोजयेदित्यवश्यकर्त्तव्याभावनायथाशक्त्यंगा
निगमतीति तावतैव फलमतो यथाशक्ति प्रयोगेऽयोग्योऽवाधिकारः १ काम्यप्रयोगेष्वपि काम्यनावस्तुरूपमत्राधिकारत्वमतीत्यवायाय यथाशक्तिप्र
योग इति चेत्। काम्यं स्यणामेवतुनैमित्तिकस्यावश्यकर्त्तव्यत्ववदत्रार्थदित्स्याज्ञातवगमात्काम्यनाया आनिमित्तत्वात्सर्वप्रयोगशक्तकाम्यपरत्वेनापि १२०
तत्कुत्स्यपपन्नेः सर्वांगोपसंहारशक्तस्यैवाधिकारः तिर्यगधिकरणसिद्ध एव पूर्वाधिकरणप्रत्युदाहरणत्वेन प्रपंचितः २ क्रियाद्रव्ययोरभेदाज्जीवा
णादिद्रव्यभेदे तदात्मिकायागादिक्रियाधिभिन्नैवेति प्रतिनिधिनापि विहितयागानुष्ठानासामर्थ्यः स इति चेत्। द्रव्यभेदेऽपि यागादिक्रियानैवविभि १८

घते। क्रियागुणादिभिर्द्रव्यस्य भेदाभेदस्वीकाराद्द्रव्यभेदेऽपि चलति यजतीत्येकाकारप्रतीतेर्न द्रव्यभेदेऽपि यागभेद इति सिद्धं प्रतिनिधिः॥ ३॥ दर्शा
दौ नित्यप्रयोगे आशांशागतागेय्यनंगमागमे क्रतुविधेरुदासीनत्वाद्व्रीहिचोदनायाश्च तज्जातीयाविधायकत्वात् स्वस्यापि प्रमाणास्यादृष्टेरगग
म इति चेत्। मुख्याभावे प्रतिनिधिः। नीवारादिविधीनां क्रतुविध्याक्षिप्तद्रव्यनियमार्थत्वस्य चतुर्थे स्थितत्वात्तद्वलाभे तद्विधेरप्रवृत्ते स्वस्वपकर्तव्य
कर्मास्य द्रव्यमाक्षिपेदित्यस्ति प्रतिनिधिः ४ अग्नीन्द्रादिदेवताः आहवनीयादयो ग्रयः मंत्राश्चादृष्टार्थप्रयाजादिक्रियाश्चापूर्वसाधनत्वात्प्रतिनिधे
या इति चेत्। देवतादिषु नास्त्येव। मुख्यकार्यकारस्य प्रतिनिधेयत्वादविधिगम्यदेवताकार्यमन्येन साधयितुं न शक्यमाहो मस्याधारेण विनाप्यनु
ष्ठानार्हत्वादाहवनीयादेरदृष्टार्थत्वेन तद्दृष्टमन्येन स्यादिति प्रमाणाभावात्प्रयाजादिजन्यादृष्टस्याप्यमाजन्यत्वात्तेषु प्रतिनिधिशंका
मंत्रस्यादृष्टार्थत्वेऽपि तदर्थस्मृत्तात्तदभिधायिशब्दांतरकल्पनातः पूर्वस्मृतस्यानुष्ठानोपपत्तेर्वियमादृष्टलोपस्य सर्वत्र तुल्यत्वान्न प्रतिनिधिः॥
५॥ अयज्ञीया वैमाषा वरकाः कोद्रवा इति सिद्धं यज्ञसाधनत्वाभावात् प्रतिनिधित्वे त्रीत्याद्यंशानामेव तद्गतानां साधनत्वात्तन्नदाकारस्यानंगत्वान्न निषे
धविरोध इति चेत्। माषायाम् प्रतिनिधिस्थाने मर्हत्ययज्ञियाः। विजातीयांशस्याप्यंशकांसाधनत्ववारणमिति यज्ञानर्हा प्रतिनिधेयाः ६ श्रोत्रिये
स्त्र्याष्टते मृते वा स्वामिनि यजमान पदार्थकरणाय स्वामी प्रतिनिधेय इति चेत्। न। न स्वामिनः प्रतिनिधिः। मृतस्य स्वस्य वाधिकारनिवृत्तेर्न प्रतिनि
धिना कृतं स एव वेदधिकारी फलभाक् प्रतिनिधित्वमाकोपः प्रतिनिधायकाभावाच्च पत्न्या अनन्यत्वाच्च स्वत्वं त्याग्यः न प्रतिनिधयकत्वाच्छ्रोत्रियमाष्टत यो

१०.१३६६

१५ राज्याद्वेक्षणादिपरार्थक्रियाः अध्वर्य्वादिभिः कार्याः फलिसंस्कारा यान्येन हृता अपि यथार्थ इति न स्वामिनः प्रतिनिधिः ७ सत्रदक्षिणावरणः तत्रमासीरन्निस
त्रे बहूनां प्रवृत्तानामेकमरणे न प्रतिनिधिः स्वामिन इति चेन्न सत्रेतस्याप्यसौ भवेत् आरब्धस्य काम्यस्यापि यथाशक्त्यवश्यसमापनीयत्वात् दानीयमान
स्यपजमानूत्पद्वाद्यस्वामित्वविशिष्टकर्त्तृत्वाभावेपि कर्त्तृत्वांशेनांगभूतसंख्यापूरयितुमन्यः प्रतिनिधेयः ८ स्वामिस्थानोपनिपातात्सोपि स्वामीति
चेन्न स स्वामी कर्मकर्त्तान्ताकर्मकरोतीति कर्मकृत्तिविधितश्चासंकल्पात् कुर्वीरन् स्वामी अपं तमेः संख्यापूरणाय स्वामायुपायेन मध्ये आनीतइ
ति न स्वामी ९ तस्य न फलिसंस्कारा वपनादयः अफलित्वादिति चेन्न स्वामिधर्मी तया प्यसौ अन्येषां कर्त्तृणां सप्तदशत्वावाधाय अफलित्वेप्यनातुरोधे
नत्तान कुर्यात् १० व्रीह्यपचारे सदृगत्व प्रतिनिधेयं व्रीहिशास्त्रस्य सदृगविषयत्वान्न आग्रेयादेः द्रव्यसामान्यासेपकत्वादिति चेन्न सदृक् प्रति
निधानत्वं व्रीहिशब्दस्य जात्यर्थतया तत्सदृश्छिन्नावयवारंभयोग्यत्वाः कृप

२३००

१५

उद्धृ वार्त्तिक टीका